मान्नाशावधितयाऽऽयनामात्मत्यत आह॥ नावति॥ नाबांभावानामनित्यपदार्थनाम् तानास्तीत्यर्थः॥ नावो तदृति कचित्॥ अनात्मनि दोषदृष्टेः सत्यां आत्मनिबाधाप्रफलितमाह॥ तत्मेवं कवलं साधोमतिराकुलितांनरा॥ रागरोगी विलसन्ति विरागी विरतोऽजनः॥४१॥ अंतरायस्य कस्कनोरंतराला नतु सर्वकामनाम् त्यागात्तापनिवृत्तिः सापितत्पतदूत्य तत्राह॥ रागइति॥ नद्दितिरक्तसंपर्कात् आगोनिवर्त्यंतामित्यत आह विरागीति॥ तर्हि वरानकार्येयत आह॥ यत्रेति॥ यत्रे नयातिपुवनाइत्सजनसंगतिः॥ गतिर्नविद्यते काचित्क विन्नो दैतिः सत्यता॥४२॥ त्योवानदिकार्यकारणात् पुरुषार्थं संपानत्वमनानवाईक इत्याशयः॥ तर्हि इदानी मेव तत्त्व वृत्तिः स्वेच्छनाप्यित्यत आह॥ इतइति॥ तर्हि अन्यउपायो निष्पनाम्नत आह गतिरिति॥ ननु कथमन्यागतिर्नास्ति त्वं केवलस्वयमेव वा प्रकाशाऽऽत्मा प्रतिनौतीयत आह॥ धर्मेति॥ सत्यता सत्यमेन्योगे भावः सत्यस्वरूपमित्यर्थः॥ अथ वाँद्धितिना मिवान्यागतिर्विष्यतीयत आह॥ कुचिदिति॥ कचिदपितगतः विरित्यर्थः॥ अथ मनोविशुद्धानीवांतर्मुरिताऽऽ संसारस्य केऽऽनमध्य वर्त्तिवसामपंइत्नमितिरर्था तिसंस्थितिरिहार्यतानन्दति॥ धीरतेति॥ धीरताधीरतामति तत्तोन्यात्तपंरोजनः॥ खुलत्नोडुर्जनाख्येव दुर्जनः सत्समागमः॥४३॥ अनत आह पात्तइति॥ पात्तए स्मर्यादिग्रंथाः उद्भांतत्तोनाहाः उत्पात्तउद्भवः॥ आगमपापिमानावानावनाउवर्जितवर्जिनी॥ नीयते केवलं कोपिनि संस्तपरं परात्ना च आपद्रूादि विषयाशार्द्धंपुरुषार्थकलानांदुर्लभत्वं त हितं ... सालं

पदार्थसत्यतानोदेति नचास्ति॥ ४॥ रतीगता॥ नोजव्याकरणोदेति इराशयातिनीचता॥ ४२॥ ४ ४

45

आलोलेपलवमतिः परिखिन्नलमतिः तनुबुद्धिः गळति न रयती रसं ॥ १२ ॥ ... स्माप्रायिनो आवार्द्ध २

[illegible] नीयते ति केवलं पुरुषार्थसाधनानुष्ठाने विधुरं कापि पुरुषार्थे परिपूर्णे निर्भोगे [illegible]

[illegible] जलावगाहनं संसारदावाग्निदग्धस्य मम निर्यानं दावगाहनं [illegible] शास्त्री तिदर्शयितुमाह स्वतः अनियत्व [illegible]

[illegible] दिना अश्राव्योऽयं ततः पूर्वेण ग्रन्थेन सर्वस्य पदार्थानि कानि विसृतानि व्याख्यायंते [illegible] तद्दोषोपपाद्यो [illegible]

[illegible] उपपादनस्तनावकाश [illegible] नावनीयं ॥ १९ ॥ अन्योपदेशो [illegible]

न स्वयं समवधत्तीयतत्तनभूतं द्वितीयार्थः । अद्य तस्सत्त्वयाद्यो [illegible] पुवेनं वापि मुह्यते । धरापि याति वैधुर्यं केवाल्लभामाह [illegible] ॥ ५८

असत्ताद्यतिपदद्वन्द्वः । विधुर्यं असत्त्वं निश्चा [illegible] ------- श्रुष्यंप्यपि [illegible] शीर्यं तत्तारका अपि सिद्धा

अपि विनरूपो तीर्थ्यनरूपशंका परमेष्ठ्य पिनिश्चा [illegible] यत्र हरिरप्यज्ञः [illegible] नास्व माया ति केवाल्लभामाह [illegible] ॥ ५९

अतः परमात्मना [illegible] नियतिः स्थापनीयत्ता । योगमाप्निनीयत तेन तं केवाल्लभमाह [illegible] अधिकान्यत्र ने

[illegible] इत्यर्थः । नियतिर्देवपूर्वकमित्यर्थः । मर्यादा वा नियतिः । स्वछमन्यतु केनचिद्दम [illegible]

आत्यति । अस्मात्प्रमाणत्वेन दुर्दर्शज्ञानमूर्तिना । तुवना विनिविश्यते केनचिद्धुमहायिना ॥ ५० ॥ अस्मात् [illegible]

अत्र वा वाच्यं तत्त्वपारमार्थिकं स्वरूपं यस्य स तथा । तेन । दुर्दर्शज्ञानमूर्तिना । दुर्दर्शं ज्ञानमेव यस्य दर्शयितुमशक्यं [illegible] विडंबितं

अपरस्यांतात्तत्त्वमा [illegible] यनाविश [illegible] नानुभूतपरमात्मा [illegible]

आद्यास्त [illegible] तद्बोधनात् सुरैव मिदं सविनाशत्वाद् [illegible] आलोलपेलवमतीनतीव

श्री ॥ ३५ ॥

46

एवं अविवेकिनः २

संसरमेनुद्दिश्य तन्मध्येवर्त्तमानोमुमुक्षुरेकांतप्रियबल्लनिश्वाससन्निधौ श्रवणाद्यसमुपार्जितं ताके
ताकुलितवासस्तामपि निद्रां नाद्रियत इत्याह इंउत इति। रामउवाच इतस्ततो इरतरं विहृत्य
प्रविश्यगेहं दिवसावसाने। विवेकिलोकाश्रयसाधुवृत्ते रिक्ते क्रियां तकउपैति निद्रां॥५३॥ विवे
किलोकाः खलविदस्तदाश्रयतदधीनं यत्साधुवृत्तं श्रवणादिलक्षणं तेन रिक्ते शून्ये। शिष्टं समानं॥ ०
ननु सर्वो जनः पुत्रदारादिकममृततुल्यं संकल्प्य तत्र प्रवर्त्तते न श्रवणादौ। तद्वत्तव प्रवृत्तिः किं न
स्यादत आह पुत्रा इति। पुत्राश्च दाराश्च धनं च बन्धुश्चा संकल्पते नात रसायनाद्याः सर्वे तु तन्नोपक
रोत्यथान्ते यन्नातिरम्या विषमं हि छिनेव॥५४॥ नातिरम्येत्येकं पदं। अनतिरम्या विषमं हि छिनेव ति तेयत्
दं ते अन्तकालेनोपकरोतीति संबन्धः। नामशब्दः कुत्सायां। यत्रातिरम्यति किंचित्तत्रायमर्थः। यत्र पु
स्मिन् दुःखे सति विषमं हि छिनाप्यतिरम्यैव भवति। न दुःखं करोतीत्यर्थः। क्वचित्तु दुःखादंकमपि वि

षयसुखंअनुभूयतत्संपादनंयथासंअनुभूयहृष्टःयस्तोभवति।स्पष्टमन्यत्र॥७॥विषय
परइत्याह विज्ञाविनइति।विज्ञाविनेशत्रुजनेसमग्रेसमोगतायामलितस्खलद्भ्यां।सेव्यंतद
तानिसुखानियावत्तावत्समायातिकुतोपिमृत्युः॥५५॥स्पष्टं॥आलोकामृत्युवक्रेअथविग्रय
यदाजीवतितदापितस्यत्रात्यात्मकः कलत्रादिव्यवहारोस्थिरइतिआहइतोन्यइति।तइतोन्य
तश्चोपगतास्तथैवसमानसंकेतनिबद्धलावुः।यात्रांसेमासंगसमानराणांकलत्रमिवव्यव
हारमायाः॥५६॥समानेनसाधारणेनसंकेतेनबद्धोभावोऽलिप्रायोलोगादिविषयोयास्तुव्यवहा
रमायासंजातास्तथा।अथमर्थः।फाल्गुनेमासिकृष्णचतुर्दश्यांविश्वेश्वरयात्राविधेयेतिसंकेतेन
सर्वसाधारणेननराणांयथानिबद्धालिप्रायाःक्षणिकायात्राःसमासंगाभवंति।यथाविवाहा
दिकालीननसाधारणसंकेतेननिबद्धालिप्रायांकलत्रादिव्यवहारस्तोतयःक्षणिकाभवंती

ओ॥
२९

नि४

तिस्पष्टमन्यत्र श्छानन्वस्मदादिलोकुर्लोगावसरे एवमल्पकसंख्येवोप्यनेकसहस्रयुगजीविनां ब्र
ह्मादीनां नैवमित्यत आह कल्पेति। कल्पातिधानरूपजीविनोपि कल्पौघसंख्याकलने विरिंच्याः
अतः कलामात्तिनिकालजाले लघुवदीर्घवधियोप्यसत्याः ॥५७॥ अनादौ संसारे कल्पौघसंख्या
कलने कल्पसमूहसंख्यागणने क्रियमाणे विरिंच्यवाः कल्पातिधानरूपजीविनो हि। कल्पना
मकरूपजीविनो न भवंति। तथाप्यस्मदादिलघुकालापेक्षया दीर्घजीविनो ब्रह्मादय इत्यत आह अत
इति। लघुत्वादिकं यथास्वप्ने मुहूर्ते वत्सरौघभ्रांतिः तद्वज्जागरेपीति भावः। इतरत्समानं ॥५८॥ एवं
संसारावर्त्तमावेद्य तन्निवृत्त्युपायालाभनिमित्तखेदं दर्शयति जन इति। जनः कामासक्तो विविध
ऊकलाचेष्टितपरः सन्नरश्च नैव्यस्मिन्लगति सुजनसानादासुजनः। क्रियादुःखासंगाद्विधुरविधुरान्
नमखिलाजनानोनेतव्या कथं मिवदराजीवितमयी ॥५९॥ ऊकलाऊविद्या। किंतु जनतान्
च क्रियपैव पुरुषार्थः साध्यतामत आह क्रियेति। अखिला क्रियादुःखसंगाविधुरविकारासक्त

त्तिः ॥ दुःखैरासमंतात्संगो यस्याः सा तथोक्ता ॥ विधुरा दुःखौघैर्नात्यंतरिक्तेत्यर्थः ॥ इतरत्समानं ॥ ७ ॥ एवमना
त्मवर्गस्य नित्यत्वं विस्तरेण प्रतिपादयितुं संक्षिप्याह दिवसास्त इति आदिश्लोकत्रयेण ॥ दिवसास्ते म
हांतस्ते संपदस्ताः क्रियाश्च ताः सर्वे स्मृतिपथं यातं यामो वयमतः परं ॥ ५९ ॥ अस्मान्विमृश्य रुद्रश्च स
र्वीयाश्च तजातयः ॥ नाशमेवानुधावंति सलिलानीव वाडवं ॥ ६० ॥ आपदः क्षयमायांति संपदः क्षण
मेव च क्षणं जन्माथ मरणं मुने किमिव न क्षणं ॥ ६१ ॥ वाडवं वडवाग्निं ॥ किमिव किं किंचिदित्यर्थः ॥ स्पष्टमन्य
त् ॥ ७ ॥ अस्त्रेण हतः शूर एकेन बहवो हताः ॥ आकृताः प्रसृतां याताः सर्वमावर्त्यते जगत् ॥ ६२ ॥ स्पष्टं ॥ ७ ॥
श्रीराम उवाच ॥ एवं बहुधा संसारदोषान्निरूप्य तत्फलं निरतिशयं वैराग्यमाह नेति ॥ श्रीराम उवाच ॥
इति मे दोषदावाग्निदग्धे संप्रति चेतसि ॥ प्रस्फुरंति न भोगाशा मृगतृष्णासरःस्विव ॥ ६३ ॥ भोगेषु इच्छा ॥
स्पष्टमन्यत् ॥ ७ ॥ तावेपि जीवनादौ प्रीतिः स्यात् तत्राह नाभिनंदामीति ॥ नाभिनंदामि मरणं नाभिनंदा
मि जीवितं ॥ यथा तिष्ठामि तिष्ठामि तथैव विगतज्वरः ॥ ६४ ॥ स्पष्टं ॥ ७ ॥ ननु विषयज्वरयास्य चित्तस्य रि

श्रीः ॥
ॐ

वै॰

किंसावार्हके कर्त्तुं च चिंतायौवने किमिति क्रियत इत्यत आह अथेति। अथ वेत्स्वछया बुध्या मुनींद्र न चिकित्स्यते। अयं चित्त चिकित्सायास्तु किलावसरः कुतः॥६५॥ बाल्यानंतर्यमथशब्दार्थः तत्र हि तच्चित्तमिति वा। किलेत्यसंभावनायां॥ विषये ज्ञात चित्तं चिकित्सनीयमिति कुतस्तत्राह विषमिति। विषं विषय वैषम्यं न विषं विषमुच्यते। जन्मांतरघ्ना विषया एकदेहहरं विषं॥६६॥ विषये ज्ञ वैषम्यं शोकनाशोऽत्र नत लक्षणं। रागद्वेषहेतुत्वं तु इति। शिष्टसमानं॥ ननु ज्ञानवैराग्यौषधाभ्यां चिकित्सित चित्तं किंफलं प्राप्तं ये न त्वया चित्त चिकित्सा क्रियत इत्यत आह न सुखानीति। न सुखानि न दुःखानि न मित्राणि न बांधवाः न जी वितं न मरणं बंधाय ज्ञस्य चेतसः॥६७॥ ज्ञस्य ब्रह्मविदः शेषं स्पष्टं॥ चित्त चिकित्सायाः साफल्यं दर्शयितुं फलितमाह आशुरिति। आशु वर्षसु विघट्टिता अपटली लंबांबुवद् गुरं भागामेघवितानमध्य विलससौदा मिनी चंचलाः लोलायौवनलालनां तनुस्त्वतामिस्ताकलय्या कृतं छेवाद्य मया पिंतानं तु हृदंनि तेचिरं शांतया॥६८॥ चितान मुक्तोच नः सौदामिनी विद्युत् यौवनलालनायौवने लालनासेव जल रयो जलवेगाः कचिल्लोलेति स्त्रीलिंगनिर्देशः स्त्रत्र जलरय इति तिन्न पदं। जलरयो लोलवे दृष्टां तवे

जलरयस्त्वि॰

नोच्यते। विषयबाधनवारणाय विवेकलोहकारकृता वैराग्यमुद्रा विन्नेर्पितेत्यर्थः॥७॥ अद्वैतरसमानं
एवं मुद्रार्पिता चेत्कृतं कृत्यमतःपरं किं तत्राविशिष्टं। तत्राह नेति। ना चरस्थितिमुपायाति न चायाति
यथेप्सितं। बुद्धिर्जीवेश्वरायत्ता को तेव प्रियसमानि॥८॥ जीव एव विवेकित्वं नेश्वरो नियंता तदायत्ता
तदधीना जीवेश्वरैकत्वप्रमाणा वा बुद्धिर्निर्दुःखपदे अवस्थितिं नोपयाति। कांतापक्षे जीवेश्वरः प्राण
नाथो तत्रासापि प्रियसमानिनं दृगहस्य चेष्टा स्थितिं नयादिना नोपयाति। यथेप्सितं च बहिर्नयाति
चित्तेति। क्वचित्तत्रापि बुद्धिरेव विविक्ता विमलेक्षवित्पदे विश्रांतिरवशिष्टेति भावः॥९॥ आचित्ता
वस्थितं स्थानमिति वादाय पृच्छति अतद्विति। अतोऽत्र छं मनायासमनुपाधिगतत्वमं। किं तत्स्थितिप
दं साधु यत्र शंका न विद्यते॥१०॥ यतःस्थितिं नायाति चित्तं अतः पृच्छामीत्यध्याहारः। अत्र छं परमार्थस्व
रूपं। अनायासं निर्दुःखं। अनायासे देहदुःखगतत्वममिति। गतत्वमत्वे हेतुरनुपाधीति। उपाधिर्मनः म
नो हि सर्वभ्रांतिमूलं। तथा च श्रुतौ वक्ष्यति च। आदो मनस्तदनु बंधविमोक्षदृष्टी पश्चात्प्रपंचरस्व
नात्मुवनानिधानेति। साधु शोभनमानंदरूपमित्यर्थः। यत्र पदे पुनर्दुःखशंका न विद्यते तदित्तिसं

अं॥
२७

यथाजानासीत्यादिग्रंथसंदर्भः स्पष्टार्थः ॥८

वासना २

बंधः ॥७॥ चित्तविश्रांतिस्थानं दृष्ट्वा चित्तविक्षेपे दुःखसंस्पर्शोपायं पृच्छति कथं वेति। कथं धीरवर्याग्नौ
पतत्पतापि न दह्यते। पावके पारदे नैव रसे रसे न रसज्ञालिना ॥७१॥ धीरवर्येति संबोधनं दारुणाग्निं दर्शयितुं
वासनारसज्ञालिनेति संबोधनं विशेषणी रस्यते इति रसः आज्यादिः। वासनैव रसस्तेन ज्वालितशोकं तेषु
रूप इति। तथा तेनाग्नौ संसाराख्ये पतताऽपि पुरुषेण संसाराग्न्यर्चिभिः कथं न दह्यते केनोपायेन न दह्य
ते। पारदारसः दारः कान्ता अथ च पल्लोरसः सूतश्च पारद इत्यमरः। रसे न रसज्ञालिनेति पाठे रसेनेति पार
दाक्षार्थ कथनं। पारदोऽर्द्धद्रुतिः सिद्धिः संसारे निर्व्यापारतया अवस्थानमेव दाहोपाय इत्यत आह यस्मा
दिति। यस्मात्किल महाबालोऽव्यवहारक्रियां विना। नास्ति तिर्दग्धसंसारे विनांबुजलेनाविव ॥७२॥ अंबुस्प
र्शं विना समुद्रमध्ये स्थितिर्यथा न संभवति तद्वदित्यर्थः स्पष्टमन्यत्। श्रीराम उवाच। यथा जानासि भग
वन् तथा मोहनिवृत्तये। ब्रूहि मे साधवो येन नूनं निर्दुःखतां गताः ॥७३॥ अथवा तादृशी युक्तिर्यदि ब्रह्मन्न वि
द्यते। न वक्ति ममेवाकोपि हि द्वेगमानाम पिस्फुटं ॥७४॥ स्वयं चैव चनाप्नोमि तां विश्रांतिमनुत्तमां। न द्रहं त्यक्त
सर्वेहो निरहंकारतां गतः ॥७५॥ न भोक्ष्ये न पिबाम्यंभो नांतःपरिदधेंऽबरं। करोमि नाहं व्यापारं स्नान दाना

न४

53

सनादिकं॥७६॥ नचतिष्ठामिकार्येषु संपश्यापद्दशास्वयानकिं विदसिवांछामिदेहत्यागाहते मुने॥७७॥ केव
लंचिरातारांकं निर्ममोगतमत्सरः मौनमेवावतिष्ठामि लिपि कर्मस्विवार्पितः॥७८॥ श्रीवाल्मीकिरुवाच॥ इत्यु
क्त्वान मलक्ष्मीनकरांतिरामोरामोमहत्तमविवेकविकासिचेताः तूष्णींबभूव घुरतोमहतांघनानांकेका
रवश्रमवशादिवनीलकंठः॥७९॥ ॥७॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्योत्तमसुखपूज्यपादशि
ष्यश्रीमदात्मसुखकृतौवासिष्ठचंद्रिकायांवैराग्यप्रकरणजगद्दोषप्रकाशकोनामद्वितीयः सर्गः॥ ॥७॥
अतीतग्रंथसंदर्भेणनित्यानित्यविवेकतोवैराग्यंप्रतिपादितं। तस्यविद्वज्जनमनोहरत्वंखेचरदुर्लभत्वा
त्स्वांस्कृत्यर्थवदत्येवमित्यादिश्रुतिश्रुतिरसायनमित्यंतग्रंथसंदर्भः स्पष्टार्थः। तत्रकानिचित्पदानि
विविच्यंते॥ वाल्मीकिरुवाच॥ वदत्येवंमहामोहविनिहंतिकरंवचः। रामोराजीवपत्राक्षोतस्मिन्राजकुमा
रके॥१॥ स्पष्टं॥७॥ सर्वेबभूवुस्तत्रस्था विस्मयोत्फुल्ललोचनाः। भिन्नांबरादेहरुहे गिरःश्रोतुमिवोद्धुरैः॥२॥
देहरुहैः रोमभिः उद्धुरैरुन्मुखैः शिष्टसमानं॥७॥ अथतूष्णींस्थितवतिरामेराजीवलोचनेसाधुवादगिरासार्द्ध

श्री
३०

54

सिद्धसार्थसमीरिता ॥३॥ विनानकसमाव्योम्नः पौष्पी वृष्टिः पपात ह । तदुक्तं तस्य चतुर्गागाछां तेऽक्षुमवर्षणे ॥४
इमान्सिद्धगणालापानृश्रुत्वा कुतुकसंभागताः । आकल्पं सिद्धिसेना सुलभमङ्गिरन्तितो गिरिं ॥५॥ आद्यपद्मि
दमस्मानिः कृतं कृतिरसायनं । सार्धत्रयमेतत्स्पष्टं ॥७॥ वीवरोगोक्तिः सार्थविषया श्रोतृसंघः फलतीत्य
त्तिशायेणाहतपै [illegible] मिति तु पत्रामास्तन्तसुंदरमादरादधिगतो न मता पर्दमेषय ३ । कथितवानुवितं
रघुनंदनः सपदितेनवयं धतिब्रोधिता ॥ ध्यातन्नमताया: पदस्थानं परमपुरुषार्थः । अधिगमं प्राप्तं न मता
पदं येन वक्सातन्नथा । ज्ञानार्थिनागंतव्याः संतः सद्भिश्च सम्यक्रूपरिग्राह्यस्तेन च सर्वानुकूल्येन तत्र वर्ति
व्यमिति प्रतिपादनार्थः । त्रिष्टसमानं ॥७॥ पावनस्येत्यादि रितिनादेनेत्यंतः आक्रनोग्रंथसमूहः स्पष्टार्थः
कविकिंचिद्व्याख्यायते । वाल्मीकिरुवाच । पावनस्यास्य वचसः श्रोक्तः स्यरघुकेतुना । निर्णयं श्रोतुमिच्छा
मि चिंतं वक्ष्यमाणं महर्षिभिः ॥७॥ रघुकेतुना रथस्य केतुवद्रघूणां अलंकारेण । स्पष्टमन्यत् ॥७॥ इत्यु
क्त्वा सा समस्तेव व्योमावासनिवासिनी । तां पपात सभां तत्र दिव्या मुनिपरंपरा ॥८॥ स्पष्टं ॥७॥ अथास्यां सि

हसेनायांपतंत्स्यांनत्तसोरसां॥ तत्रस्थो मुनिसंपूर्णानदादाशरथी सभा॥ ४॥ रसांत्वमिंमूर्धमिरत्नलानं
नारसाविश्वन्तरास्थिरेत्यमरः॥ ४॥ वसिष्ठविश्वामित्रौ नानूजयामासतुः कृपा॥ वसिष्ठविश्वामित्रौ तेन
जयामासतुरादरात्॥ १०॥ सर्वादिरेणसिद्धौघानूजयामासतत्पतिः॥ सिद्धौघोस्तपतिस्वैव कौशलभ्रमवा
र्तया॥ ११॥ ववौसिः पुष्पवर्षेण साधुवादेनवासितः॥ रामं ते पूजयामासुः पुरः अणनमास्थितं॥ १२॥ मुनयऊ
चुः॥ अहोबत कुमारेण कल्याणगुणशालिनी॥ वामुक्ता परमोदारा वैराग्यरसगर्भिणी॥ १३॥ श्लोकचतु
ष्टयमेतत्स्पष्टं॥ ४॥ अस्मिन्नुद्दामदौरात्म्यदैवनिर्माणनिर्मिते॥ छिद्रेजादग्धसंसारसारो घतां तदुर्लभः॥
॥ १४॥ उद्दामदौरात्म्य आसादे च निर्माणनिर्मितश्चेति तथोक्तस्तस्मिन्॥ संसारो हि निरंकुशो नदौरात्म्येन
निरंकुशो भवति॥ अमानुषव्यापारनिमिश्च अदैवनिर्माणनिर्मितइत्यनेनानिर्वाच्यत्वंस्तविते त्रिष्टं
समानो॥ ४॥ सकललोकचमत्कृतिकारिणोप्यस्तिमतं यदि राघवचेतसः फलति नो तदिमे वयमवंदि
स्फुटनरंमुनयो हतबुद्धयः॥ १५॥ स्पष्टं॥ इति नादेनेत्यादयः व्याकरणसमाप्त्यर्थाः स्पष्टार्थाः॥ तेषुक

श्री ४॥
२४

निश्चितपदानि विविच्यंते । इति नादेन महता वचस्यक्ते सभाजनैः । राममग्रगतं प्रीत्या विश्वामित्रोऽभ्यभाषत ॥१७॥
न राघव तवास्त्यन्यज्ज्ञेयं ज्ञानवतां वर । स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवानसि ॥छ॥ मवेगव्यासपुत्रस्य शु-
कस्येव मतिस्तव । विश्रांतिमात्रमेवांतर्ज्ञातज्ञेयेप्यपेक्षते ॥१८॥ त्रयमेतत्स्पष्टं ॥छ॥ श्रीराम उवाच । भगवद्व्या-
सपुत्रस्य शुकस्य भगवन्कथं । ज्ञेयेप्यादौ न विश्रांतं विश्रांतेन च धिया ज्ञानः ॥१९॥ ज्ञेयेपीत्यपिशब्दो विरोधे
सर्वक्लेशरहिते प्रमाणव्यापाराभागे च स्वतः प्रकाशमानपरमानंदस्वरूपेपि धिया । न विश्रांतमिति वि-
रुद्धं ॥छ॥ विश्वामित्र उवाच । आत्मोदंतसमं राम वर्ण्यमानमिदं मया । शृणु व्यासात्मजोदंतं जन्मनामंत-
कारणं ॥२०॥ उदंतो वृत्तांतः । वार्ता प्रवृत्तिर्वृत्तांत उदंतः स्यादथाह्वयः । इत्यमरः । इतरत्समानं ॥छ॥ तस्य चिंत-
यतो लोकयात्रामेवमिमां हृदि तत्त्वेव किल सद्बुद्धे विवेकमुदस्तदयं ॥२१॥ तेनासौ स्वविवेकेन स्वयमेव म-
हामनाः । विचार्य सुचिरं चारु यत्सत्यं तदवाप्तवान् ॥२२॥ स्वयं ज्ञाते पदे वस्तुन्यविश्रांतमनाः स्थितः । इदं
वस्त्विति विश्वासं नासावात्मन्युपाययौ ॥२३॥ त्रयमेतत्स्पष्टं ॥छ॥ केवलं विररामास्य चेतो विगतचापलं ।
भोगेभ्यो भूरिभंगेभ्यो धाराभ्य इव चातकः ॥२४॥ चातकोभ्रमिस्थोदकपानविमुखः पक्षिविशेषः । धा

राज्योर्वर्षधारात्यये ॥१६॥ यातकस्त्वस्य नंतरं यथा वर्षधारात्ययः उपरमे तस्मिंस्तथेत्यर्थः ॥१७॥ एकदा सोमलप्र-
ज्ञो मेरावेकांतसुस्थितं । पप्रच्छ पितरं भक्त्या कृष्णद्वैपायनं मुनिं ॥२५॥ संसाराडंबरमिदं कथमभ्युत्थितं मु-
ने । कथं च प्रशमं याति कियत्कस्य कदेति वा ॥२६॥ इति पृष्टेन मुनिना व्यासेनाखिलमात्मजः । यथावदमलं
प्रोक्तं वक्तव्यं विदितात्मना ॥२७॥ अज्ञाशिषं सर्वमिदं तं हमित्यथ तत्पितुः । स शुकः शुभया बुद्ध्या न वाक्यं
बहुमन्यत ॥२८॥ व्यासोपि भगवान्बुद्ध्वा पुत्राभिप्रायमीदृशं । प्रत्युवाच पुनः पुत्रं नाहं जानामि तत्वतः
॥२९॥ जनको नाम भूपालो विद्यते वसुधातले । यथावद्वेत्त्यसौ वेद्यं तस्मात्सर्वमवाप्स्यसि ॥३०॥ पित्रे-
त्युक्तः शुकः प्रायात्सुमेरोर्वसुधातलं । विदेहनगरीं प्राप जनकेनाभिपालितां ॥३१॥ आवेदितोसौ या-
ष्टीकैर्जनकाय महात्मने । द्वारि व्याससुतो राजन् शुकोत्र स्थितवानिति ॥३२॥ जिज्ञासार्थं शुकस्यासावास्ता-
मेवेत्यवज्ञया । उक्त्वा बभूव जनकस्तूष्णीं सप्त दिनान्यथ ॥३३॥ नवैते स्पष्टार्थाः ॥ ततः प्रवेशयामास ज-
नकः शुकमंगणे । तत्राहानि स सप्तैव तथैवावसदुन्मनाः ॥३४॥ उन्मनाः जनकदर्शनोत्कंठः । समानमि-
तरत् ॥ ततः प्रवेशयामास जनकोंतःपुरे शुकं । राजा न दृश्यते तावदिति सप्त दिनानि तं ॥३५॥ ततोन्मदाभिः

अ॰ १॥
४०

कांतास्तैः स्तैजिनैर्भोगसंचयैः ॥ जनको लालयामास शुकं शशिनिभाननं ॥३५॥ स्पष्टं ॥३५॥ ते भोगास्तानि दुः
खानि व्यासपुत्रस्य तन्मनः ॥ नाजह्रुर्मंदपवनो बद्धपीठमिवाचलं ॥३७॥ बद्धपीठं बद्धाधिष्ठानं ॥३७॥ केवलं सु
समः स्वच्छो मौनी मुदितमानसः ॥ संपूर्ण इव शीतांशुरतिष्ठदमलः शुकः ॥३८॥ परिज्ञातस्वभावं तं शुकं स ज
नको नृपः ॥३८॥ आनीय मुदितात्मानमवलोक्य ननाम ह ॥३९॥ स्पष्टं ॥३९॥ निःशेषितजगत्कार्यं प्राप्ताखि
लमनोरथ ॥ किमीप्सितं तवेत्याशु कृतस्वागतमाह तं ॥४०॥ निःशेषितजगत्कार्य इति जगति श्रेयसे यानि का
र्याणि संति तानि निःशेषितानि अनवशेषितानि येन स तथा ॥ निरवशेषितसर्वकार्य इति वा ॥ स्पष्टमन्यत्
शुक उवाच ॥ संसाराडंबरमिदं कथमभ्युत्थितं गुरो ॥ कथं प्रशममायाति यथावत्कथयाशु मे ॥४१॥ संसा
राडंबरं संसारसंरंभः ॥४१॥ विश्वामित्र उवाच ॥ जनकेनेति पृष्टेन शुकस्य कथितं तदा ॥ तदेव यत्पुरा प्रोक्तं त
स्य पित्रा महात्मना ॥४२॥ शुकः ॥ स्वयमेव मया पूर्वमेतज्ज्ञातं विवेकतः ॥ एतदेव च पृष्टेन पित्रा मे समुदा
हृतं ॥४३॥ भवताप्येष एवार्थः कथितो वाग्विदां वर ॥ एष एव च वाक्यार्थः शास्त्रेषु परिदृश्यते ॥४४॥ यथाय

स्वविकल्पोत्थः स्वविकल्पपरिक्षयात् ॥ क्षीयते दग्धसंसारो निःसार इति निश्चयः ॥४४॥ उपाय किमेतन्महाबाहो
सत्यं शुद्धिममावलं । यतो विश्रांतिमाप्नोमि चेतसा धुमता जगत् ॥४५॥ जनकः ॥ नातः परतरः कश्चिन्निश्चयो
स्त्यपरो मुने । स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतं ॥४६॥ एकमेतत्स्पष्टं ॥ ७ ॥ अव्यवच्छिन्नचिदात्मैकः पुमा
नस्तीह नेतरत् ॥ स्वसंकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते ॥४७॥ व्युच्छिन्नो विनाशी कूटस्थो नित्यः सर्व
सो चिदात्मा चेतितथा ॥ यतो द्वितीयोप्यात्मा सद्वितीयतया स्वसंकल्पवशाद्बद्धो भवति । तथा चोक्तं सु
रेश्वराचार्यैः ॥ चलतासि निवेशेन स्वात्मानं वेष्टयत्यसौ ॥ असत्यपि द्वितीयेर्थे सोमनामर्पितायथेति ॥
निःसंकल्पश्च मुच्यते ॥ तेन त्वया स्फुटं ज्ञातं ज्ञेयं यस्य महात्मनः ॥ भोगेभ्यो विरत्तिर्याता तृष्णया वास
कलादिह ॥४८॥ प्राप्तं प्राप्तव्यमखिलं भवता सर्वचेतसा ॥ न द्वन्द्वे पतसि ब्रह्मन् मुक्तवत्त्वां तिष्ठतत्त्वं ॥४९॥ स्पष्टं
अनुशिष्टः स इत्येवं जनकेन महात्मना ॥ विसस्मार अष्टावक्रस्तूष्णीं स्वस्थे परमवस्तुनि ॥५०॥ स्वस्थे ज्ञानस्वा
त्मा स्वस्मिन् आतिविंबकल्पे जीवे अधिष्ठानतया स्थितस्तस्मिन् ॥ शेषं स्पष्टं ॥ ७ ॥ वीतशोक ज्यायासो नि

श्री ॥ ७

कलना ४

रीरुः छिन्नसंशयैरौज्जगाम शिखरं मेरोः समाध्यर्थमनिंदितः ॥५२॥ तत्र वर्षसहस्राणि निर्विकल्पसमाधि
ना। द्वा स्थित्वा रागामासावात्मन्यस्तहृदीपवरः ॥५३॥ स्पष्टं ॥ ७ ॥ व्यपगतकलनाकलंकशुद्धः स्वयमम
लात्मनि पावने पदेसौ। सलिलकण इवांबुधौ महात्मा विगलितवासनमेकतां जगाम ॥५४॥ कल
नासंकल्पः सैव कलंकः अपवादः। कलंकोंऽकापवादयोरित्यमरः। व्यपगतः कलंको यस्मात्स तथा। स चा
सौ शुद्धश्चेति व्यपगतकलनाकलंकेति। मूलाज्ञाननिवृत्तिरुक्ता। शुद्ध इति। मूलाज्ञाननिवृत्तिर्ब्रह्माद्यना
द्यागंतुकमलदपरहितमित्याह अमलात्मनि पावन इति ॥ ७ ॥ विश्वामित्रवत्वात्स्य व्यासतत्त्वज्ञस्य
मलमात्रापमार्जनं। यथो पद्युक्तं ते राम नावदे वोपपद्युज्यते ॥५५॥ स्पष्टं ॥ ७ ॥ ज्ञातज्ञेयस्य मनसो नूनमे
तद्धि लक्षणं। न स्वंदते समग्राणि भोगवृंदानि यत्नुनः ॥५६॥ समग्राण्यपि भोगवृंदानि पुनर्न स्वंदते न रोचं
न इति। यत एतज्ज्ञातज्ञेयस्य मनसो लक्षणं हि नूनं निश्चयः। नूनं तर्केऽर्थनिश्चये इत्यमरः ॥ ७ ॥ भोगस्तावन
यानि यो बंधो दार्ढ्यमवस्कंजः। तयो परांतया याति बंधो जगति तानवं ॥५७॥ वासनातानवं राम मोक्ष इत्युच्य

तेबुधैः।पदार्थवासनादार्ढ्यं बंध इत्यभिधीयते।५८॥ श्लोकद्वयमेतत्स्पष्टं।७॥ कीर्त्तिलाभादिना निमित्तेन
यस्मै लोभान्नरो वै ते स जीवन्मुक्तो मानुषर इत्याहुर्यशः इति यशः प्रभृतिना यस्मै हेतुनैव विना पुनः। लोभ
इव नरो वै ते स जीवन्मुक्त उच्यते।५९॥ यशः प्रभृति नाहेतुनाविनैवेति। रामो यदेतज्ज्ञा नातितत्वरित्वस्ये वस
न्मुखात्। आकर्ण्य चित्तं विश्रांतिमाप्नोत्येव मुनीश्वराः।६०॥ अत्रास्य चित्तविश्रांत्यै राघवस्य महात्मनः। युक्तिं
कथयतु श्रीमान् वसिष्ठो भगवानयं।६१॥ रघूणामेष सर्वेषां प्रभुः कुलगुरुः सदा। सर्वज्ञः सर्वसाक्षी च त्रि
कालामलदर्शनः।६२॥ वसिष्ठ भगवन्पूर्वं किल स्मरसि यत्स्वयं। आवयोर्वैरशांत्यर्थं श्रेयसे च महाधियां।
।६३॥ उपदिष्टं भवे गं ताज्ञानं पद्मभुवा प्रभुः॥ तदेवोपदिशाद्य त्वं रामायांतेनिवासिने।६४॥ वैरेते स्पष्टा उ
र्थः। आशिष्याया विरक्ताय यत्किंचिदुपदिश्यते। तत्सर्वं यात्यपवित्रत्वं गोक्षीरं श्वदृताविव।६५॥ इति श्लोकद्वयं
इ स्फुके गाधिपुत्रेण व्यास नारद पूर्वकाः। मुनयस्तेतमेवार्थं साधु साधित्यपूजयन्।६६॥ अथोवाच म
हातेजा राज्ञः पार्श्वे व्यवस्थितो। ब्रह्मेव ब्रह्मणः पुत्रो वसिष्ठो भगवान्मुनिः।६७॥ श्लोकद्वयमेतत्स्पष्टं।७॥ ॥व

श्री।
४२

सर्गः ३

मुनेयदादिशसि मेतदविघ्नं करोम्यहं॥ कःसमर्थः समर्थोपि सतां लंघयितुं वचः॥६८॥ आदिशसि आज्ञापयसि॥ शिष्टसमानं॥७॥ स्मरास्यखंडितं सर्वं संसारभ्रमशांतये॥ निषधो ज्ञो ब्रशो क्तां यज्ञानं पमयो निना॥६९॥ वाल्मीकि रुवाच॥ इति निगदितवान सो महात्मा परिकरबंधगृहीतवक्त्रतेजाः॥ अकथयदिदं दमज्ञता परशांत्ये परमपदैक निबोधनं वसिष्ठः॥७०॥ परिकरबंधेति॥ अतिवदनोपयोगि नो परिकरास्तेषां बंधेनगृहीतं स्वीकृतं वक्त्रतेजो येन स तथोक्तः॥ ॥७॥ ॥ इति श्रीवाल्मीकीये रामायणे महाकाव्ये श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमन्मुखहंस्यपादशिष्य श्रीमदानंदबोधकृते वासिष्ठविवरणे मोक्षोपाये वैराग्यप्रकरणे तृतीयोध्यायः॥ ॥७॥ ॥ वैराग्यप्रकरणं संपूर्णं॥ ॥७॥ ॥ श्रीरामार्पणमस्तु॥ ॥७॥ ॥ ॥ ॥७॥ ॥ अतःपरं मुमुक्षुव्यवहारप्रकरणं भविष्यति॥ २॥ ॥७॥ पूर्वप्रकरणेन नित्यानित्यवस्तुविवेकतो वैराग्यं रामाद्यंकुरबीजं मुमुक्षुफलपर्यवसायिप्राधान्येन प्रतिपादितं इदानीं मुमुक्षु व्यवहारं शमादीति कर्तव्यता मनननिदिध्यासनांगकश्रवणलक्षणं तत्प्रकरणेन प्रतिपाद्यते॥ प्रसंगागतं च किं चिकिंचिद तत्राद्यश्लोकेन दैवाधीनं सर्वं पौरुषं व्यर्थं अतो विचारविषयप्रयत्नपरता नाश्रयणीयेति इ

इतरजनशंकागमं निमित्तीकृत्य परिहरति सबावान्वसिष्ठः सर्वेदेति। वसिष्ठ उवाच। सर्वदा सर्वमेव
हसंसारे रघुनंदन। सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते॥१॥ पौरुषं गुरुशास्त्रकारणयोगादित्यर्थः।
एवशब्दस्य समाप्यत इत्यनेनापि संबंधः। पौरुषात्सर्वं समवाप्यते चेत् अशास्त्रीयादपि पौरुषात्प
रमार्थप्राप्तिः स्यात् तत्तदपि मुमुक्षुणानुष्ठेयं स्यादित्याशंक्याह उच्छास्त्रमिति। उच्छास्त्रं शास्त्रितं चेति
द्विविधं पौरुषं स्मृतं। तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितं॥२॥ इस्पष्टं॥ परमार्थाय शास्त्रितमित्य
नसप्रपंचयति। आबाल्यादिति। आबाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः। गुणैः पुरुषयत्नेन स
र्थः संप्राप्यते हितः॥३॥ स्पष्टं॥ श्रीराम उवाच॥ वासनापारतंत्र्यात्स्वतंत्रप्रवृत्त्यास्वार्थः संप्राप्तुं न
शक्यत इत्याक्षिपति प्राक्तनमिति। श्रीराम उवाच। प्राक्तनं वासनाजालं नियोजयति मां यथा। मुने त
थैव तिष्ठामि कृपणः किं करोम्यहं॥४॥ परिहरत्यतइति। वसिष्ठ उवाच। अत एव हि हे राम श्रेयः प्राप्नोषि
शाश्वतं। स्वयत्नोपनीतेन पौरुषेणैव नान्यथा॥५॥ एवमपि तर्हि प्राक्तनवासनाजाले नियोज्यत्वादेवस्व

श्री॥ ४३

समप

प्रयत्नोपनीयते न पौरुषेणेव पुरुषव्यापारेणैव श्रेयः प्राप्नोषि। अयमभिप्रायः पूर्ववासनानां तीव्र
वायुवत् पुरुषं प्रेरयति। किं छिद्रोपहारमुखेन स्वान्तं प्रयच्छति। तथा सति स्वतंत्रप्रवृत्त्या स्वार्थः प्राप्तुं न
शक्यत इति॥ ७॥ गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचरेत्। एकं विद्धि एवं श्रोतव्यस्य तु ज्ञानशास्त्रस्य वि
शिष्टसंप्रदायमूलत्वं परमपुरुषार्थकरत्वं चाह अपुनरित्यादि श्लोकत्रयेण। अपुनर्ग्रहणायांतस्त्य
क्त्वा संसारभावनां। संपूर्णोऽसि संतोषी आदायोदारया धिया॥ ७॥ शास्त्रपूर्वापरवाक्यार्थविचारविषयहृतं म
नः समरसं कृत्वा सानुसंधानमात्मनि॥ ७॥ श्रीरामगुरुणा प्रोक्तं ब्रह्मणा परमेष्ठिना। सर्वदुःखक्षयकरं पर
माश्वासनं धियः॥ ७॥ भावना वासना। उदारया महत्या उत्तमया इत्यर्थः। शासनो यः पूर्वापरवाक्यार्थविचा
रः स एव विषयस्तस्मिन्नाहृतं स्वप्रवृत्तिकविरतं तत्र स्वावसाधारणो यो पूर्वापरवाक्यार्थेति यो विचार
विषयाहृतमित्यर्थः। मनो विचारविषयाहृतं समरसमात्मनि स्वानुबंधनं च कृत्वा शृण्विन्त्यन्वयः। शिष्टस
मानी॥ ७॥ श्रीरामगुरुवाक्येनोक्तं कारणेनेदं ब्रह्मन् पूर्वं स्वयंभुवा। कथं चैव भवता ज्ञातं एतत्कथय मे प्रभो॥
॥ व्याख्या स्पष्टे॥ ७॥ ब्रह्मविद्यासंप्रदायकर्तृ ब्रह्मणो महत्त्वख्यापनाय परमकारणोत्पन्नत्व जगत्कर्तृत्वे दर्शयन्

यज्ज्ञात्वाहं सुखी स्थितः इत्यैतेन ग्रंथजातेन ।

केनेक्तमित्यादि प्रश्नद्वयस्योत्तरे आह अस्त्यनंतेत्यादिनौ वशिष्ठ उवाच । अस्त्यनंतविलासात्मा सर्वगः सर्वसंश्रयः । चिदाकाशो विनाशात्मा प्रदीपः सर्ववस्तुषु ॥१०॥ अनंतविलासात्मा अनंतकार्यस्वरूपस्ततः सर्ववस्तुषु विषयेषु प्रदीपो भासकः शिष्टसमानो ॥ स्पंदास्पंदसमाकारात्ततो विष्णुरजायत । तस्यापि हृदयांभोजात्परमेष्ठी व्यजायत ॥११॥ स्पंदो जगद्रूपेण परिणामः । अस्पंदस्तद्विपर्ययः । यौ तु ससमकारा समस्वरूपाः स्पष्टमन्यत् ॥ सोऽसृजत् सकलं सर्गं विकल्पोद्यं यथा मनः । एकस्मिन्सा रतेव यं नानाव्यसनसंकुलं ॥१२॥ सृज्यत इति सर्गो जगत् । सृज्यस्य सत्यत्वशंकां वारयन्नाह विकल्पोद्यमिति । विकल्पोद्यो मनोरथसदृशः ॥ जनस्यैतस्य दुःखं च दृष्ट्वा सकललोककृत् । जगाम करुणामीशः ॥ दुःखत्रितायथा ॥१३॥ कष्टं तेषां हतानां दुःखस्यांतो हतात्तु षां स्यादिति क्षणमेकाग्रः चिंतयामास सत्तपः ॥१४॥ तपोदानं तपस्तीर्थं नासंते दुःखशांतये । तत्ताव दुःखमोक्षार्थं ज्ञानं प्रकथयाम्यहं ॥१५॥ इति संचिंत्य संगवान्ब्रह्मा कमलसंस्थितः । मनसा परिसंकल्प्य मामुत्पादितवानिमं ॥१६॥ कमंडलुधरो नाथः सकर्मं चतुष्टयमेतस्य ॥१७॥

बौधा ४८

66

दा ७

स्पष्टं॥१८

उल्लुनामया। साक्रमाल्नः साक्रमात्वं सप्रपाम्यालिवादितः॥१७॥ साक्रमाल्नमिति क्रिया विशेषणं॥ शेषं
स्पष्टं॥१८॥ एहि पुत्रेति मामुक्त्वा सस्वाङ्कस्योत्तरे दले। मां निवेश्य महाबाहो प्रोवाच भगवानजः॥१९॥ पुत्र त्वं मा
वेते पुत्र चेतो वानरवं चलं। अज्ञानमस्या विशुद्ध बाष्पः सुहृदर्पणं यथा॥१९॥ बाष्पो च मुखोत्पन्न ऊष्मा॥ छाद्र
तितेनासुशापः सन्न विचारसमनंतरं। अहं विस्मृतवान्सर्वं स्वस्वरूपममलं किल॥२०॥ यथाहं दीनता मेत्य
स्थितो संवृतया धिया। दुःखशोकातिसंतप्तो जातो जन इवाधमः॥२१॥ अथ त्वं धात्समां नाथः पुत्र किं दुः
खवानसि। दुःखोपघातं मां पृच्छ सुखी नित्यं भविष्यसि॥२२॥ ततः पृष्टः स भगवान् मया संसारभञ्जं। क
थं नाथ मया दुःखमयः संसार आगतः॥२३॥ कथं वक्षीय ते नाथ तत्तस्तेन महात्मना। तज्ज्ञानं स्वबऊप्रोक्तं
ज्ञात्वाहं सुखी स्थितः॥२४॥ संप्रदायतो लब्धस्यैव ज्ञानस्य मुक्तिदत्वं नान्यस्येति दर्शयितुं ब्रह्मविदो लोका
नुग्रहमुक्त्वा ऽन्यकर्तव्यं नास्तीति ज्ञापयितुं पुरुषार्थसिद्धेर्नारतवर्षस्यान्यस्माद्विशिष्टतां च दर्शयितुं
तो विदितवेद्यमित्यादयः कर्तव्यमस्तीत्यतः प्राक्तनाग्रथाः स्पष्टार्थाः॥ तत्तो विदितवेद्यं मां निजायां
तो स्थितो सभगवा भवजगत्कर्ता विक्ता सकलकारणं॥२५॥ शापनाशप्रदं नीत्वा पृच्छकः स्वं मया कृतः॥२६॥

ति७

स्यज्ञानसारस्य समस्तजनसिद्धये ॥२६॥ इदानीं शांतज्ञापरस्त्वं बोधं परमुपागतः । गच्छेदानीं महीपृष्ठे जंबूद्वी
पांतरस्थिते ॥२७॥ साधोत्तार तव वर्षैर्वर्षाणि ग्रहहेतुना । तात्र क्रियापौंडुकांड परावर्ण्या अमरतास्त्वया ॥२८॥
उपदेश्याः क्रियाकांडाः क्रमेण क्रमशालिना । विरक्तचित्ताश्च तथा महाप्राज्ञा विचारिणः ॥२९॥ उपदेश्या
स्त्वया साधो ज्ञानेनानंददायिना ॥३०॥ इति तेन नियुक्तोऽहं पित्रा कमलजन्मना । इह सा भो वत्स तिष्ठामि
यावद्भूतपरंपरा ॥३१॥ कल्पपर्यंतं कर्मैव समावस्थानं गुर्वाज्ञां पालयतस्तव लोकानुग्रहार्थमेव केव
लं न तवति किंतु कृत्यशेषं वक्तुं वेति आशंक्याह कर्तव्यमिति । कर्तव्यमस्ति न ममेह हि किंचिदेवस्था
तव्यमित्यं [illegible]मना [illegible] विसंस्थितोऽस्मि । संशांतया संसततस्वधियैव वृत्त्या कार्यं करोमि न च किंचिदहं
करोमि ॥३२॥ अतिक्रांतमनाः जितमनाः इत्यर्थः । अथवा ऽतिमनाः अकष्टमनाः । अविमना इति केचित्
तत्र विमना दुर्मनाः स न भवतीत्यविमनाः । अज्ञवन्नोपि कार्ये प्रवृत्तिदर्शनात् कथं कृतकृत्यत्वं तत्रा
ह समेति । संशांतया इष्टानिष्टप्राप्तौ हर्षविषादरहितया संततं स्वधाधीर्यस्याः वृत्तेस्तया [illegible] सोऽवर्तते
न परदृष्ट्या जातिव्रासिकदृष्ट्या वा कर्तृत्वमुक्त्वा पारमार्थिकदृष्ट्या तदभावमाह न भवेति । धियः सुम

ग्रो॰ ४५

कार्य२ वा३

वंसत्यद्वैताविषयत्वात्तथान्योक्तमाचार्यैः। सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः।
तथापि कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चय इति। अहमित्यात्मधीर्यावन्ममेत्या
त्मीयधीरपि। अर्थस्तन्ये यदायस्य स आत्मज्ञानवेत्तर इति च। तथा च भगवद्वचनं। यस्यां जाग्रति तत्ता
निसा निशा पश्यतो मुनेरिति। शिष्टं समानं।७। एवं केनोक्तमित्यादि प्रश्नयोरुत्तरे आख्याय प्रसंग
गात्तेव किं विडत्कां शृणु राम मया प्रोक्तमिति वचनादभिमुखीत्वनाय रामाय ज्ञानं सोपायं विविदिषु:
विशिष्टपृच्छकवक्तृकआवयोः संवादोऽवश्यं फलाय कल्पत इति दर्शयितुं पृच्छकवक्तारौ लक्षय
ति। अज्ञातेत्यादि श्लोकद्वयेन। वसिष्ठ उवाच। अज्ञातात्तज्ज्ञते सर्वं वक्तुं निर्णीय कार्यतः। यं वदेत्ति नरः
प्रश्नं पृच्छकः स महामतिः॥३२॥ पूर्वापरसमाधानक्षमबुद्धावनिंदिते। पृष्टं प्राज्ञेन वक्तव्यं नाधमे पशु
धर्मिणि॥३३॥ गुरुतः श्रुतयोः पूर्वापरवाक्यार्थयोरन्वितया कृपेक्षतेतत्समाधाने क्षमा सम्यग्बुद्धिर्य
स्य स तथा तस्मिन्। अत्रैवं नियमः। पूर्वापरसमाधानक्षमबुद्धावेव वक्तव्यं शिष्टानिंदिते एव वक्तव्यं पृष्टमे
व वक्तव्यमिति च। संवादस्य फलव्यज्ञापनाय पृच्छकवक्तृलक्षणे आख्यायादौ गुरूक्तं समाच

मोक्षद्वार इत्यादिति र सिवहृदये दिव्यं तैर्गुंथैः। तत्वस्पष्टार्थः॥ मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्त्तिताः॥
शमो विचारः संतोषश्चतुर्थः साधुसंगमः॥२५॥ एते सेव्याः प्रयत्नेन त्रयो द्वौ वाथवा॥ द्वारमुद्धाटयंत्ये
ते मोक्षे राजगृहे तथा॥२६॥ एकं वा सर्वयत्नेन सर्वमुत्सृज्य संश्रयेत्॥ एकस्मिन्वशगे यांति ते चत्वारो पि व
शं यतः॥२७॥ शास्त्रसुजनसंसर्गपूर्वकैः सतपोदमैः। आदौ संसारमुक्त्यर्थं प्रज्ञामेवाभिवर्धयेत्॥२८
अतिवहया प्रज्ञया किं तत्वे दित्यत आह दुःसहेति। दुःसहा राम संसार विषवेग विषूचिका। योगगारुड
मंत्रेण पावनेन प्रशाम्यति॥२९॥ संसार एव विषवेगविसूचिका विषवेगोत्पन्न विसूचिका तस्य रोगः याः
गो ब्रह्मात्मैक्यविज्ञानं स एव गारुड मंत्रस्तेन। अयमेव योगवाशिष्ठार्थ इति। हेरुद्रासिष्ठगतादेतच्छ्लोकात्
रश्लोकात्रस च योगः सज्जनेन सह हत्वा स्वविचारणा। परमार्थज्ञानमयो यत्नेनैव लभ्यत इत्येवा। तत्यस्माद
वगम्यते॥३०॥ संसाररोगच्छेदकदृढप्रज्ञायै शमादिचतुष्क आत्मानं विचारयेदित्यर्थः। इतदानीं च आत्मानं
विचारयतो निरतिशयदुःखमाह दुरंतेत्यादिना। दुरंतेयं विषैः किलेयं विषमविसूचिका। यदि न विकि
स्यते तन्नितरां नरकनगरनिकरफलानुबंधिनी॥ तदेतत्करोतियुक्ति तासिचो तपानो त्यसन ताडनो। अ

४९

विषयर् अस्यार्थः

निदाहो हिमावसेवनं। अंगारैवकर्त्तनंचंदनचर्चा निरवधिनाराचनिकरनिपातो निदाघविनोदनधा
रागृहसीकरवर्षः शिरःछेदः सुखनिद्रास्वीकरणमाननं निद्राबाधिर्यमहाबुप्रचयैः। विषयाएव विष
म विषूच्विकां विषयविषूच्विकेतिक चित्रं विषयाएवं विषूच्विकेत्यर्थः। न चिकित्स्यते यदि तत्र दिनित रां
तरां नरकाएव नगराणि तेषां निकराः समूहाः तएव फलानि मैः अनुबंधोनुषंगोयस्याः सा नरकनगर नि
करफलानुबंधिनी स्वास्वात न दुःखं करोति। किंतु दुःखं करोतीत्याकांक्षायामाह यत्रेति। य[illegible]स्मिन् विषू
चिकाजनितदुःखशिताना तजिता नां असीनां शातानांपातो गावेषूत्पलताडनं भवति। यत्रे
ति सर्वत्र संबध्यते। यत्र निदाहः शरीरे हिमावसेवनं भवति। अंगारैव कर्तनमवयवच्छेदनं[illegible]नचर्चा
दनलेपनं। नाराचाः सर्वलोहमयाबाणाः निदाघविनोदनधारागृहसीकरवर्षणं निदाघविनोदन
यघर्मविनाशनाय यंत्रप्रेरितजलधारावति गृहे सीकरवर्षणमंबुकणवर्षणं। आननमुद्रा आस्य पि
नमित्यर्थः। उग्रप्रचयोलिहहिः। अयमभिप्रायः। महादुःखहेतवोप्यसिशातपातादयो यस्मिन्सुखहेतवोयमान
विषये विषयसुखहेतुवदाचरंतिततन्निनतिरायदुःखं विषयविषूच्विका करोतीति॥ ॥७॥ ॥७॥

नेणांनिकरःसमूहः
ह हस्तस्य पातः पतनं ४

६।२

यस्मादेवं तस्माद्विषयरोगचिकित्सायां प्रयतितव्यमित्याह तदेवमिमित्ति। तदेवं राम नास्त्रेणाचेहेलयाव्य
वहर्तव्यं। अवश्यमेवं विचारणीयेन एवं चावबोद्धव्यं। यथा किल शास्त्रविचारणाद्बोधो भवतीति स्वानुभ
तेश्च शास्त्रस्य गुरोश्चैवैकवाक्यता। यस्याभ्यासेन तेनाभासततेनावलोक्यते। किंचित्संस्कृतबुद्धीनां क्र
तशास्त्रमितरदं यथा। मौर्ख्यापहं तथा शास्त्रमन्यदस्ति न किंचनावरं शारावहस्तस्य चांडालागारवीथिष्वालि
क्षार्थमटनं नाम न मौर्ख्यहतजीवितं। न धनान्युपकुर्वंति न मित्राणि न बांधवाः। न हस्तपादचलनं न देशां
तरसंगमः। न कायक्लेशवैधुर्यं न तीर्थायतनाश्रयः। केवलं तन्मनोमात्रजयेनासाद्यते पदं। अस्यार्थः। अवहे
लाऽवज्ञा लीहैलावा। का चिकित्सा कर्तव्या विषयरोगनिवृत्तये तत्राह एवमिति। किलशब्दः श्रुतीतिहास
प्रमाणप्रसिद्धिद्योतनार्थः। सकलानर्थनिवृत्तिपरमानंदप्राप्तिकामेन शास्त्रार्थविचारः सम्यक्कर्तव्य इत्यर्थः।
ननु शास्त्रविचारात्सम्यग्ज्ञानविचारद्वारैव श्रेयो भवति। तत्सम्यग्ज्ञानं विचारकारिणां सर्वेषां किमिति न भ
वतीत्यत्राह स्वैति। यस्य गुरूपस्य संततेनाभ्यासेन स्वानुभवत्यादित्रय संवादो भवति। तेन ग्रंथाभासावलोक्यते

सा कीं क्रियते। नान्येन। कस्य शास्त्रार्थस्य विचारः श्रेयोर्थिना कर्तव्य इत्यत आह किंचिदिति। शास्त्रं मौर्ख्यापहमित्युक्तं। मौर्ख्यस्यावश्यहेयत्वमाह वरमिति। शास्त्रार्थविचारवत्सा तत्र धनादिदानमपि ब्रह्मप्राप्त्यावश्यर्थिनोपाय इत्याशंकां निराकरोति धनानीत्यादिना। यथा धनादिकं ब्रह्मप्राप्तिकरं न भवति। एवं विचारोपि न प्राप्तिकरो न भवति। विचारवतामपि बहूनां नप्राप्तिदर्शनादित्याशंक्याह केवलमिति। मनोजयाभावादेव विचारवत्स्व ब्रह्मप्राप्तिर्न दृश्यत इति भावः॥७०॥ मोक्षद्वारे द्वारपाला इति ये पूर्वमुक्ताः यत्करणे पुरुषार्थक्रस्तत्प्रपंच - यितुमारभते मोक्ष इति। मोक्षद्वारे द्वारपालानिमान्शृणु यथाक्रमं। एषामेकतमासक्त्या मोक्षद्वारं प्रवेश्यते॥७१॥ स्पष्टः॥ शांतत्वतावच्छांति फलमानुषंगिकमाह यानीत्यादिना श्लोकत्रयेण तेच स्पष्टार्थाः॥७२॥ यानि दुःखानि या तृष्णा दुःसहा ये दुराधयः। तत्सर्वं शांतचेतस्सु तमोऽर्केष्विव नश्यति॥७२॥ मातरीव परं यांति विषमाणि मृदूनि च। विश्वासमिह भूतानि सर्वाणि शमशालिनि॥७३॥ न रसायनपानेन नैव लक्ष्म्यालिंगनेन वा। तथा सुखमवाप्नोति शमेनांतर्यथा जनः॥७४॥७॥ शांतेः फलमभिधाय स्वरूपमाह श्रुत्वेत्यादिश्लोकद्वयेन। श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा शुभाशुभं। न हृष्यति ग्लायति यः स शांत इति

म५

वा०टी०

कथ्यते॥ उषारकरबिंबाच्छं मनो यस्य निराकुलं॥ मरणोत्सवयुद्धेषु स शांत इति कथ्यते॥५॥ म्लायति हर्षं न कु
र्यं करोति विषीदतीत्यर्थः॥ उषारकरश्चंद्रः॥ ६६ विवेकतो महद्वैराग्यमास्थितस्य भाविनो परिहार्यतां च जानत
उ सः सुखदुःखप्राप्तौ हर्षविषादरहितो भवति स एव राम इत्यर्थः॥ त्रिः सम॥ नो॥ रामस्यानुवर्तिकं प्रत्यों
र माह तपस्विष्विति॥ तपस्विषु बहुज्ञेषु याजकेषु नृपेषु च॥ बलवत्सु गुणाढ्येषु समवाने वराजते॥६॥ रा
रामस्य महाफलं दर्शयन् महानुभावगतेहीनतया तस्यानुष्ठेयतामाह श्रीमिमिति॥ श्रीममृतम [illegible] हार्यमनाय मुत्
परमवलंब्य परं पदं प्रयाताः रघुतनय यथा महानुभावाः क्रममनुपालय सिद्धये तवेमं॥७॥ आहार्यमनाय मुत्
परममृतमवलंब्य देवा अपरं पदं प्रयाताः॥ महानुभावास्त्वन्ये नाहार्यं हर्तुमयोग्यं॥ आर्यमुख्यं विदद् जदिति तं राम
रव्यं परममृतं अवलंब्य तदनुरूपं परमेव पदं यथा प्रयातास्तथा सिद्धये परमपदप्राप्तये तमेव क्रमं रामलक्षणो
पायं अथवा रामविचारध्यानादीनां क्रमं अनुपालयन्तु तिष्ठेत्यर्थः॥ स्पष्टमन्यत्॥७॥ रामादीनां मध्ये रामं वि
विस्तारादाख्याय विचारं प्रपंचयति शास्त्रेत्यादिभिः पंचभिः श्लोकैः॥ शास्त्रावबोधामलया धिया परमह
तत्र प्रथमं विचारं विधत्ते शास्त्रेति॥

श्री॥॥
७८

यथा कर्तव्यः कारणज्ञेन विचारोऽनित्रामात्सूनिः॥६॥ आदावीश्वरार्पितवेदकर्मसिः परमहतया अनंतरं
नेह त्रिशास्त्रावबोधेनामलया॥ कारणज्ञेनेदमस्य कारणमिदं कार्यमिति कारणाद्यसिज्ञेनेत्यर्थः॥ ७॥ वि
चारफलमाह विचारादिति। विचाराज्ज्ञातामेत्य धीः पश्यति परं पदं दीर्घसंसाररोगस्य विचारो हि महौषधं
॥१०॥ स्पष्टं॥ ७॥ विचारस्य स्वरूपं दर्शयन् कर्तव्यतां विशदयति कोऽहमिति। कोऽहं कस्य च संसार इत्यापद्य
पि धीमता। चिंतनीयं प्रयत्नेन सप्रतीकारमात्मना॥११॥ सप्रतीकारमिति क्रियाविशेषणं। चिद्ध अनी
रेणास ह च वर्तते इति सप्रतीकारं आत्मना बुद्ध्या। शिष्टं समानं॥ ७॥ विचारस्तोति अनष्टमिति। अनष्टं मंथव
रेश्च बऊ तेजः स्वजिसि।त। पश्यत्सु पिप्य वदितं विचारश्चारुलोचनं॥१२॥ चारुलोचनबसाधनाय अनष्ट
मित्यादि विशेषणत्रयं। अनष्टं कार्यवन्नष्टं भवतीत्यनष्टं। अजिल्लितं अकुटिलितं अप्रतिहतमित्यर्थः।
विचारस्वरूपं दर्शयति कोऽहमिति। कोऽहं कथमयं दोषः संसाराख्य उपागतः। न्यायेनेति परामर्शो विचार इ
ति कथ्यते॥१३॥ स्पष्टं॥ ७॥ विचारानंतरं क्रमसंतोषं प्रदर्शयति षड्भिः। तत्र श्लोकद्वयेन संतोषस्तोति संतोष इ
त्यादिना। विश्रामशब्देन विश्रांतिर्विवक्षिता। संतोषामृतपानेन तृप्तिमागता इति संबंधः॥ अतिदि प्रायते

अतिविषयदाचरति। अतिक्रम्य विषं अतिविषं॥ संतोषस्वरूपमाह॥ अप्राप्तवांछानुवृत्तः प्राप्तेषु समतां गतः। अदृ-
ष्टखेदाखेदो यः संतुष्टः स इहोच्यते॥ अप्राप्तेति॥ अप्राप्तइष्टे वांछा तां स प्राप्तइष्टे समतां विकाररहिततां सं-
प्राप्तेष्टसंयोगे उत्पन्नानष्टलाभयो हर्षविषादरहिततां प्राप्तः॥ संतोषाभावे ज्ञानानुत्पत्ते रतः संतोषः कु-
र्तव्य इत्याह॥ आशावैवश्यविवशे चित्ते संतोषवर्जिते॥ म्लाने वक्त्रमिवादर्शे न ज्ञानं प्रतिबिंबति॥ आशे-
ति आशावैवश्यविवशे। आशापारवश्येनास्वस्थे इत्यर्थः॥ म्लानशब्देन मालिन्यं लक्ष्यते॥ ३॥ संतोषस्व-
रूपं पुनराह॥ नाभिवांछत्यसंप्राप्तं प्राप्तं भुंक्ते यथाक्रमम्॥ यः सौम्यसमाचारः संतुष्ट इति कथ्यते॥ नेति॥
क्रमः आचारक्रमः तमनतिक्रम्य वर्तनं इति यथाक्रमम्॥ संतोषस्यातिप्रशस्तत्वं दर्शयन्नुपसंहरति॥
समतयेति॥ समतयामतया गुणशालिनां पुरुषनाडिहयः समलंकृतः तममलं प्रणमंति नरोत्तमा अपि
महामुनयो रघुनंदन॥ गुणशालिनां मतया समतया समलंकृत इति संबंधः॥ साधुसंगमं प्रपंचयति॥
विशेषेण सादिचतुर्भिः श्लोकैः। तत्राद्यश्लोकेन साधुसंगमफलं कथ्यते द्वितीयतृतीयाभ्यां स्वरूपं कथ्यते॥
चतुर्थेन साधुश्च रूपकथनपूर्वकं तत्सेवाविधिर्विधीयते॥ स्वरूप्यमावीर्णतामेति संसारचक्रं त्वसंबाध्यते॥ आपत्स्व
विशेषेण महाबाहो संसारोत्तरणे नृणां॥ सर्वत्रोपकरोतीह साधुः साधुसमागमः॥ २

श्री॥ ४९

व३

साधुसंगमं प्रपंचयति विशेषेणेत्यादि लिखुत्तर्लिः श्लोकैः। तत्राद्यश्लोकेन साधुसंगमफलं कथ्यते। द्विती
यतृतीयाभ्यां संस्तूयते। च॰ थुर्थेन साधुस्वरूपकथनपूर्वकं तत्सेवा विधीयते। विशेषेण महाबाहो संसा
रोत्तरणे नृणां। सर्वत्रोपकरोतीह साधुः साधुसमागमः।६९। स्पष्टो।७०। शून्यं संपूर्णतामेति मृत्स्करप्कसव
यते। आपत्संपदिवाभाति विद्वज्जनसमागमे।६८। शून्यं शून्यस्थलं संपूर्णतामाकीर्णतां प्राप्तिसंकुलतां
एतीव इवत्रोहो त्रापि योजनीयः। शिष्टं स्पष्टं।७१। यः स्नातः शीतसितया साधुसंगतिगंगया। किं तस्य दानैः कि
तीर्थैः किं तपोभिः किमध्वरैः।७२। शीता चासौ सिता च तया संसारतापनिवारकत्वात्। सितत्वं शुद्धत्वं स्पष्टमन्य

सर्व७

त्।७३। विच्छिन्नग्रंथयस्तज्ज्ञाः साधवः संमताः। सर्वोपायेन संसेव्यास्ते कृपायाः त्वं बुधो।७०। ग्रंथिरहंकारः
तस्यात्मानात्मग्रंथिरूपत्वात्। ग्रंथिवद्दुर्भेद्यत्वाच्च।७४। स्वचार इति स्पष्टार्थः। स्वचारस्ते विमलापाया त्रव
भेदनौ। येरस्य स्मास्त तीर्णो मोहवारिधिवारिणवात्।७१। मोहवारिसंपूर्णभवार्णवोत्तारकैरेतेरहं विशि
ष्टः किं न यैवेत्यालोचयं तं राममंपत्याहत्वमिति। त्वमेतया रवं हितया गुणलक्ष्या समाश्रितः। मनोमोह
हरं वाक्यं वक्ष्यमाणमिदं शृणु।७२। गुणलक्ष्यालिंगितेन कर्तव्यमाह मन इति। इतः। तत्समाने।।७७।।

77

यो०वा०८

इदंश्रुविस्कपदिता यावक्ष्यमाणज्ञानकथायाः श्रवणफलकथनार्थं मोक्षोपायेत्यादि निर्वृत्यवि
षयोगिरामित्यंतं तत्तत्र ग्रंथसंदर्भः सत्वस्पष्टार्थः। कचित्किंचिद्विविच्यते। मोक्षोपायकथामेतांश्रुण्व
तामरिमर्दन। अनिंतामविबलात्सलरो बोधः प्रवर्तते ।७३। स्पष्टं। लोभमोहादयो दोषास्तानवंयां
त्यलंधियः। मनः प्रसादमायाति शरदीवामलंसरः ।७४। तानवं तनुत्वं। अदैन्यदारिद्र्यदोषाद्यार ह्यो
निर्मितांतराः। न निकृंतंति मर्माणि सन्नाहमिवेषवः ।७५। दैन्यदारिद्र्यएवदोषोतान्त्या माद्याः ह्रद यो हेय
देयविकल्पदश्रितांतराः मर्मत्ने दनायप्रकाशिता वसराः। स सन्नाहे सकंचुकं ।७६। हृदयं नावलुंपंति
लीमाः संस्थितिपीतयः। साम्यं परमुदेत्यंतर्निर्मंदर इवार्णवः ।७६। अवलुंपंति छिंदंति। निःशेषस्य ष्टं ।७७।
समुद्रस्येव गांभीर्यं स्थैर्यं मेरोरिव स्थिरं। अंतः शीतलतावेंदोरिवोदेति विचारिणः ।७८। स्पष्टं। सर्वाश्च
साधुवृत्तानाम विरोधिनि कर्मणि। रमते धीर्यथाप्राप्ते साध्वीवांतःपुराजिरे ।७९। अजिरे अंगणे। स्पष्टम नंतर
सा जीवन्मुक्ततानस्य शनैः परिणतिं गता। शांताशेषविशेषस्य भवत्यविषयो गिरां ।८०। स्पष्टं। ८१। स
जीवन्मुक्तः कीदृश इत्यत आह दृश्यत इति। दृश्यते लोकसामान्यो यथाप्राप्तानुवर्तिमान्। इह यानि

श्री।।
७०

-योनियंत्रप्रपीडनमित्यंतेन ग्रंथसंदर्भेण २

हफलप्राप्तो हृदयेनापराजितः॥८७॥शास्त्रतो लोकतश्च यथाज्ञातस्य व्यवहारस्यानुवृत्तिरहं [illegible]
स्य संतथा॥ हृदयेन मनसा॥ इतरत्स्पष्टमानं॥ ८७॥ मोक्षोपायकथामित्यत्रोक्तं श्रवणमिष्टं पुरुषेण [illegible]
मितिदर्शयिंस्तत्फलमाह स नत्वा परोक्षज्ञानं दर्शयति सुखासनेत्यादिना सुखासनोपविष्टेन यथासंभा
वमभ्यक्ता॥ भोगजालं सदाचारविरुद्धेष्वनतिष्ठता॥ ८८॥ यथारूपं यथादेशं च विचारयता सुखं वा यथा
संभवं ससंगमिमं मोक्षकथाक्रमं॥ ८९॥ आसाद्य तेमहाज्ञानबोधः संसारशांतिदः॥ नश्यो जयते येन
योनियंत्रप्रपीडनं॥ ९०॥ श्लोकत्रयमेतत्स्पष्टं॥ ९०॥ शास्त्रश्रवणं मनननिदिध्यासनां गंशमादीनि कर्त
ताये तं कुर्वतः फलमाख्याय तदकुर्वतः प्रत्यवायं [illegible] एतावतीति॥ एतावत्स प्रियेली॥ तः पापा [illegible] स
[illegible] विष्ठाकृमयः कीर्तनीयाः न ते धमाः॥ ९१॥ सुखासनोपवेशादिन्यायेन शास्त्रश्रवणा
[illegible] पाश्रयोसि महत्फलेत्व्यैकार्यइत्यर्थः॥ ९१॥ कियत्कालं विचारोनुष्ठेय इति शंकायुक्तं सोपस्कारम
[illegible] शास्त्रेत्यादिना॥ शास्त्रोपशमसौजन्यप्रज्ञानसमागमैः॥ अंतरांतसंपन्नधर्मार्थोपार्जन
[illegible] प्रा॥ ९२॥ तावद्विचारयेत्प्राज्ञो यावद्विश्रांतिमात्मनि॥ संप्रयात्यपुनर्नाशां शांतिं तुर्यपदाभिधां॥ ९२

तुर्यपदाभिधामित्यंतेन २

अंतरेऽअंतरे मध्येमध्ये संपन्नाः अंतरा संपन्ना धर्मार्थयोरुपार्जितक्रिया यस्य स तथोक्तः। शेषस्य टी० ॥७॥
व्यावर्त्तमानेषु विश्वतैजसप्राज्ञेषु अनुस्यूतत्त्वेन तस्मिन्नेव वर्त्तमानं निर्विकल्पचैतन्यं पृथक्कृत्य तुर्यत्वाद
पि व्यक्तत्वाय्य विधूतद्वैतजाले तस्मिन्सावेन निश्चलावस्थानलक्षणं तुर्यविश्रांति युक्तस्य शेषशंको
रीत्तयति तुर्येत्यादिना। तुर्यविश्रांतियुक्तस्य प्रतीपस्य भवार्णवात्। जीवतोऽजीवतश्चैव गृहस्थस्याथवा
यतेः॥७॥ प्रतीपस्य विमुखस्येत्यर्थः॥७॥ न कृतेना कृतेनार्थो न श्रुतिस्मृतिविभ्रमैः। निर्मंदर इवांभो
धिः संतिष्ठति यथास्थितौ॥८॥ स्पष्टं॥८॥ संक्षेपविस्ताराभ्यां वक्ष्यमाणज्ञानशास्त्रश्रवणफलमारभ्य
पवक्तुमारभमाणः श्रोतव्यस्य विस्तीर्णत्वात्तत्र चित्तसमाधेयमित्याह श्रृण्विति। श्रृणुतावदिदानीं वक्
ष्यमाणमिदं मया। राघवज्ञानविस्तारं बुद्धिसारांतरांतरं॥८॥ विस्तीर्णेऽप्यसारेन चित्तसमाधेयं। नेदं तथे
त्याह बुद्धीति॥ बुद्धिसारस्थांतरांतरं मध्यमध्यं ज्ञानसारमित्यर्थः॥८॥ यथा वदामि मोक्षवादर्थोग्र[illegible]:वि
दुप्रमाणानुसारि युक्तरूपेतद्वेत्याह युक्तीति। युक्तियुक्तमुपादायवचनं बालकादपि। अन्यतृणमि
वत्याज्यं मप्यक्तं पद्मयोनिना॥१०॥ स्पष्टं॥८॥ प्रमादाद्गुरुक्तस्याप्यनुपपन्नार्थस्यादेय[illegible]त्या

व४

लोका

५९

यब्रह्मोपदेशाय वक्ष्यमाणो ब्रह्मदृष्टांतेष्वादेयांशं दृष्टांतदार्ष्टांतिकवैषम्यप्रदर्शनपूर्वकमाह द्वयेरिति।
आदिश्लोकद्वयेन। यैर्यैः काकुत्स्थ दृष्टांतैस्त्वं मयेहावबोध्यसे। सर्वे सकारणास्ते हि प्राप्यं त्वसदकारणं।
६१। सच्छब्दो ब्रह्मविषयः ७। ब्रह्मोपदेशदृष्टांतो यस्त्ववेहेह कथ्यते। एकदेशसधर्मित्वं तत्रांतः परिगृह्य
ते। ६२। स्पष्टं। ७। एवं सतीति स्पष्टार्थः। एवं सति निराकारब्रह्मण्याकारवान् कथं दृष्टांत इत्यत्र दोषो
मूर्खवैकल्पिको ऽस्त्विति। ६३। कुतर्कप्रवृत्त मूर्खविकल्पास्त्वया नाश्रयणीयाः। अज्ञानविनाशक
त्वात्तेषामिति लब्धप्रसंगशिष्यांश्छास्त्रि नेति। न कुतार्किकतामेत्य नाशनीयाप्रबुद्धता। अनुभूतस्य
पलापांतैरपवित्रैर्विकल्पितैः। ६४। अनुभूतस्यापलापास्तैः अनुभवापलापपर्यवसानैः। अपवि
त्रार्थविषयत्वेनापवित्रैः। ब्रह्म सद्वितीयमद्वितीयं वा। सद्वितीयं चेद् पसिद्धांतः। अद्वितीयं चेत्
...ज्ञानानुत्पत्तिः। ब्रह्म सप्रमाणमप्रमाणं वा। सप्रमाणं चेद् द्वैतकृतिः। प्रमा
णरहितं चेत् प्रमेयस्य तस्यासिद्धिरित्यादिविकल्पितैः। ७। मुमुक्षुकर्तव्यतया शमाद्युपेताय
विचारः सर्वमुक्तः स निदिध्यासनापरपर्यायज्ञानाभ्यासेन सहैव वोद्धव्यो मुमुक्षुणा न बहिर्मुखवि
त्तेनेतीममर्थं सोपपत्तिकमाह गुणा इत्यादिश्लोकद्वयेन। गुणाः शमादयो ज्ञानोद्यमादिस्ते तथा

यो०वा०टी०

नेता। परस्परं विवर्द्धंते ते पद्मसरसीइव॥८५॥ न यावत्त्वस्तुसमभ्यस्तो ज्ञानसत्पुरुषक्रमो। एको पि नैत
योस्तावत्पुरुषस्येह सिद्धिदः॥ एतायावद्यावदेतन्मुखः सन्नात्मैवं पश्यति तावत्तावच्छमादिमान्भव
तियावद्यावदेतन्मुखः सन्नेशमादिमान्भवति तावदात्मतत्त्वमीक्षेतेति अनुभवसिद्धत्वान्निर्विकल्प
विदेकाकारीतः करणवृत्त्यावृत्तिलक्षणज्ञानाभ्यासेन सदैव सत्पुरुषक्रम। श। ८६। हि ते शमा [illegible] रूपे
तात्मविचारमावर्तयेदित्यर्थः। अथवा चिंतनं तत्कथनं अन्योन्यं तत्प्रबोधनं। एतदेव परत्वेन [illegible] ताभ्य
संविदुर्बुधाइत्यक्त ज्ञानाभ्यासशमसंतोषाभ्यासौ समकालमेव कर्तव्याविति सोपपत्तिकमाह यु [illegible] ोइ
त्यादिना। इदंपर [illegible] यशस्यमायुष्यं पुरुषार्थफलप्रदं। श्रुत्वा तं बुद्धिहीनेनमत्याह्लाद्यास्यसितत्पदं। ८७।
स्पष्टं॥ ८७॥ श्रवणादिना बुद्धिहीनेन मत्या रमस्त्वा वाक्यासिद्धत्सत्पदज्ञानलक्षणजातेघ्नतस्तद्धि स्मृतिर्नचि
ष्यतीत्यत आह विदितवेद्यमिति। विदितवेद्यमिदं हि मनो मुने विवशमेव द्वियातिपरं पदं। यद्वत्प्रबुद्ध [illegible] मखं
डितविक्रमं तद्वत्प्रबोधदशां न जहाति हि॥ ८८॥ परमिति द्वितीयांतं। एको हि त्वाद्यो वधारणो। द्विता यो नि
द्वयसिद्धो विवशे रयात्ये वेत्येतत्साध्य यतिय दिति। अपचबुद्धेसा दौ [illegible] ता। आ। रवंडिते देशकालव [illegible] कते।

अ०॥
५२

परिच्छिन्नां। अतएवाक्रमं निरावरणपरिपूर्णबोधरूपत्वात् परमात्मा मनोवृत्तिं व्याप्य त्यजती
त्यर्थः॥ ॥७॥ ॥इति श्रीवाल्मीकीये रामायणे महाकाव्ये श्रीमत्परमहंसपरिव्राजकाचार्य[illegible]सुख
पूज्यपादशिष्यश्रीमदात्मसुखकृतौ वासिष्ठविवरणे मोक्षोपाये मुमुक्षुव्यवहारप्रकरणं नाम चतुर्थः
सर्गः॥४॥ ॥४॥ ॥उत्पत्त्याख्यप्रकरणे न व्याख्यानविवर्जिते। आद्यमाकाशजाख्यानं लीलाख्यानमतः
परं। कर्कट्याश्चैंदवानां च कृत्रिमेंद्रस्य च क्रमात्। आख्या नान्यथ चित्तस्य षष्ठं बालस्य सप्तमं। ततः संबरिका
ख्यानं ततो लवणभूभृतः। आख्यानं सप्तमीनां वर्णनं यत्र शोभनं। तेषामाख्यानेष्वपूर्वेण संक्षेपात् बोध्यमुच्य
ते। पूर्वप्रकरणवृत्तमनूद्योत्तरप्रकरणतात्पर्यमाह मुमुक्षुव्यवहार इति। वासिष्ठवचनात् मुमुक्षुव्यवहा
रोयं मया ते परिकीर्तितः। अथैवं यं जगती श्रीमे उत्पत्तिः परिकीर्त्यते॥१॥ आत्मावारे द्रष्टव्य इत्यादि श्रुत्युक्त
वामादीति कर्तव्यतोपेतो मननिदिध्यासनांगकः श्रवणलक्षणो व्यवहारो मुमुक्षुव्यवहार इत्युच्यते॥
आत्म[illegible]संबंधिनी गगनादिसर्गनगरोत्पत्तिरिव अधिष्ठानादज्ञानात् उत्पन्ना जगदुत्पत्तिरत्रोच्यत इत्यर्थः॥

मुमुक्षूणां ब्रह्मात्मत्वेनैवं प्रतिपादिते प्रत्यक्षादिप्रमाणप्रकाशित प्रपंचसत्यता शंकया तस्यापरि
पूर्णताशंकायां तत्परिहाराय प्रपंचस्य कारणपरमात्मव्यतिरेकेणासत्त्वं प्रतिपादयितुं तस्मात्सृष्टिः पश्चाद्व
र्णनीयेत्यत्तिरित्यत्र जीवस्वरूपे विप्रतिपत्तेः स्वाभिमतजीवस्वरूपकथनपूर्वकं तस्य ब्रह्मैक्यमाह अनुत्पत्ते
त्यादिना। अथवा ऐक्यात्म्यं विज्ञातुमिच्छतो मुमुक्षोस्तदेवं सर्वं प्रतिपादनीयं तच्छेषतया वृत्तिः पश्चाद्वर्णनीये
त्यत्तिरित्यनुक्रमायाः प्रागेव तत्साक्षितया प्रकाशमानेन साक्षिप्रमाणमिति प्रसिद्धेनापरोक्षत्वेन न्यासके
न जीवेन तद्विरुद्धस्यापरोक्षस्य ब्रह्मण एकत्वं न संभवतीत्याशंक्य तस्यापरोक्षत्वे तन्यासत्तां दर्शयन् प्र
त्यगैक्यमाह। अथवा मुमुक्षुजिज्ञासितजीवपरमात्मैक्यमभिधाय अज्ञासितजगदुत्पत्तिपरिकीर्तनप्रतिज्ञ
नुपपन्नेत्याशंक्याह। अनुत्पन्नेति। अनुत्पत्तेर्वेदनस्य प्रतिपत्तेर्यथाभिधा प्रत्यक्षमिति नामेदृक्कृतं जीवः स एव
वनः॥२॥ व्यवहारस्तमावनुभूतिवेदनप्रतिपत्तिराख्यातिर्हि तापरोक्षत्वेतन्यस्य यथाभिधं अभिधानं तिङ्
म्या अनुत्पत्तिः प्रत्यक्षं वेदनं प्रत्यक्षं प्रतिपत्तिश्च प्रत्यक्षमिति प्रत्यक्षमीमांसा प्रत्येकं वादितिः स्वाभिमतविज्ञात्व
रूपसम्यक्कृतं स एव नोऽस्माकमौपनिषदानां जीवः॥ तथा च महद्धिरुक्तम् अनुभूतिर्वेदनं च प्रतिपत्तिरि



श्री॥४॥
५३

तीरितां। यैतन्पदमपरोक्षंयःसजीवइतिकथ्यतेइति।एतेनवादिभिरन्यथाकल्पितजीवस्वरूपमपास्तं।ब्रह्म
पदैकवाक्यश्लोकएवंव्याख्येयः।अनुवृत्तिशब्देनब्रह्मोच्यते।वेदनप्रतिपत्तिस्थितंतदेवविशेष्यते।वेदनमिति
ब्रह्मापरोक्षज्ञानमुच्यते।विप्रतिपत्तिर्लोकिकंप्रत्यक्षंमहावाक्यजनितांतःकरणवृत्त्यारूढं।ब्रह्मैवापरो
क्षज्ञाननिगद्यंभवति।चक्षुरादिजनितांतःकरणवृत्त्यारूढंतदेवलौकिकप्रत्यक्षारूढमुच्यते।वेदनप्रति
पत्तिकायाअनुवृत्तेर्लक्षणोयथालिधमतिधांप्रत्यक्षपर्यायांअनतिक्रम्येहमोक्षशास्त्रेप्रत्यक्षमितिना
क्षतंपठितव्यमित्यर्थः।अपरोक्षादपरोक्षंचक्षुर्नेत्रमितिहिप्रत्यक्षपर्यायाणांप्रतिपादश्रुतिःसएवप्रत्यक्ष
नामकंब्रह्मैवनोऽस्माकंमोपनिषदानांजीवपदलक्ष्यःप्रतिनिर्दिश्यमानापेक्षयालिंगव्यत्ययइति॥७॥
सएवसंविलक्षमानःअहंताप्रत्ययात्मकः।सयथोदेतिसंवित्यासाऽपदार्थइतिस्मृता॥सजीवोऽपरोक्षंचै
तन्यालासंविदेवब्रह्मैव।ननुमोक्षकामस्यसएवसंविदितिब्रह्मैकत्वेप्रतिपादितेपिनमुक्तिःसंभवति॥
परिपूर्णविस्मानंदिमुक्तिः।ब्रह्मव्यतिरिक्तस्यप्रपंचस्यसत्वेनतदसंभवादित्याशंक्यसर्वस्यप्रपंचस्य
लविवर्तत्वांदर्शयति।सगुनानित्यादिना।चित्तगत।विसृतिबिंबलक्षणोजीवःउमानित्युच्यते।अहंतया

प्रतीयत इत्यहं प्रत्ययोऽहंकारः स इति तच्छब्देन संविद्रूपः परमात्मा परामृश्यते। स संविद्रूपः परमात्मा स्वाविद्य
याऽसर्वं सर्वं विनोपाधिकः श्रीमान् स्वरूपात्पश्चादहंताप्रत्ययात्मको भवति। उपलक्षणमेतत् बुद्ध्यात्मको मन
आत्मकश्च भवतीत्यपि द्रष्टव्यं। स एव बाह्यपदार्थेनापि रूपेणापि विवर्त्तत इत्याह सययेति। स ययेति। संविल्लया घ
पटाद्याकारया देतिय संविद्रूपेण वर्त्तत इत्यर्थः। सा संवित् घटपटादिलक्षणः पदार्थ इत्यर्थैः तिस्मृतः॥७॥ सर्वो
पि हि पदार्थो मनोविलास एवेति हि शास्त्रमर्यादा उक्तमर्थं स्पष्टयति। स संकल्प इति। स संकल्पविकल्पौघः
कृतनानाक्रमोद्यमैः कुगत्या स्फुरत्यंबु तरंगादितया यथा॥८॥ स परमात्मा संकल्पविकल्पौघमसौ रायो
आद्यो येषामस्मिमानादीनां तैः। कृतनानाक्रमः कृतो नानाभूतो वस्थाक्रमो यस्य स तथा। एवं वस्थाक्रमो भ
वति। परिपूर्णसंविद्रूपः परमात्मा सृष्टिकाले सर्वसामान्यतो दृश्यतावस्थामाप्नोति। ततश्चित्तावस्थामाप्नो
ति। ततोऽहंकारावस्थां ततो बुद्ध्यवस्थां ततो मनोवस्थामिति। अयं वक्रम उत्तरत्र स्पष्टीभविष्यति॥ ॥८॥ ॥
ननु ब्रह्मलेखं जगज्जत्वया स्फुरति चेत्तर्हि जगत्कारणं ब्रह्मणा तद्विपरीतस्य जीवस्यैक्यं अनुपपन्नमित्याशंक्य
हृश्यादिति। जगत्कारणमेवास्य सर्गादौ सर्गलीलया। स्फुरित्वा कारणं भूतं प्रत्यक्चैतन्यमात्मनि॥९॥ प्राप्त…

अ॰ ३
५८

कृष्णम॰णात्मकप्रत्यगात्मिन्त्वात्‌ उत्पन्नात्सिद्धं ब्रह्म अथवा साक्षादिव प्रत्यक्षात्सिद्धं ब्रह्म। क्रियां ऊर्ध्वं हि क
रकमितित्यायास्त्रीष्वस्त्र्थ्यः प्राक्‌ क्रियाभावादकारणमेव सत्‌। अथवा कारणत्वस्य मिथ्यात्वादकारणमे
व सत्‌ सर्गादावाद्य सर्गलीलया मायामय्या सर्गार्थं कृष्णलीलया स्फुरित्वा तन्निसंस्काररूपेण विद्यमानस्य
जगतः कार्यकारणत्वं। अथवा सर्गादौ सृष्टिपालनादावकारणं वास्तवसहकारिकारणरहितं। सृष्टेः प्राक्‌
सर्गलीलया स्फुरित्वा मायया कारणनिर्वाहिकया आत्मनि वर्तमानस्य जगतः कारणत्वं तत्प्रपञ्चरूपेण
वं १ विवर्तमानया अधिष्ठाने हि ब्रह्मणः कारणत्वं॥७॥ ब्रह्मण एव कारणत्वं मायाया द्वारत्वं इति स्त्रवयि॰तदात्म
नं स्वयमकुरुतेति श्रुतिं वस्तुत्वयित्वं स्वयमित्युक्तं प्रपंचयति रूपेति। रूपालोकमनस्कारपदार्थव्याकुले
जगत्त्रा विद्यते वेदनस्यांतर्वर्तितांतःस्पंदने यथा॥८॥ मनस्कारः मनस आलोगो मनोविस्तारः। चित्ताभोगो मन
स्कार इत्यमरः। रूपं च आलोकश्च मनस्कारश्चान्ये पदार्थाश्च रूपालोकमनस्कारपदार्थाः तैर्व्याकुलं व्यामि
श्रं। अथवा रूपस्यालोकः प्रकाशो रूपदर्शनं। अनेन जागरणं लक्ष्यते। मनस्कारशब्देन मनोविकारात्मकः स्वप्ना
वि विकल्पितः। रूपालोकमनस्कारयोर्जागरणस्वरूपयोर्ये पदार्थास्तैर्व्याकुलं जगद्वेदनस्य ब्रह्मज्ञानस्यां

दृष्टांतमाह

ततःसंस्काररूपेण स्थूलरूपेण वांऽत्तर्वर्त्तते। ब्रह्मणि तादात्म्येन जगद्वर्त्तत इति ज्ञापनार्थैवातांतरिति॥ स्य
ष्टमन्यत्॥७॥ ननु ब्रह्म जगदुपादानकारणं चेत्तर्हि घटो ब्रह्म पटो ब्रह्मेति तत्तदात्मना प्रतीयेत। जलमिव त
रंगाद्यात्मना। न चैतदस्ति। अतो नोपादानं किंतु निमित्तमेवेत्यत आह सर्वमिति। सर्वमिवेदनं शुद्धं यथो
देति तदात्मकं। भाति प्रस्तुतदिक्कालबाह्यांतारूपहंकं॥८॥ सर्वात्मकं वेदनं ज्ञानरूपं ब्रह्म यथा येन प्रकारे
णायत्कार्यस्वरूपेणोदेति विवर्त्तते तदात्मकं तत्कार्यस्वरूपसत् भाति। सन् घटः सन्पट इति दृतत्तदात्म
नासद्रूपं ब्रह्म प्रकाराते। ततो मुक्तं ब्रह्मण उपादानत्वं कारणमपि प्रस्तुतदिक्कालबाह्यांतारूपहंकं। अप्रे
रित्यव्ययेनांतरे वस्तु विवक्षितं। विप्रस्तुतस्वरूपदिक्कालमुक्तबाह्यांतराणां रूपं स्वरूपमेव देहो यस्य
तत्तथा॥९॥ उक्तमर्थं विशदयति सर्वेति। सर्वस्मिन् यथा यत्र समुल्लासमुपागतः। तिष्ठत्यास्तु तथा तत्र
तत्र तद्रूपं विराजते॥१०॥ यत्र देशे यथा येन प्रकारेण यत्कार्यात्मना समुल्लासं समुज्जृंभणमित्यर्थः॥१०
प्रागकारणमेवेत्यादिनोक्तमर्थं विशदयति अकारणकमिति। अकारणकमेवातो ब्रह्मकल्पमिदं कृतं। प्रत्य
क्षमेव निर्मन्थितस्पांशांस्त्वत्रमायदयः॥११॥ यतो मायाद्वारं विना ब्रह्मणि कारणत्वं न विद्यते। अतोऽकारण

श्री॥

५५

[यत्नित]

कमेववास्तवकारणं एकमेवेदं जगदस्य सृष्टेः प्राक् ब्रह्मकल्पनमनुत्विव्यक्तनामरूपतया ब्रह्मस्वरूपमिव स्थि

तं। अधिष्ठानस्ते ब्रह्मणि संस्कारशेषं विलीनं जगत्ततो विश्राव्यमानं नेदं स्थितमित्यर्थः। सृष्टिकाले प्राप्ते

गतः प्रत्यक्षमेव प्रत्यक्षप्रमाणात्मकं ब्रह्मैव निर्मितं भवति। अपरोक्षरूपादादिदर्शनद्वारा। अपरोक्षसं

विद्रूपं निर्मितं। अपरोक्षचैतन्यमेव जीव इति प्रदर्शयितुं प्रत्यक्षप्रमाणमेव जीव इत्युक्तं। तस्य सम्यगादर्शम

नादिस्वरूपमाहतस्येति। अथवा परोक्षचैतन्यं ब्रह्मेति दर्शयितुं प्रत्यक्षनामकं ब्रह्मेत्युक्तं तस्य संगादनु

मानादिस्वरूपमाहतस्येति। अनुमानादयस्तस्य प्रत्यक्षप्रमाणस्यापरोक्षचैतन्यात्मकब्रह्मणः शाखाइवां

शाः परिच्छिन्नज्ञप्तिमात्रं ब्रह्मांतःकरणप्रतिबिंबितसत्वमातेत्यन्यत्रो तदेवेंद्रियलिंगादिजनितांतःकरण

शारूढप्रमाणमित्यभिधीयत इति हि वेदांतमर्यादा।। असर्वं जगद्ब्रह्मकार्यमिति दर्शयित्ता कारणब्रह्मव्यति

रेकेण कार्यं जगदसदेवेत्युक्तं वाचारंभणं विकारो नामधेयं विकारो मृत्तिकेत्येव सत्यमिति कारणव्यति

रेण कार्यस्यासत्वप्रतिपादकश्रुतेः। इदानीमेतन्निवृत्त्योः कारणप्रदर्शनपूर्वकं तदेव बंधकारणात्मतद

नयजगदसत्वप्रतिज्ञापूर्वकं प्रपंचयति। सर्वं खल्विदं ब्रह्म तज्जलानितिष्ठतिमनुसरन्नोंध्यायमित्यादिना।

बंधोयं दृश्यसद्भावाद् दृश्याभावे न बंधनं। न संभवति दृश्यं तु यथेदं शृणु कथ्यते॥१०॥ आजगत्त्वमहमित्यादि सर्गा
त्मा दृश्यमुच्यत इति वक्ष्यमाणस्य दृश्यस्य सद्भावादयं साक्षादनुभूयमानः कर्तृत्वभोक्तृत्वादिलक्षणो बंधो
न भवति। ननु दृश्याभावे बंधनं न भवतीति सत्यं स एव दृश्याभावो न संभवतीत्यत आह न संभवतीति
उत्तरार्द्धः शंकाव्याहृत्यर्थः। इदं दृश्यं यथा न संभवति तथा कथ्यते शृणु॥७॥ यदिदं दृश्यते सर्वं जगत्स्थावरजंग
मं। तत्सुषुप्ताविव स्वप्नः कल्पांते प्रविनश्यति॥११॥ विमतं दृश्यं असत् विनाशित्वात् स्वप्नवत्। विमतं विनु
शि दृश्यत्वात् स्वप्नवदित्यर्थः॥७॥ दृश्यत्वलक्षणो विनाशित्वमाशंक्याह तत इति। ततस्तिमितगंभीरं न तेजो
न तमस्ततं। अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते॥१२॥ ततोऽनंतरं ततं व्याप्तं तेजस्तमश्च न। किंतु स्ति
मितगंभीरं निश्चलापरिच्छेद्यं अनाख्यं अनभिधानं इंद्रियागोचरत्वात्। अनभिव्यक्तं। किंचिदिदमित्थमिति
निरूपणानर्हं सत् ब्रह्मावशिष्यते। सदेव सोम्येदमग्र आसीदिति श्रुतेः॥७॥ अनाख्यमित्युक्ते वक्त्रादिना
मुक्त्वा तस्य तत्त्वं अत आह ऋतमिति। ऋतमात्मा परं ब्रह्म सत्यमित्यादिका बुधैः। कल्पिता व्यवहारार्थं तस्य
संज्ञा महात्मनः॥१३॥ स्वप्रदीं॥ एवं सर्वप्रपंचस्याज्ञानं ब्रह्मात्मनोस्य समभिधाय स्वरूपादप्रच्युतानादेवत

श्री॥ ५८

स्मात्सृष्टिकाले जगदुद्यानं नन्वसौ गंधर्वनगरोद्यानमिव दर्शयन्नादौ समष्टिजीव हिरण्यगर्भोऽस्मीति मा
हृसन्नैवेति। स तथा सत्तत एवात्मा स्वयमन्य इवोल्लसन्नुज्जीवतामुपयातीव जीवना विनामकदर्थितां॥१८॥ तथा
ऽतत एवस्तिमितगंभीररूपएवस परमात्मा आकाशमिव स्वच्छे जले स्वयमन्य इवोल्लसन्नन्य इव विजृंभमा
पुण्यपावनाख्यानेन निरूप्यते। तत्र तावच्चित्तोपशमोपायेनुपदिशन्ति मुहृष्य इत्यादिना। वसिष्ठ उवाच। मुहृष्यो
मोहबीजानां हृष्यो विविधापदां। हृष्यः क्षेयो यां तिहृष्टे तस्मिन्परावरे। १। मुहृष्यो बीजावापहेतवः। ॐ चितानुव
यः क्रोशः। हृष्योदर्शनहेतवः। ॐ हृष्योर्भ्रान्तयः। मुहृष्यो हृष्य इति विहृदयमपि ॐ हृष्टि विशेषणं द्रष्टव्यां। छ। नित्य

384

मात्तविचारस्यपश्यतश्चंचलंजगत्राजनकस्येवकालेनस्वयमात्माऽसीदत्तिशानदैवंनचकर्माणिनधनानिन
बांधवाः।शरणंभवभीतानांस्वप्रयत्नाद्दतेनृणां।३।अयमेवाहमित्यस्मिन्संकोचेविलयंगतेसमस्तभुवनव्यापीवि
स्तारउपजायते।४।त्रयमेतत्स्पष्टं।छ।अयमेवाहमित्यस्यानिशायाउदितेक्षयेस्वयंसर्वगतःस्फारःस्वालोकःसंभव
र्तते।५।अयंदेहपरिमितएवाहंइत्येवंरूपायाऽहंकृतिःसेवनिशातमोमयत्वात्तस्याःक्षयेउदितेसतिसर्वगतः
स्फारःस्वालोकआत्मतत्वज्ञानंसंभवर्त्तते।छ।उपादेयानुपतनंहेयैकांतविवर्ज्जनंयदेतन्मनसोरामतद्विधंवि
द्धिनेतरत्।६।अत्रपामरदृष्ट्याहेयोपादेयविभागइतिउद्दिष्ट्वाशेषंस्पष्टं।छ।मारवेदंभजहेयेषुमोपादेयपरोभवाहे
यादेयदृशोस्त्यक्ताशेषस्थःसुस्थितोभव।७।शेषस्थःसमदृष्टोस्थितः।छ।समदृष्टोस्थितस्यलिंगमाहतानुणाना
हनिरिति।एतत्श्लोकद्वयंवाक्यं।निराशतेदंमेभूयाद्दितिभाविविषयद्वैतेहलानिवृत्तिः।निर्भयतासर्वभूतात्मभयप्र
दानात्स्वस्यभयनिवृत्तिः।८।निराशतानिर्भयतानित्यतासमताज्ञता।निरीहितानिष्क्रियतासौम्यतानिर्विकल्प
ता।८।धृतिर्मैत्रीमनस्तुष्टिःमृदुतामृदुभाषिता।हेयोपादेयनिर्मुक्तेज्ञेतिष्ठंत्यपवासनं।९।निराशताइदंमेभूया

श्री।।
२०५

दिति भाविविषयतृष्णानिवृत्तिः। निर्भयता सर्वभूतभयप्रदानात्स्वस्य भयनिवृत्तिः। निस्पृहता देहातिरिक्त नित्या
त्मभावः। समता परिपूर्णदृष्टिः। ज्ञता ज्ञाननिष्ठता। निरीहता उपादाय पिंडाप्रवृत्तिः। निष्क्रियता अनिहस्यापि अवि
क्रिया। सौम्यता आल्हादकत्वं। निर्विकल्पता एकाग्रचित्तत्वं। धृतिः धैर्यं चलता। मैत्री सर्वत्र मित्रभावः। मनस्विहि
र्यथा लाभपरितुष्टता। मृदुता अनिष्ठुरचित्तत्वं। मृदुभाषिता प्रियंवदत्वं। ६। गृहीतेति श्लोकद्वयं वाक्यं। गृहीत
तृष्णा शफरी वासनाजालमाविलं। संसारवारिविस्तृतं चिंतातंतुभिराततं। ७। अनया तीक्ष्णया तात छिंधि बुद्धि
शलाकया। मनसेवमनच्छिन्नांकुवारेणैव पादपं। ८। संसारवारिसंसारजले विस्तृतं चिंताभिरेव तंतुभिराततं विस्तृ
तं। गृहीता तृष्णा एव शफरी येन तद्वासनाजालं तीक्ष्णया बुद्धिशलाकया छिंधि। वा यथा वातसमूहेन अंबुदं
अंबुदसंबंधि जलं समूहमिव छिन्नान्तरे पदेति संबंधः। ७। आपदं पावनमासाद्य सद्य एव स्थिरो भवास्य स्पष्टं। ८। अतिष्ठं नाल्व
न्यसंजात्य न्निःस्वपन्नुस्य तेन्य तत्र। असदेवेदमित्यं तन्निश्चित्य आस्थां परित्यज। ९। सर्वावस्थास्वपि जगतोऽसत्त्वं निश्चि
त्य तत्र आस्थां परित्यजेत्यर्थः। शेषं स्पष्टं। ९। मनः प्रकृत्यैव जडं चित्तत्वमनुधावति। मांसगर्द्धेन मार्जारो वनेष्वग प्रति
यथा। १०। हृतद्विपे सिंहं मांसलोभात् चित्स्वरूपमनुधावतीत्यर्थः। स्पष्टमन्यत्। १०। सिंहवीर्यवशात्स्तब्धं मांसपंके

तुनोहरेः। विद्यार्यवशात्तः प्राप्तं दृश्यमाश्रयतेनमः।१४॥ यथा स्वतोऽसमर्थोपि सृगालादिः सिंहमनुस्मस्तु मां
संयुक्तो। तद्वन्मनः स्वयमपि चिच्छायासंक्रांत्या विषयग्रहणसमर्थं भवतीत्यर्थः। दृश्यमाश्रयसीदं चेत्तत्स चित्तो
सि बंधवान्। दृश्यं संत्यज्य सीदं चेत्तदचित्तोसि मोक्षवान्॥१५॥ नाहं ज्ञेयमितिध्याय दृश्याश्रय एव सचित्त
त्वं बंधहेतुश्च दृश्यत्याग एवाचित्तत्वं मोक्षहेतुत्वमित्यर्थः।१६॥ नाहं ज्ञेयमिति ध्यायं स्तिष्ठ त्वमचलाचलः। अनंता
काश संकाश हृदयो हृदयेश्वरः।१६॥ आत्मनो परिच्छिन्नतां जगतोऽसत्त्वं च ध्याय गिरिरिव स्थिरो भव। अनंतके
शवन्निर्मलहृदयो हृदयेश्वरस्तिष्ठ।१७॥ आत्मनो जगतश्चांतर्दृग्दृश्यदशांतरे। दर्शनाख्यं स्वमात्मानं सर्वदा भा
वय त्वं भवान्॥७॥ आत्मनो जगतश्चांतर्मध्ये यद्दर्शनं तत्र दृग्दृश्यदशांतरे वर्त्ततेऽदृग्दशांचापचिन्मात्ररूपेण वर्त्तते।१८॥
अनुमेवार्थमंग्यंतरेणाह स्वाद्यैति श्लोकद्वयेन। स्वाद्यस्वादकसंत्यक्तं स्वाद्यस्वादकमध्यगं। स्वादनं तत्स्थितं
ध्यायेत्परमात्ममयो भव॥१९॥ रामानुभवनीयस्य तथानुभवितुः स्वयं। अवलंब्य निरालंब्यं वै मध्यं मध्ये स्थिरो भव
॥२०॥ स्वाद्यं रसनीयं पानादि। स्वादको रसयिता। तयोर्मध्यगं। ताभ्यां कर्तृकर्मभ्यां संत्यक्तं। केवलमनुपहितं यत्स्वा

द्वे ८

श्री
२०६

रूपं

दनेरसानुभूतैव स्क्तत्र ध्यायन्परमात्ममयो भव ॥ अनुभवनीयस्योपभोग्यस्य कांतादेरनुभवितृरूपभोक्तृस्व
निरालंबकर्तृकर्मभावासंस्पृष्टमध्यमानुभवरूपं अवलंब्य तत्र मध्ये स्थिरो भव ॥ ७ ॥ एतामहंभावमयीमपुण्यां
छित्वानहंभावशलाकयैवास्वभावनां स्वभवांतभूमौ भवाभिशांताखिलभूतभीतिः ॥ अहंभावमयीमेतां स्व
स्वभावनाम नहंभावशलाकया नाहमस्मीति यो भावः तयैव शलाकया छित्वा प्रशांताखिलभूतभीतिः सन् भवां
तभूमौ संसारस्य पारे भव ॥ ७ ॥ रामउवाच ॥ अतिगंभीरमेवैतत्त्वद्वचनं तवाद्य हंकारत्यजनं मां गृहाणेति द्व
क्षिमां ॥ २१ ॥ स्पष्टं ॥ ७ ॥ यद्यहंकारसंत्यागं करोमि तदिमं प्रभो त्यजामि देहनामानं संनिवेशमशेषतः ॥ २२ ॥ अभिमा
निकबाह्यदेहबंधस्याहंकारपरित्यागे देहत्याग एव स्यादित्यर्थः ॥ २ ॥ स्पष्टं ॥ ७ ॥ ध्येयनेयनाम्नोर्वासनात्यागयोर्मध्ये
प्रथमस्य लक्षणमाह अहमिति श्लोकत्रयेण ॥ अहमेषां पदार्थानां एते च मम जीवितं नाहमेभिर्विना किंचिन्न मे
तैर्विना किल ॥ २३ ॥ आत्मनो देहादिभिः परस्परसंबंधाभिमानरूपं अहंकारं विचारपूर्वकं मनसा सहस्य त्यक्त्वा
देहादेः पदार्थस्य मम च न कश्चित्संबंध इति भाविते सति अंतः शीतलया रागद्वेषरहितया बुद्ध्या क्रियाः कुर्वतो
२ इसंतनिश्चयं ध्येयोत्यक्त्वा विचार्य मनसा सह ॥ नाहं पदार्थस्य न मे पदार्थ इति भाविते ॥ २४ ॥ अंतः शीतलया बुद्ध्या कुर्व
तो लीलया क्रियाः ॥ यो नूनं वासनात्यागो ध्येयो राम सकीर्तितः ॥ २५ ॥ शो ॥ धु ७ प्पी २

यो वासनात्यागः सोऽयं ध्येयः प्रकीर्तितः ॥ छ ॥ द्वितीयं वासनात्यागं लक्षयन्ति सर्वमिति । सर्वं सर्वकया बुद्ध्या यं कृत्वा
वासनाक्षयं । उत्सृजति निर्ममो देहं ज्ञेयो सो वासनाक्षयः ॥२६॥ समस्तया भेदरहितया बुद्ध्या यं वासनाक्षयं कृत्वा नि
र्ममो निर्गताहंममभावः संन्यस्तलयेवयस्तिष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते । निष्फलकलनां त्यक्त्वा वा
सनां स्थूलसूक्ष्मकारणभेदेन त्रिविधमपि देहं जहाति त्यजति । असौ वासनात्यागो ज्ञेय इत्युच्यते ॥ छ ॥ उक्तत्याग
द्वयमपि जीवन्मुक्तिविदेहमुक्त्योर्विसृज्यते श्लोकद्वयेनाहमित्यादिना । अहंकारमयीं त्यक्त्वा वासनां लीलये
व यः । तिष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते ॥२७॥ निर्मूलकलनां त्यक्त्वा वासनां यः समं ततः । ज्ञेयत्यागमयं
विद्धि मुक्तं तं रघुनंदन ॥२८॥ द्वावेतौ राघव त्यागौ समौ मुक्तपदे स्थितौ । द्वावेतौ ब्रह्मतां यातौ द्वावेतौ विगतज्वरौ ॥२
९॥ अयमेतस्य पद्यः ॥ छ ॥ आपतत्स्वित्यादिना श्लोकचतुष्टयेन जीवन्मुक्तलक्षणमाह । आपतत्सु यथाकालं सुखदुःख
षु नारतः । न हृष्यति ग्लायति यः स मुक्त इति कथ्यते ॥३०॥ ईप्सितानीप्सिते न स्तो यस्यांतर्वर्तिदृष्टिषु । सुषुप्तवद्यश्च
रति स मुक्त इति कथ्यते ॥३१॥ हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः । न परामृश्यते योंतः स जीवन्मुक्त उच्यते ॥३
२॥ सुषुप्तवत्स्वशान्तभाववृत्तिना स्थितं सदा जाग्रतियेन चेतसा । कलान्वितो विधुरिव यः सदा मुदा निषेव्यते मुक्त इ

श्री॥
२०७

२३६

389

तीहसंस्मृतः ॥३३॥ वस्तु दृष्टिषु दृष्टानिष्टदर्शनेषु ॥ अमर्षो ग्राक्रांतिरूपा ईर्ष्या ॥ क्रोधः परनिकादिभिर्मतं सः प्र
ज्वलनं ॥ कामो भिलाषः ॥ कार्पण्यं दैन्यं ॥ येन मुक्तुकृपणा ॥ जो ग्रहदशायामपि सुषुप्तावस्थायामिव प्रशमितभावहत्ति
नानिवृत्तविषादादिभावहत्तिना च्चेतसा ॥ उपालक्षितेन स्थितमित्यन्वयः ॥ ७ ॥ वसिष्ठ उवाच ॥ बाह्यार्थवासनो —
ना हृद्याबद्धेति राघव ॥ सर्वार्थव्यसनोन्मुक्ता हृद्यामुक्तेति कथ्यते ॥ ३४ ॥ बाह्यार्थव्यसनतो — ना बाह्यवस्तो ॥ वासनाभि
र्ध्येयेष्टा ॥ शेषं स्पष्टं ॥ ७ ॥ हृद्याखरूपमाहृदमिति ॥ इदमस्तु ममेत्यंतर्येषां राघव भावना ॥ तां हृद्यां शृंखलां विद्धि कल
नां च महामते ॥ ३५ ॥ तां हृद्यां शृंखलां विद्धि कलनां चेति सेव भावना हृद्या सेव बंधो बंधहेतुश्चेत्यर्थः ॥ ७ ॥ तामेतां स
र्वभावेषु सत्त्वसत्सु च सर्वदा ॥ संत्यज परमोदारं पदमेति महात्मनां ॥ ३६ ॥ बंधास्थामथ मोक्षास्थां सुखदुःखदृशामपि
॥ त्यक्त्वा सदसदास्थां च तिष्ठाक्षुब्धमिवाब्धिवत् ॥ ३७ ॥ द्वयमेतत्स्पष्टं ॥ ७ ॥ अन्यैश्चेत्यादिना श्लोकषट्केन चतुर्विधमहंका
रमाह ॥ अन्यश्च्वराममनसि पुरुषस्य विचारिणः ॥ जायते निश्चयः साधोस्फारो कारश्चतुर्विधः ॥ ३८ ॥ आपादमस्तक
महं मातापितृविनिर्मितः ॥ इत्येको निश्चयो राम बंधायासद्विलोकनात् ॥ ३९ ॥ अतीतः सर्वभावेभ्यो बालाग्रादप्य
हं तनुः ॥ इति द्वितीयो मोक्षाय निश्चयो जायते सतां ॥ ४० ॥ जगज्जालपदार्थात्मा सर्वमेवाहमक्षयः ॥ तृतीयो निश्चयश्चे

मोक्षायैव रहस्यमा॥७॥ अगम्यास दिदं शून्यं शून्यव्योमसमं सदा॥ एवमेव चतुर्थोपि निश्चयो मादृशि ह्यो॥८॥ ए
तेषां प्रथमः श्रोतव्यस्त्याबंधयोग्यया॥ शुद्धस्त्वात्रयः स्व॥ जीवन्मुक्तविलासिनः॥९॥ तत्राद्यः पादमस्तकमिति
प्रथमः। सर्वातीतः परमस्तत्त्वोऽहमिति द्वितीयः। सर्वात्मकोऽमिति तृतीयः। ब्रह्ममिति जगदितिव सकलं शून्य
मेवाऽतो व्योमवत्सर्वविकल्पातीतोऽहमिति चतुर्थः।८ एतेषां मध्ये प्रथमो बंधयोग्यस्त्वात्प्रोतव्यो बंधायैवाऽ
न्ये तु त्रयः शुद्धस्त्वात् चिंतनीयाः जीवन्मुक्तेष्वेव विलसंति॥७॥ उपादेयेष्वपि त्रिषु सर्वात्माऽहमिति निश्चयः श्रेयानि
त्याह सर्वमिति। सर्वमात्माऽहमेवेति निश्चयो महामतेः। तमादाय विषादाय न भूयो याति ते मतिः॥१०॥ सर्वम
हं चात्मैवेति यो निश्चय इत्यन्वयः। इतरत्समानं॥७॥ शून्यवादशंकानिरासाय शून्यमित्यादयः श्लोकाः कथंवि
दात्मपर्याया इत्याह शून्यमिति। शून्यं प्रकृतिवेदीति ब्रह्मविज्ञानमित्यपि। शिवः पुरुष ईशानो नित्यमात्मेतिक
थ्यते॥११॥ तत्र निराकारत्वाच्छून्यं। परादेवतात्वात्। जगदुपादानत्वात्प्रकृतिः। विविधविक्षेपहेतुत्वान्माया। बृंहणत्वाद्
ब्रह्म। विशुद्धज्ञानरूपत्वाद्विज्ञानं। कल्याणरूपत्वाच्छिवः। पूरकत्वात्पुरुषः। ईशितृत्वादीशानः। इत्येवमात्मैव नित्यं
कथ्यते॥७॥

उपादार

श्री॥
२०८

वताद्वैतसमुद्रे जगन्निर्माणलीलया परमात्ममयी शक्तिरद्वैतेन विजृंभते ॥४५॥ द्वयोर्भावो द्विता द्वितै
व द्वैतं भेद इति यावत् । द्वैतं च अद्वैतं च तयोः समुद्रे दोमेलनं च ततः प्रकारे यज्जगन्निर्माणरूपा लीला तया एतद्भू
तापि परमात्ममयी शक्तिः चिच्छक्तिरद्वैतेन सर्वत्र सच्चिदानंदस्वात्मनः स्वरूपस्य विच्छेदादभिन्नेव विजृंभ
ते प्रकाशते तत रागादिष्वपि समुद्रस्यैकमिवेति भावः । तत्र कार्यकारणयोः क्वचिद्द्वैतं वैमे प्रतीयते । यथा गो
मयाद्वृश्चिको जायत इत्यत्र क्वचिद्द्वैतं यथा सुवर्णकटकमुकुटादि । क्वचिद्द्वैताद्वैतं यथा क्षीराद्दध्यादि ॥४६॥ पाली
ये परकीये च सर्वस्मिन्नेव सर्वदा । नष्टे चोपचिते तत्कार्ये सुखदुःखे ग्रहो न मा ॥४७॥ सर्वातीतपदालंबी पूर्णेंदुशि
शिराशयः । नोद्वेगी न च तुष्टात्मा संसारे नावसीदति ॥४८॥ समः शत्रौ च मित्रे च दयादाक्षिण्यसंयुतः । आत्मकर्मैक
रो नित्यं संसारे नावसीदति ॥४९॥ व यमतत्परः ॥ नाभिनंदति न द्वेष्टि न शोचति न कांक्षति । ईहितानीहिते
मुक्तः संसारे नावसीदति ॥५०॥ यः खलु मुमुक्षुः प्राप्तसुखं तत्साधनं च नाभिनंदति । नानुमोदते । दुःखं तत्सा

यं॰ २

घनंच प्राप्तं न द्वेष्टि इष्टे विनष्टे न शोचति। अप्राप्तमिष्टं नूकांक्षति। तस्मादीहितानीहितैर्विरहितानिष्टैः सुक्तः
सगुमान्संसारेनावसीदति। जन्मादिदुःखैर्न विद्यते॥ छ॥ सर्वस्यामिमतं वक्ता चोदितः पेशलोक्तिमान्। आशयज्ञ
स्वाप्ततानां संसारेनावसीदति॥५१॥ स्वभावतः पेशलो क्तिमान् मृदुभाषी चोदितः किमीहितमिति परेश्चोदि
:षथ्यानिषधाद भिमतमिति द्वितीया। उच्यते। अभिमतत्वेन निश्चयः कथमित्यत्राह आशयज्ञ इत्यादि। आप्तानां
मिति आशयो भिप्रायः॥ छ॥ पूर्णामिति श्लोकषट्केन जीवन्मुक्तव्यवहारमाह। पूर्णां दृष्टिमवष्टभ्य ध्येयत्य
गविलासिनं॥ जीवन्मुक्ततया स्वस्थो लोके विहर राघव॥५२॥ अंतः संत्यक्तसर्वाशो वीतरागो विवासनः
बहिः सर्वसमाचारो लोके विहर राघव॥५३॥ उदारः पेशलाचारः सर्वाचारानुवृत्तिमान्॥ अंतः सर्वपरि-
त्यागी लोके विहर राघव॥५४॥ अंतर्नैराश्यमादाय बहिराशोन्मुखेहितः॥ बहिस्तप्तोंतराशीतो लोके विह
रराघव॥५५॥ छ॥

ग्रंथा २०४

१३८

बहिः कृत्रिमसंरंभो हृदि संरंभवर्जितः । कर्ता बहिरकर्तांतर्लोके विहर राघव ॥ ५६ ॥ त्यक्ताहंकृतिराश्वस्तमति
राकाशशोभनः । अगृहीतकलंकांको लोके विहर राघव ॥ ५७ ॥ ध्येयत्यागविलासिनी ॥ सर्वोक्ताहंकाररूपवासना
त्यागो ध्येयत्यागः तेन विलासिनी परिस्फुरंती पूर्णा दृष्टिं ब्रह्मदृष्टिमित्यर्थः । अंतरिति । भाविन्यभिमतप्राप्ताववर्त
मानेरागः भूते यासनात्तत्त्विंतया रहितः । बहिरिति । कृत्रिमसंरंभः कल्पितरागद्वेषादिविकारः । हृदि संरंभवर्जि
तः निर्वासनत्वान्निर्विकारः त्यक्तेति । अगृहीतकलंकः अगृहीताः कलंकाश्चयेन तत्र कलंको मनोदोषाः अं
कास्तद्व्यावृत्तिहेतवो लांछनानि ॥ उदार इति । पेशलाचारो मृदुव्यवहारः सर्वाचारादिवृत्तिमान् सर्वेषामाचार
मनुवर्त्तमानः अनुमोदमान इत्यर्थः । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्निति न्यायात् ॥ अंतरिति । बहि
राशोन्मुखवृत्तिः । आशानुकूलवृत्तिः ॥ ७ ॥ इतरसमाने ॥ ७ ॥ अयं बंधुः परश्चायं अयं चाहमयं तु वा न इति मिथ्या
दृशो राम विगलं तु तवाधुना ॥ ५८ ॥ अयं बंधुः अयं तु परः अयमेवाहं अयं तु न वा इति मिथ्या दृशो ये दृष्टयो जाता
अधुना विगलं तु अधुना ब्रह्मरहस्यतत्त्व विगलंतु विनश्यंतु ॥ ७ ॥ अयं बंधुरयं नेति गणना लघुचेतसां । उदारचरितमा

नां तु वसुधैव कुटुंबकं ॥५॥ लघुचेतसां परिलघु निपरिच्छिन्ने स्वात्मस्वरूपे चेतो येषां तेषामेवायमेव बंधुरयं ।
नेति गणना विशिचारणा भवेत् ॥ उदारचरितानां उदारे महति परिपूर्णब्रह्मणि चरितं निष्ठा येषां तेषां ब्रह्मनिष्ठानां तु
नर्वसुधैव अपंचः । सर्वोपि कुटुंबकं भोगायकरणद्रव्यमित्यर्थः ॥६॥ विविधजन्मशताहितसंस्तवैर्मे जगति बंधु
रबंधुरिति ह्रूणं ॥ भ्रमदशैव विवल्गति वस्तुतः त्रिभुवनं चिरबंधुप्रबंधपि ॥८॥ विविधैः सुरनरतिर्यगादिरू
पैः जन्मशतैराहितं संभ्रमे विरचित विपर्यासे अस्मिं जगति बंधुरयं वृ मे अयं तु नरबंधुरिति ईहूणं भ्रमदशैव के
वलं विवल्गति ॥ भ्रांतिदशा स्फुरणमेवावस्तुतः । त्रिभुवनं विचार्यमाणं बंधुरपि स्यादबंधुरपि स्यात् राजन्मभे
दापेक्ष्या संबंधानामनियमादिति भावः ॥७॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ भ्रात्रोः त्रिपथगातीरसंवादं मु
निपुत्रयोः ॥९॥ अस्त्यस्य जंबुद्वीपस्य कस्मिंश्चिद्दिक्कुंजके । वनप्रहमहोत्तुंगो महेंद्रो नाम पर्वतः ॥१०॥ तस्यैक
देशे वितते रम्ये सानौ नाम मनोरमे । आसीदभ्युत्तज्ञानस्तपोराशिरुदारधीः मुनिर्दीर्घतपा नाम तपोमूर्तिमिवास्थि
तो मुनेर्बभूवतुस्तस्य पुत्रौ द्वाविंदुसुंदरौ ॥११॥ पुण्यपावननामानौ द्वौ कचाविव वाक्पतेः । स ताभ्यां सह पुत्राभ्यां

श्री०
२७०

विरकालमुवासह॥६८॥ अथकालेतयोस्तस्य गुरुयोर्ज्ञानिवान्नुअक्षराग्रुण्यनामा तयोर्ज्येष्ठोगुणश्रेष्ठ स्वराघव

॥६९॥ श्लोकषट्कोसौस्पष्टार्थः॥ आपावनोऽर्हप्रबुद्धोऽक्षर पूर्वसंध्यांबुजंयथा॥ मौरव्यादितिगतोनाप्तपदोदोलामि

वास्थितः॥६७॥ पूर्वसंध्यांबुजं प्रभातसंध्यायां अंबुजं तद्वदर्हप्रबुद्धः॥ मौरव्यादि अयं ताइभावात्॥ अतिगतः अतिक्रांतः

अनाप्तपदः अप्राप्तब्रह्मनिष्ठः॥७॥ ततइतिश्लोकद्वयंवाक्यं ततोहृत्यकलितकालेकलितकारणेरतिमुत्क

ज्य॥ ॐ संसाराज्जराजर्जरजीवितः॥६८॥ कल्लनापद्मिनीनीडं देहं दीर्घतपामुनिः॥ जहौगिरिगुहागेहे भारं वैपथिको

यथा॥६९॥ कलितकारणे कलितानि प्रेरितानि जन्मादिकारणानि येनतस्मिन्॥ कल्लनापद्मिनीनीडं कल्लना

अहंकृतिः सैवपद्मिनीनी तस्यानीडं स्थानं॥ वैवधिको वीवधप्रसारयष्टिः तद्वाहकः॥७॥ प्रशांतकल्लनारंभं कल्लनाबं

धहेतवः॥ वेत्यमुक्तं विदास्पदं॥ पदंजगाम नीरागं गंधव्यपगंधइवांबरे॥७०॥ प्रशांतकल्लनारंभं कल्लनाबंधहेतवः सं

कल्यादयः प्रशांतः कल्लनामोनोरंभोयस्मिन् तत्॥ वेत्यमुक्तं विदास्पदं॥ वेत्यमुक्ता या विशुद्धा यास्थित आस्पदं प्र

तिष्ठारूपं नीरागं पदं रागादिरहितं कैवल्यं जगाम॥ गंधव्यपगंधोऽबरमिव गंधव्यपगंधो दिग्गुरुलबंधात्तिर्गतोऽबरं व्याप्नोति।

पितर्युपरते तस्मिन् ऊर्ध्वदेहिककर्मणि। पुण्य एव स्थितो व्यग्रः पावनो दुःखमाययौ ।७१। शोकोपहतचित्तोऽसौ
भ्रमन्काननवीथिषु। ज्यायांसमनपश्येव पावनो विललाप ह ।७२। अथोर्ध्वदेहिकं कृत्वा पितुः परमधार्मिकः।
आययौ विपिने पुण्यः पावनं शोकलालसं ।७३। पुण्य उवाच। किं घनं तपनं शोकं नयस्यांध्यैककारणं। पिता त
व महाप्राज्ञः गतः अज्ञावतां वरः ।७४। स्वामेव परमामात्मपदवीं पदवीं मोक्षनामिकां। स्वभावमभिसंपन्नो किं पित
र्यनुशोचसि ।७५। मातापितृसहस्राणि समतीतानि तेस्तु ताभुव बांधववृंदानि जातो जन्मनि जन्मनि ।७६। शोचनीय
यदि स्नेहान्मातापितृसुताः सुतात तदतीतान्न शोच्यंते किमज्ञ त्वं सहस्रशः ।७७। सप्तकमेतत्स्पष्टं ।७। अज्ञानवि
स्तीर्णमरौ विलोलं भ्रुगाभ्रुजैः स्पंदमयैस्तरंगैः। स्ववासनातापमरीचिवारि परिस्फुरत्येतदनंतरूपं ।७८। अज्ञा
नमेव विस्तीर्णा मरुदेशः तत्र स्ववासनातापमरीचि स्ववासनैव तापः तेन कल्पितं मरीचिरूपं वारि एतज्जगत् भ्रु
भ्रगुस्पंदमयैस्तरंगैर्भरनंतरूपं सत् परिस्फुरति ।७। पुण्य उवाच। बंधुमित्रसुतस्नेहद्वेषमोहदशामयः। स्वसंज्ञ
मात्रकेणैव प्रपंचोऽयं वितन्यते ।७९। स्पष्टं ।७। बंधुत्वे भावितो बंधुः परत्वे भावितः परः। विषामृतदशैवेह स्थिति भी

श्री०
२९१

१२०

पत्वे३

सौ२

वनिबंधिनी ॥८॥ मृषा हृतदेहैव तत्र परत्वात् परत्र भावनारूपा स्थितिर्विषदेहैव बंधुत्व भावनारूपा त्वमृत
देहैव भावनिबंधनी भावो भावना तया निबध्यत इत्यर्थः ॥छ॥ एकत्वे विद्यमानस्य सर्वगस्य किलात्मनः । अयं बंधु
परश्चायं इत्येकलनाकृतः ॥८॥ विद्यमानस्य परमार्थस्य सतः सर्वगस्यात्मनः एकत्वे अद्वितीये सति अयं बंधुरयं पर
इत्यसौ कलना कल्पनाकृतः ॥छ॥ रक्तमांसास्थिसंघाताद्देहाद् देवास्थिपंजरात् । कोऽहं स्यामिति चित्तेन स्वयं बुद्ध्वा
विचारय ॥८२॥ यद्यपि नायं देवी हे वत्स आत्मा रक्तमांसादिसंघात् तद्रूपत्वात् । तथापि तथाभूतात् देहाद् देवाराध्य कोऽहं
स्यामिति विचारयेत्यर्थः ॥छ॥ आस्तामयं विचारप्रयासः । इयमिह पारमार्थिकी हे हिरालंब्यतामित्याह दृष्ट्येति
दृष्ट्या तु पारमार्थिक्या न कश्चिद् बंधनवान् पाप्यहं । मिथ्याज्ञानमिदं पुण्यपापवानस्मीति वत्सात्ति ॥८३॥ पारमार्थिक्या पर
मार्थपर्यालोचनप्रवण्यया दृष्ट्या परामृश्यमाने त्वमिति न कश्चिदित्यर्थः । अहमित्यपि न कश्चित् किंतर्हि मि
थ्याज्ञानमेवेदं पुण्य इति पावन इति वत्सास्ति स्फुरिति । पुण्योऽहं पावनश्चास्मीति मिथ्याज्ञानकल्पितत्वात् भ्रांतिरे
वेत्यर्थः ॥छ॥ बहवो बंधुस्ते सुपुण्यास्तु स्थलीषु मृगयो नित्या बहवो बांधवो मार्गास्तान् कथं नानुशोचसि ॥८४॥ मार्गामृ

गसंबंधिनः शिष्टं समानं ॥छ॥ बहुवस्त्रे महाचैत्ये शिखरे गुमहीभृतां । बन्धो बांधवाः सिंहाः किं तान पिन शोचसि ॥८५॥
बहवाथ दशार्णेषु कपिलो वनवानरः । जैरौ पुत्रस्कंधारे प्रदुद्रुवन वायसः ॥८६॥ हे हयेषु मातंगः विगर्तेषु यथ गर्द
भः । शोत्वे कुसरमा पुत्रः पत्री सरलद्रुमे ॥८७॥ एतास्वन्यासु चान्यासु बह्वीषु जनयोनिषु । जातो नो स्थितं हन्त द्वीपेस्मिन्
पुराशातसहस्रशः ॥८८॥ अनंताः पितरो यांति यांत्यनंताश्च मातरः । इह संसारिणां पुंसां वने पादपपर्णवत् ॥८९॥ भ
वाप्राव विनिर्मुक्तं जरामरणवर्जितं ॥ संस्मरात्मानमव्यग्रो मा विमूढमतिर्भव ॥९०॥ स्पष्टार्थोऽसौ श्लोकषट्कः ॥छ॥
हि॰ स वैषणामयकलंकविवर्जितेन स्वस्थात्मभावकलितेन हृदंबुमध्ये । पुत्रात्मनात्मनि महामतिना त्वनेव संत्य
ज्य संत्रमममत्वं परितोषमेति ॥९१॥ एषणाः पुत्रकलत्रादि विषयेच्छाः । तन्मयकलंकवर्जितेन स्वच्छात्मभावकलि
तेन स्वच्छभावयुक्तेन आत्मना अंतःकरणेन संभ्रमं संत्यज्य आत्मन्येव परितोषमेहि स्वयं ॥छ॥ वसिष्ठउवाच
एवं प्रबोधितस्तेन तदा पुण्येन पावनः । प्रबोधमाप आकाशं प्रभातइवाम्बतलं ॥९२॥ प्रभाते अम्बतलं करैः आकाशं यथा प्रका
शमानं [illegible] वांशो [illegible] स्य ॥छ॥ उभावपि ततः सिद्धौ ज्ञानविज्ञानपारगौ । विचेरतुर्वने तस्मिन् यावद्दिष्टमनिंदितौ ॥९३॥ ज्ञा
नविज्ञानपारगौ ज्ञानविज्ञाने परोक्षापरोक्षब्रह्मज्ञाने ॥छ॥ एवं प्राग्रुक्तदेहानां अनंता जनबंधुजाः । आशाक्रि

श्री॥ २१२

गच्छते तेभ्यः किं वा संत्यज्यते ऽनघ ॥ २४ ॥ आगन्तुकदेहानां पूर्वजन्मानुभूतसंबंधिन्यो जनबंधुजाः अनंता आ
शाः किं गच्छंती इति बुद्धिप्रदानायानुजं पृच्छति । किमत्र मुक्तमाज्ञायाग्रहणं त्यागो वेति । त्याग एव मुक्त इति भावः
चिंतनेनेधते चिंता चिंधनेनेव पावकः । नश्यत्यचिंतनेनैव विनेंधनमिवानलः ॥ २५ ॥ कथमिष्टसिद्धिरिति विचार
श्चिंता । इष्टार्थानां पुनः पुनरनुस्मरणं चिंतनं ॥ छ ॥ ध्येयत्यागरथारूढः करुणोदारया दृशा ॥ लोकमालोकयन्दीनं आ
तिष्ठोत्तिष्ठ राघव ॥ २६ ॥ आतिष्ठ सुखमास्व उत्तिष्ठ जीवन्मुक्त्यर्थमुद्यमं कुरु । इतरत्समानं ॥ छ ॥ एषा ब्राह्मी स्थितिः स्व
च्छा निःकामा विगतामया ॥ एनां प्राप्य महाबाहो विमूढो ऽपि न मुह्यति ॥ २७ ॥ एकं विवेकं सुहृदमेकं प्रोदसखीं प्रियं
आदाय विहरन्नेवं संकल्पे न मुह्यति ॥ २८ ॥ द्वयमेतत्स्पष्टं ॥ छ ॥ विनिवारितसर्वार्थादपहस्तितबांधवात् । न स्वधैर्य
हते कश्चिदभ्युद्धरति संकटात् ॥ २९ ॥ विनिवारिताः सर्वेऽर्थाः सांसारिकप्रयोजना नियेन तेस्मात् । अपहस्तिता
स्तेनापसारिता बांधवा येन तथाभूतात् । स्वधैर्याद्दृते स्वस्य विवेकवैराग्यस्थैर्यं विना किंचिदपि संकटात्संसार
तो हरतीत्यन्वयः । स्वधैर्यमेव संकटादुद्धरतीत्युक्तं । इदानीं धैर्यसंपादनप्रकारमाह वैराग्येणेति । वैराग्येणा

थशास्त्रेण मत्त्वादिगुणैरपि यत्नेनापद्विघातार्थं स्वमेवोन्नमयेन्मनः ॥१००॥ आपद्विघातार्थं संसारनिवृ
त्तये वैराग्यादिभिः साधनैः स्वयमेव मन उन्नमयेत् धैर्ययुक्तं कुर्यादित्यर्थः ॥ छ ॥ न तत् त्रिभुवनैश्वर्यान्न कोशा
ज्जलधारिणः फलमासाद्यते चित्ताद्यन्मत्त्वोपबृंहितात् ॥१०१॥ मत्त्वोपबृंहितान्मत्त्वादिगुणैरुन्नतीकृता
च्चित्ताद्यत्फलं कैवल्यं रूपमासाद्यते । न त्रिभुवनैश्वर्यादिभिरपि तत्साद्यत इत्यन्वयः ॥ ० ॥ हर्षे मनसि संपूर्णे
जगत्सर्वं सुधाद्रवैः । उपानद्गूढपादस्य ननु चर्मास्तृतैव भूः ॥१०२॥ मनसि पूर्णे संतुष्टे सर्वं जगत्सुधाद्रवैरमृत
रसैः पूर्णमिव सुखाय जायत इत्यर्थः ॥ छ ॥ कथं मनसः पूर्णतेत्यत आह वैराग्यादिति । वैराग्यात्पूर्णतामेति मनो
नाशावशावशानुगं । आशया रिक्ततामेति शरदीव सरोमलं ॥१०३॥ वैराग्यादेव पूर्णं मनः तामेति आशावशानु
गं न कदाचित्पूर्णतामेति यदाह पराशरः । न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव
भूय एवाभिवर्धते इति ॥ छ ॥ हृदयं शून्यतामेति प्रकटीकृतकोटरं । अगस्तिपीतार्णववदाशाविवशचेतसां ॥१०४॥

श्री ॥
२१३

(B)

(B) Acc. No. ~~194~~ M-1524 (B)

वाल्मिकीय रामायण (योगवासिष्ठ)

हृदयस्यप्रकटीकृतकोटरत्वंनाममहत्त्वातिशयप्रकाशनंास्यष्टमन्यश॥छ॥नतथाभातिपूर्णेंदुर्नपूर्णःक्षीरसागरः।तल्ल
क्ष्मीवदनेकांतंस्पृहाहीनंयथामनः।१०५।पूर्णेंदुप्रभृतीनांहृदयवृद्धिसंभवादतित्याशोभा।निस्पृहस्यतुमनसःकदाचिद
पिहर्षविषादाभावान्नित्याशोभेतितात्पर्यार्थः।छ।यथाभ्रलेखाशशिनंसुधालेपंमेरवीयथा।दूषयत्येवमेवांतर्नरमाशापि
शाचिका।१०६।अभ्रलेखामेघपंक्तिः।सुधालेपंचूर्णादिद्रव्यलेपं।शेषस्यदृ॥छ॥अशामितसकलेषिणोमहात्मानुभवत्प्रयबंध
मपास्यमुक्तचित्तः।मनसिनिगडरज्जवः।कदाशाः।परिगलितास्तुचतास्तुकोनमुक्तः।१०७।अशामितसकलैषिणःसन्नभवबं
धमनपास्यमुक्तचित्तोभवायतःकारणान्मनसिवर्तमानाःकदाशाः।पुत्रकलत्रैषणादिरूपाः।कुत्सिताआशाःनिगडरज्ज
वःशृंखलाःरज्जुवद्बंधनहेतवः।अतःकारणात्ताःसुपरिगलितास्तुकोनमुक्तःसर्वोपिमुच्यतइत्यर्थः।छ॥ ॥छ॥इतिश्रीव
ल्मीकीयेमोक्षोपायेश्रीमत्परमहंसपरिव्राज।काचार्योत्तमसुखहृज्ज्यपादशिष्यश्रीमदात्मसुखकृतोवाधसिद्धौचंद्रि
कायांसंसारतरणिनाम्निउपशमप्रकरणेपुण्यपावनोपाख्यानेनामविंशःसर्गः॥ ॥२॥ ॥एवंमतीताख्यानेकजन्मानु
स्मरणद्वारास्वरूपज्ञानेनचित्तोपशांतिरुक्ता।इदानींगुणपप्रकर्षाश्रुचविद्विषयेकमपिसुखंचित्तोपशांतयेभगवान्
तिबल्यकपाख्यानेननिरूप्यते।तत्रचिरोपभोगात्भोगेषुरुविरुपपन्नेस्याशुऽभ्यादिनाश्लोकद्वयेन।वसिष्ठवाच।
भागछुहि

अथवा रघुवंशाख्यनभःपूर्णनिशाकर ।बलिवद्बुद्धिभेदेन ज्ञानमासादयामलं ।१। श्रीरामउवाच । बलिविज्ञानसंप्राप्तिं
पुनर्मबोधहृदये ।विभो कथय सिद्धं ते संतो नावनतं प्रति ।२। वसिष्ठउवाच ॥ अस्यास्मिंज्जगतः कोशे कस्मिंश्चिद्दिशि कुंजके ।पा
तालमतिविख्यातो वलोकोऽभ्रमेरधःस्थितः ।३। तस्मिन्नसुरदोःस्तंभधार्यमाणमहाजने ।बभूव दानवो राजा विरोचनसु
तो बलिः ।४। लीलानिर्जितनिःशेषभुवनो भोगभूषणः ।दशकोटीः सवर्षाणां दैत्यराज्यं चकार ह ।५। श्लोकपंचकमेतत्
स्पष्टं ।छ। अथागच्छत्खनत्येषु युगेष्वावर्तवृत्तिषु ।सुरासुरमहोघेषु प्रोत्पतत्सु पतत्सु च ।६। आवर्तवृत्तिषु ।स्यादावर्तोंऽभसां
भ्रम इत्यमरः ।तस्य वृत्तिरिव वृत्तिर्येषां तेषु ।उद्वेगमरुचिं ।अन्यत्स्पष्टं ।छ। अजस्रमुपभुक्तेषु त्रैलोक्योदरवर्तिषु ।भोगेषु
जगाउद्वेगं बलिर्दानवनायकः ।७। एकदा चिंतयामास प्रासादशिखरस्थितः ।महता मम राज्येन त्रैलोक्याद्भुतकारिणा ।८।
किंवा न वति भुक्तेन भूरिभोगातिभारिणा ।आयातमात्रमधुरमावश्यकपरिक्षयं ।९। भोगोपभोगमात्रं मे किंनाम महत्सुख
वहां सार्द्धत्रयमन्यत्स्पष्टं ।छ। पुनरालिंग्यते कांता पुनरेवावभुज्यते ।सेयं त्रिभुवनक्रीडालज्जायै महतामिह ।१०। लज्जायै मह
तां उच्छिष्टस्य पुनर्योगानर्हत्वादिति भावः ।छ। तमेव भुक्तं सेव्यापारो वधुनः पुनः ।दिवसे दिवसे कुर्वन्प्राज्ञः कस्मान्न लज्यते
॥११। स्पष्टं ।छ। पुनर्दिनं पुनारात्रिः पुनः कार्यपरंपरा ।पुनः पुनरहं मन्ये प्राज्ञस्येयं विडंबना ।१२। येषां पुनः पुनः प्रवृत्तिः रयं प्रा
हं मन्ये दृस्यच्य
यः
तस्य विडंबनेति स [illegible] ।१२। कृतयाप्यनया नित्यं क्रियया कृतकार्यया ।कोऽर्थः स्यात्राहशो येन पुनः कर्म न विद्यते ।१३।
वि

श्री॥
२०४

कृतकार्यया कृतप्रयोजनयाप्यनया प्रक्रियया नित्संकृतया ताहशः कार्यैः स्यात् येनार्थेन पुनः कर्म न विद्यते। कृतकृत्य
हेतुः कापि क्रिया नास्तीत्यर्थः॥७॥ भोगागते किमन्यत्तत्स्याद् द्रव्यं विना शियः। एतत्संचिंतयाम्यास्तु दृष्टोमद्वेष्यसो बहिः
॥४॥ भोगागते भोगरूपं विषयसुखं मुक्त्वा यदन्यद् विना शिद्रव्यं तत्किं स्यादिति। एतद्वस्तु संचिंतयामीति मत्या निश्चित्य बहि
र्ईध्या विस्त्यथ्यः॥७॥ अथाभ्यदयैर्वाचासुरराडा संस्मृतमिति करुणाशा स्वात्मन्येवमनस्यर्थं सम्भ्रमं गं निवेशाय॥५॥ अथान
तरमसुरराड् बलिर्मनसि विचारितमर्थं सम्भ्रमं गं स्वात्मन्येवा अस्य बुद्धावेव निवेशाय परस्थापयेत् करुणात् करुणाद परिआ
संस्मृतमित्यभ्यवाचा सम्भ्रमं गमिति विचारहेश्य सिनयः। आ इति स्मृतिद्योतकमव्ययं॥७॥ स्मृतमनुवदति पुरेत्यादिना
पुरा किल हा भगवान्पृष्टो मे स विरोचनः। पिता मया सतत्त्वज्ञो हेहलोकपरावरः॥६॥ हेहलोकपरावरः। पारे पर्यवसानस्य
तुः। अवरमादिकारणं॥७॥ स्वप्रकारमनुवदति पितरिति। पितः सकलदुःखानां सुखानां च महामते। यत्र सर्वभ्रमाः शांताः कास्या
सीमांतरुच्यतां॥७॥ हे पितः सकलदुःखानां सुखानां च वैषयिकानां च सीमांतः परमावधिः कोसावुच्यतां॥७॥ स्पष्टमन्यत्
सर्वभ्रमाणां शांतिमेवेऽप्यपंचयतिष्ठेति श्लोकद्वयवाक्येन। कोपशांतो मनो मोहः कातीताः सकलैषिणाः। विरागरहितं कुत्र
तात विश्रमणं चिरं॥१७॥ तत्र तात चितता नंदसुंदरं किं विदेवमाता हेहकथय यत्रेस्थः॥१॥ चिरं विश्रांतिमेम्यहं॥१७॥ यत्र वस्तु
नि विनागरहितं अरुचि विनिर्मुक्तं चिरं विश्रमणं विश्रांति सुखं संभवति। यत्र वस्तुनि मैं मदीयं रूपं अति वितता नंदसु

दूरं सत्र किंचिद्देवाव्यपदेश्यमेव भवति॥ तादृग्वस्तु कथय॥ तत्रोऽवस्थोऽहं चिरं विश्रांतिमेमीत्यन्वयः॥ छात्रश्च पितृरुत्तरम
नुभाषते मस्थिते स्मादिना॥ मस्थितो वायाऽस्ति छत्रातिविततो देशो विपुलकोटरः॥ त्रैलोक्यवर्त्तीनां सत्त्वानि यत्र मांति ब
हून्यपि॥२०॥ यत्र दृष्टीनुचाकाशे सागरो न च ताऽद्रयः॥ न वनानि न तीर्थानि न नद्यो न सरांसि वा॥२१॥ एक एवास्ति भूमणानुत
त्र राजा महाकृतिः॥ सर्वकृत्सर्वगः सर्वः सर्वत्रस्थीव्यवस्थितः॥२२॥ देशो मोक्षः स राजा मे आत्मा॥ मंत्री मन इति॥ शिष्टसमाने॥
बालिप्रश्नानंतरं विरोचन एव वक्ति तेने तिश्लोकद्वयवाक्येन॥ तेन संकल्पितो मंत्री सर्वं तन्मंत्रणोन्मुखः॥ अघटं घटयत्य
सुघटं विघटयत्यलं॥२३॥ भोक्तुं न किंचिच्छक्नोति न च जानाति किंचन॥ राजार्थं केवलं सर्वं करोत्यविसृष्टये॥२४॥ तेन राज्ञा सं
कल्पितः स ईदृक्तलोकानुल्लंघ्य इति॥ निःसिस्टं मामात्र कल्पितो मंत्री मंत्रणोन्मुखं विचारपूर्वकं तत्सर्वं राजकार्यम् अघटं दु
र्घटमपि घटयति॥ घटं सुघटितमपि कार्यम् अनभिमतं चेद्विघटयति॥ नाशयतीत्यर्थः॥ किंचिदपि भोक्तुं न शक्नोति॥ किंचन
न जानाति॥ मनसोऽचेतनत्वादिति भावः॥२४॥ स एव सर्वकार्यैककर्ता तस्य महीपतेः॥ राजा केवलमेकांते स्वस्थ एवावतिष्ठते॥
२५॥ बलिरुवाच॥ आधिव्याधिनिर्मुक्तः कः स देशो महामते॥ कथमासाद्यते वापि केन वाधिगतः प्रभो॥२६॥ कः स तादृग्विधो
मंत्री राजा वापि महाबलः॥ हेलालंघनजगत्त्रैलोक्यो ऽस्माभिरपि नोजितः॥२७॥ विरोचन उवाच॥ स तत्र मंत्री बलवान् देवासु
रगणैः स्तुतासमतैर्दमगुणितैरपि॥ नाक्रम्यते मनागपि॥२८॥ तत्रासि मुद्गरप्रासवज्रचक्रगदादयः॥ हितयं ऊर्ध्वतां यांति

अ॥४॥
२९५

405

दृषदीवोत्पलाहलिः रथाम मंत्री केवलं तत्र तेनैव प्रभुणा यदि जीयते तत्सुजेयो सावन्यथा त्वचलाचलः ।२०।। युवतु
त्वा गृहीतोऽसौ क्षणादायाति वश्यतां ॥ युक्तिं विना दहत्येष आशीविष इवोद्धतः ।२१।। शृणु यः पुत्र देशोऽसौ सोऽपूर्वे प्रक
टयोत मितां देशमुक्ता मयोक्तस्ते मोक्षः सकलदुःखहा ।२२।। राजा तु तत्र भगवान्नाम्ना सर्वपदातिगः । तेन मंत्रं स
तः आज्ञामतो नाम मम हामते ।२३।। विषयान्व्रति सोः गुरुसर्वातिवदित्सर्वथा । भूतानास्थापरमा ह्येषा सा युक्तिर्मनसो
जये ।२४।। एवं प्रमायुक्तिरनये वमनोमदः । स्वमनो मतमातंगो जातित्येवावदम्यते ।२५।। एते श्लोकाः स्पष्टार्थाः ।छ।
चित्तस्य भोगे द्वौ भागौ शास्त्रेणैकं प्रपूरयेत् । गुरुशुश्रूषया भागमव्यक्तस्पन्नस्य सक्रमो ।२६।। x चित्तजयक्रममाधि
कारणे देन त्रिभिः श्लोकैराह चित्तस्येत्यादिभिः ।x। चित्तस्य व्यवहारकालं चतुर्धा विभज्य सक्रमेणाभ्यासेऽव्यु
त्पन्नस्याशिक्षितस्य चित्तस्य प्रथमे भागे विषयभोगे द्वौ भागौ पूरयेत् । कालद्वयं नयेदित्यर्थः । शास्त्रेणाध्या
त्मशास्त्रेणैकं भागं पूरयेत् । गुरुशुश्रूषया चतुर्थं भागं पूरयेत् ।७।। किं विध्यक्तसप्तियुक्तस्य भोगं भोगैः प्रपूरयेत् । गु
रुशुश्रूषया भागो भागं शास्त्रार्थचिंतया ।७।। किं विध्यक्तसप्तियुक्तस्य भोगैरेकं कालं गुरुशुश्रूषया कालद्वयं
शास्त्रार्थचिंतया चतुर्थं कालं नयेदित्यर्थः ।८।। व्यक्तसप्तिमनुयातस्य प्रेरयेद्व्रतसोऽवहा द्वौ भागौ शास्त्रवैराग्ये द्वे व्य

न गुरुसज्जनया ॥३॥ सम्यगव्यक्तस्य वित्तस्य वै व्यवहारके लोके शास्त्रवैराग्यपरमात्मशास्त्रविचारे विषयाणां हे
यत्वविचारे शुद्धो वैकालो ध्यानसहितया गुरुसज्जनयाजे वा च सूर्ययेत् ॥७॥ प्रज्ञा विचारवशात् सममेव सदास्थिता । आत्म
वलोकनं त्यक्ता संत्यागं च समाहरेत् ॥३॥ इत्थं प्रज्ञा विचारवशात् प्रज्ञावशाद्विचारवशाज्ज्ञानं चित्तोपशमं त्यक्तायाः
संत्यागमात्मावलोकनं च समाहरेत् । संपादयेत् ॥७॥ विचारो भोगगर्हितो विचाराद्भोगगर्हणं । अन्योन्यमन्यमेते हि वर्धये
ते समुद्रजलदाविव ॥४०॥ भोगगर्हितो विषयसुखानां दोषदर्शनात् पुरुषार्थविचारः वर्धते । पुरुषार्थविचाराच्च
भोगानां गर्हणं । अपुरुषार्थत्वात् कुत्सितार्थत्वं वर्धते । इत्येवमेते विचारभोगगर्हणे अन्योन्यं वर्धयेते । यथा समु
द्रो जलदावृष्टिद्वारा वर्धते । समुद्रोदकाद्धि जलदस्तद्वदित्यर्थः ॥४०॥ देशक्रमेण धनमल्पविगर्हणेन तेनांग साधु
जनमर्जयमानः पूर्वीयसंगमोत्थविषयाद्यवहेलनेन [illegible]म विचारविभवेन तवात्मलाभः ॥४१॥ अल्पविगर्हणेन स्व
ल्पादोषेण देशक्रमेण देशाचारक्रमेण धनं अर्जय । तेन च धनेन मानपूर्वं सत्कारपूर्वकं साधुजनमर्जय । तत्संग
मोत्थविषयाद्यवहेलनेन साधुसंगमसंजातविषयवैराग्येण सम्यग्विचारविभवेन च तवात्मलाभो भविष्यति

सम्य

श्रीः ॥
२०९

स्वयः।छ।।बलिरुवाच।तन्मेकथितंपूर्वंपित्राचारुविचारिणा।इदानींसंस्मृतंदिष्ट्यासंप्रबोधमहंगगतः।४२
पित्रामेपूर्वंकथितमेतत्इदानीसंस्मृतमित्यन्वयः।दिष्ट्येत्यव्ययमानंदे।छ।।अहोनुरचतुरम्येयंशमभूःशीतलांतरा
सर्वाएवशाम्यंतिसुखदुःखदृशःसमे।४३।रामभूःशमदशा।शेषंस्पष्टं।छ।।कोऽहंतावदयंकिंस्यादात्मेत्यात्मावलो
किनं।द्रष्टाम्यकराणसंनाथंनूनमज्ञानशांतये।४४।।आत्मावलोकिनंशुक्रासंनेनाथंगुरुंकोऽहंअयमात्माकिंस्यात्
दंशाक्षार्थमात्मस्वरूपंचदृष्टुामीत्यन्वयः।छ।।वसिष्ठउवाच।इतिसंचिंत्यबलवान्बलिरामीलितेक्षणः।दध्यौक
मलपत्राक्षंशुक्रमाकाशमंदिरं।४५।।स्पष्टं।छ।।अथसर्वगतानंतचिदात्माभार्गवःप्रभुः।आतिनायसदेहंचरत्नव
तायनंबलेः।४६।।अथसभार्गवःस्वदेहंबलेरवस्थानान्तरंरत्नवातायनमानिनाय।तत्राजगामेत्यर्थः।छ।।अथरत्न
र्घदानेनमंदारकुसुमोत्करैः।पादाभिवंदनेनैनंपूजयामासभार्गवः।४७।।बलिरुवाच।भार्गवत्वत्प्रसादोत्थप्रतिभेयं
गुरस्तवानियोजयतिमांवक्तुंकार्यकर्तुमिवार्कभाः।४८।।किमिहास्तिकियन्मात्रमिदंकिमयमेववा।कोऽहंकस्त्वं
किमेतेवालोकाइतिवदाशुमे।४९।।शुक्रउवाच।बहुनात्रकिमुक्तेनखंगर्भेयत्नवान्दासर्वदानवराजेंद्रसारसं
क्षेपतःशृणु।५०।।श्लोकचतुष्टयमेतत्स्पष्टं।छ।।चिदहास्तिहिचिन्मात्रमिदंचिन्मयमेवच।चित्त्वंचिदहमेतेचलोकाश्चि

दितिसंग्रहः॥५१॥ चिन्मात्रं चिद्रूपं चिन्मयं विशुद्धमिति कं। चिद्व्यतिरेकेण न किंचिदस्तीत्यर्थः॥छ॥ भव्योसि वेत्तदेत
स्मात्सर्वमाज्ञोपि निश्चयात्॥ नो चेत्तद्बद्धकल्पितो नैव युज्यते तस्य हि॥छ॥ चित्तस्य कलिता बंधस्तन्मुक्तौ मुक्तिरु
च्यते। चिद चेत्या किलात्मेति सर्वसिद्धांतसंग्रहः॥५२॥ चित्तस्य कलिता चिदेव बंधमुच्यते तात्त्वे त्यक्तौ तु विमुक्तिरिति अ
चेत्या ऽचेत्या संस्पृष्टा चिदेवात्मेति संग्रहः॥छ॥ एवं निश्चयमादाय विलोकय धियेद्धया। स्वयमेवात्मनात्मानमनंतप
दमाप्स्यसि॥५३॥ स्वं ब्रजाम्यहमत्रैव मुनयः सप्तसंगताः। केनापि सुरकार्येण वक्तव्यं तत्र वै मया॥५४॥ वसिष्ठ उवाच॥
इत्युक्त्वा भगवान् शुक्रः आरुरोह नभस्तलं। बलिस्तु चिंतयामास चिदात्मकमिदं जगत्॥५५॥ बलिरुवाच॥ शुक्रमुक्तं
भगवता चिदेवेदं जगत्त्रयं। चिदहं चिदिमे लोकाः चिदाशाश्चिदियं क्रिया॥५६॥ तत्त्वद्वयमेतत्स्पष्टं॥छ॥ दृश्यदर्शन दर्शन
निर्मुक्तः केवलामलरूपवान्। नित्योदितो निराभासो द्रष्टास्मि परमेश्वरः॥५७॥ दृश्यदर्शननिर्मुक्तः दृश्यानि प्रतानि
भौतिकानि च दर्शनानि ज्ञानसाधनानि तेभ्यो निर्मुक्तो व्यतिरिक्तः अतश्च केवलामलरूपवान्। नित्योदितो नि
त्यप्रकाशः। निराभासो भासकांतररहितः निरपेक्षः। द्रष्टा सर्वसाक्षी परमेश्वरोस्मीति॥छ॥ चेत्यनिर्मुक्तचिद्रूपं विधूतवि
श्वावष्टरकं। सर्वांतः सर्वसंवेद्यं चिन्मात्रतमहं महः॥५८॥ चेत्यनिर्मुक्तचिद्रूपं विशुद्धचिदात्मकं। विधूतं अतएव विश्व
सर्वतो विश्वावष्टरकं। सर्वांतः सर्वसंवेद्यं उपरतसर्वविषयवासनं महः परिपूर्णसंचिन्मात्रमहमस्मि॥छ॥ इति सं चि

ओ॥ २९१

तेयन्नेवबलिः य   मको विदः॥ॐकारादर्द्धमात्रां हं त्रावयन्ध्यानमास्थितः॥५९॥ॐकारादर्द्धमात्रार्थं प्रणवान्वि
क्ष्य अर्द्धमात्राथ नेवपरब्रह्मरूपं गावयन्ध्यानमास्थितः॥छ॥संशांतेतिश्लोकद्वयं वाक्यं॥संशांतसर्वसंकल्पः प्र
शांतकलनागणः॥निःशंकमतिहरास्तत्त्वस्यचिंतकश्चिंतनर्नः॥६०॥ध्यातृध्येयध्यानहीनो निर्मनाः शांतवासनः॥ब
भ्रवान्वातदीपाभो बलिः आत्ममहापदः॥६१॥निःशंकं यथातथा अतिहरेः अस्तं क्षिप्तं वेत्त्यः चिंतकः चिंतनं चेति। त्रयं येने
त्यनेनबहिर्मुखविक्षेपराहित्यमुक्तं॥ध्यातृध्यानध्येयइ हीनइत्यनेनांतर्मुखापिनविक्षेपइत्याहाथेति॥छ॥अशमि
तैषणया।परिपूर्णया मननदोषहृशा सितयैतया॥बलिरराजत निर्मलसत्त्वया विधून मच्छ तयैवशरन्नभः॥६२॥स्प
ष्टं॥छ॥वसिष्ठउवाच॥अथतदानवास्तत्र बलेरनुचरास्तदा।तदृह स्फाटिकं सौधशुभ्रारुरुधुः क्षणात्॥६३॥ध्येयसागमया
त्मना।अहंममतादिवासनात्यागोध्येयत्यागः।तन्मयस्वरूपेण मनसा।निर्विकल्पसमाधाने स्थितावाविरमुदारधीः।
व्यबुध्यत बलिस्तत्र पुरस्तेषां महामतिः॥६४॥द्वयमेतत्स्पष्टं॥छ॥अथवैरोचनिस्तत्र ध्येयत्यागमयात्मना॥मनसा सकला
न्यवराजकार्याणि संव्यधात्॥६५॥ध्येयत्यागमयात्मना॥अहंममतादिवासनात्यागोध्येयत्यागस्तन्मयस्वरूपेण मनसा
इत्थं ततो राजकार्यं संव्यधात्॥छ॥आपदं संपदं दृष्ट्वा समयेवसपश्यति।नास्तमेति नचोदेति तस्याशासुखदुःखयोः॥६६॥स्पष्टं॥छ॥

णि २

410

बलिना~

ऊहापोहसहस्राणि भावाभाववशातानि चौपरिहृष्टां निष्कसमाश्वासमेत्यसौ ॥६॥ इष्टसासाधनोत्प्रेक्षणमूहः । अ
निष्टनिरासोत्प्रेक्षणमपोहः । तेषां सहस्राणि पदार्थानां भावाभाववशातानि च बलिना परिहृष्टानि तथाऽप्यसौ तेषां
बलिकवासमाश्वासं विश्वासमेति । न कापीत्यर्थः । असक्त एव राज्यं चकारेति यावत् ॥७॥ श्रीरामं प्रति हितमुपतिष्ठा
वमानमिति । धावमा । नमिहामुत्र त्सुष्ठितं लोकेवृत्तिषु । संस्थापय निरुध्येतमनो हृदयकोटरे ॥८॥ इह अस्मिँल्लोके
अमुत्र परलोके वा । धावमानं विषयसुखवांछया वेगेन गच्छन्तं लोकवृत्तिषु अर्थार्जनादिषु लौकिकव्यापारेषु सुवि
तेआसक्तं । एतच्चेतो निबध्य विवेकवैराग्यादिभिर्निरुध्य हृदयकोटरे हृत्पुंडरीके संस्थापय । आत्मानुसंधानतत्परं कु
विरित्यर्थः ॥८॥ येषु येषु प्रदेशेषु मनो मज्जति बालवशात् तेभ्यस्तेभ्यः समुद्धृत्य । तद्धि तत्त्वे नियोजयेत् ॥९॥ एवमभ्यागता
भ्यासं मनो मत्तमतंगजं । निबध्य सर्वभावेन परं श्रेयोऽधिगम्यते ॥१०॥ ॥३॥ ॥इति श्रीवाल्मीकीये मोक्षोपाये उपश
मप्रकरणे श्रीमत्परमहंसपरिव्राजकाचार्यात्मसुखपूज्यपादशिष्य श्रीमदात्मसुखकृते निवाणसिद्धविवरणोप
ख्यव्याख्याने नाम एकोनविंशः सर्गः ॥ ॥७॥ ॥श्रीरामार्पणमस्तु ॥ ॥७॥ ॥ एवं दुष्प्रापकर्षाद्विषयिकमपिसु
खं क्षविचित्रोपशांतये भवतीत्युक्तं । इदानीमीश्वरानुग्रहाद्देवकेदात्मतत्त्वावबोधो भवतीति प्रश्लादोक्तं तेन प्रतिपाद

ख्या~

श्री ४ ॥
२१८

तत्र वपुष इति श्लोकद्वयं वाक्यं

तत्र प्रल्हादवृत्तांतं तावच्छ्रोतासीति अथेत्यादिना। वसिष्ठ उवाच। अथेमं परमं राम विज्ञाताधिगतक्रमं। शृणु
दैत्येश्वरः सिद्धः प्रल्हादः स्वात्मना यथा॥१॥ हतेत्रिदशवृंदानां हिरण्यकशिपौ रिपौ। प्रल्हादश्चिंतयामास शोकसंत
प्तमानसः॥२॥ एते तातादयः सर्वे विष्णुनाऽसुरसत्तमाः। घातिताः कुब्रुकल्पांतवातेनैव कुलाचलाः॥३॥ अभ्यस्ता बह
वस्तेन मिथः प्रेरितपर्वताः। भीमाः समरसंरंभाः समयस्मत्पितामहैः॥४॥ तास्तास्विति घोरासु ततास्वसुरराजिषु।
यातन्नीत इदानीं स्यां स भूयमेव्यातिकाकथा॥५॥ तस्मात्तस्यातिवीर्यस्य हरेराक्रमणे स्फुटं। मन्ये नव्यतिरेकेण विद्य
ते नप्रतिक्रिया॥६॥ सर्वात्मना सर्वधिया सर्वसंरंभरंहसा। स एव शरणं देवो गतिरस्ति हि नान्यथा॥७॥ तस्मात्त्विमेष
दारभ्य नारायणमजं सदा। संप्रपन्नोस्मि सर्वत्र नारायणमयो ह्यहं॥८॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः। ना
पेतिममहृत्कोशादाकाशादिवमारुतः॥९॥ अविष्णुः पूजयन्विष्णुं न पूजाफलभाग्भवेत्। विष्णुर्भूत्वा यजेद्विष्णुं मयं वि
ष्णुरहं स्थितः॥१०॥ वसिष्ठ उवाच। प्रल्हाद इत्थं संचिंत्य कृत्वा नारायणीं तनुं। पुनः संचिंतयामास पूजार्थमसुरद्विषः॥११॥
एते एकादशश्लोकाः स्पष्टार्थाः॥छ॥ वपुषा वैष्णवादस्मान्निरुन्मूर्तिः परावरः। व्यर्थप्राणप्रवाहेणाबहिर्विष्णुः स्थितो
ऽपरः॥१२॥ तमेनं पूजयाम्याशु परिवारसमन्वितं। सपर्यया मनोमय्या सर्वसंभाररम्यया॥१३॥ पनावनापरे प्रल्हादयोग्य

परे प्रथमायस्मिन् सोऽयं विष्णुर्वैष्णवादस्माद्वपुषो बहिः प्राणप्रवाहरूपेण वायोर्निःसरणेन मरुन्मूर्त्तिर्वायुरूपो
परं स्थितः । तमेनं वायुरूपे वर्त्तमानं विष्णुं सृजयामीत्यन्वयः ॥ शिष्टं समानं ॥छ॥ प्रल्हाद इत्यपि श्लोकद्वयं वाक्यं प्रल्हाद
इति सर्वविंत्यसंगारगारगारिणा ॥ मानसा सृजयामास माधवं कमलाधवं ॥१४॥ रत्नार्घपात्रपटलैश्चंदनादिविलेप
नैः । धूपैर्दीपैः पवित्रैश्च नानाविभव[illegible] ॥१५॥ संभारस्तरभारिणा संभारः पूजोपकरणानि । शेषं स्पष्टं ॥छ॥ अथ दे
वगृहे तस्मिन् बाह्यार्थैः परिपूर्णया । सृजया सृजयामास दानवेंद्रो जनार्दनं ॥१६॥ ततस्तत्र स्थित्यैव प्रल्हादः परमेश्वरे
तयैव प्रस्य हृद्भक्त्या सृजयामास पूर्णया ॥१७॥ अथ तस्मिन्गुरे दैत्यास्ततः प्राप्तिवेलावाः । सर्वेऽप्येवाऽभवन्नस्तया राज
ध्यावारकारणं ॥१८॥ जगाम वार्तां गगनं देवलोकमथारिहन् । विस्मो द्विषपतिरित्यज्य नत्वा दैत्याः स्थिता अपि इति दे
वा विस्मयमाजग्मुः शक्राद्याः समरुद्गणाः । गृहीता वैष्णवी भक्तिः दैत्यैः किमिति राघव ॥२०॥ क्षीरोदे भोगाभोगस्थे विबुध
विस्मयाकुलः । जग्मुरंबरमुल्लंघ्य हरिमाहवशालिनं ॥२१॥ देवा ऊचुः ॥ किमेतज्जगवन्दैत्या विरुद्धायसदेवता ते हि
चन्मयतां याता । विस्मयो नो विजृंभते ॥२२॥ केकिलात्यं न दुर्हृत्वा दानवा दलितादयः । कपाश्वात्यमहाजन्मलभ्या
न किं जनार्दने ॥२३॥ प्राकृतो गुणवाञ्जात इत्येषा भगवत्कथा । अकालपुष्पमालेव सुरवायोद्भजनाय च ॥२४॥ स्पष्टं

श्री॥
२१०

413

कायमः आकृतारंभो हीनकर्ममतिः सदा ॥ क्वाकोदानवस्तुच्छोजातभक्तिः क्व वैष्णवी ॥२५॥ वराकः शोच्यः स्पष्टमन्यत् ॥
श्रीभगवानुवाचायुं ॥ गुणवान्निर्गुणो जात इत्यर्थक्रमणं विदुः । विबुधा मा विषण्णास्थ प्रह्लादो भक्तिमानिति ॥ पाश्चा
जन्मतस्येदं मोक्षा सा वरिदं मा ॥२६॥ गुणवान्निर्गुणो जात इत्यर्थक्रमणं विदुः । सार्धश्लोकोऽस्पष्टार्थः ॥ छ ॥ आसीद्या
वि विद्या पिशुवनान्यमरोत्तमाः । अयते नासुरवायेषा प्रह्लादीगुणितेह वः ॥२७॥ प्रह्लादी प्रह्लादसंबंधिनी । गुणिता गु
णवता कवोकृष्टजन्तवारोवस्पष्टो ॥ छ ॥ इत्युक्त्वा भगवांस्तत्र क्षीरोदार्णववीचिषु । अंतर्हितं ययौ देवस्तटतापिच्छगु
च्छवरः ॥२८॥ तापिच्छगुच्छवरतमालपुष्पस्तबकवत् । स्पष्टमन्यत् ॥ छ ॥ सोपि संपूजितहरिः सुरैर्घोषवृंदवं बरा । प्रह्लादं
प्रति गीर्बाणास्ततः स्निग्धवमायपुः ॥२९॥ वसिष्ठ उवाच । अथास्य हृत्पूजयामास देवदेवं जनार्दनं मनसा कर्मणा वाचा प्र
ह्लादो भक्तिमानिति ॥३०॥ अथ पूजापरस्यास्य दृश्ये स्थलइवाउजः । न विश्राम चेतोस्य लोगरागानुरंजनो ॥३१॥ स्वक
गानुकलनं विश्रातिमनुपागतो चेतः केवलमस्यासीद्दोलायामिव योजितो ॥३२॥ श्लोकत्रयमेतत्स्पष्टं ॥ छ ॥ आगा
दीतां स्थितिं कृष्णो देवः क्षीरोदमंदिरः । विवेदसर्वगतया धिया परमकांतया ॥३३॥ क्षीरोदमंदिरः । क्षीरोदमंदिरे स्थितो दे
व सर्वगतया धिया विवेदेत्यन्वयः ॥ छ ॥ इतरत्समानी ॥ छ ॥ मंदिरादित्वधिकरणे वोपसंख्यानमिति ल्यं [illegible] पंचमं

अथ पातालमार्गेण विष्णुराल्हादिताम्बरः । देवगृहागर्हं तस्य प्रल्हादस्य समाययौ ॥ अथाष्टभिः श्लोकैः प्रल्हादो विष्णुं स्तौति ॥

स्य देवगृहागर्हं समाययौ । क्षीरोदे निमग्नस्य सतस्य देवगृहागर्हाद्दुन्मग्नस्य स्यर्थः ॥ अआल्हादिताम्बरः भक्तानुग्रहपरि तोषितपरिवार इत्यर्थः ॥ विज्ञायाभ्यागतं देवं गृहं यया हि गुणो हृयादैत्येन्द्रः पुंडरीकाक्षमादरात्प्रत्युजय ॥२५॥ गृहागर्हं गतं देवं प्रत्यक्षावस्थितं हरिं । प्रल्हादः परमं प्रीतो गिरा तुष्टाव तुष्टया ॥२६॥ इयमेतत्स्पष्टं ॥ प्रल्हाद उवाच । त्रिभु वनभुवनाभिराम कोशोसकलकलंकेहरपरंप्रकाश । अशरणशरणं शरण्यमीशं हरिमजमच्युतमीश्वरं प्रपद्ये ॥२७॥ त्रिभुवनमेव भुवनं तस्याभिरामः कोशः अथ इवास्वरूपं जीव्यवाद । तादृशी ॥ कुवलयदलनीलसन्निकाशं शरदमलां बरकोटरोपमानो । भ्रमरतिमिरकज्जलांजनाभं सरसिजचक्रगदाधरं प्रपद्ये ॥२८॥ कुवलयदलानां नीलः नीला का रांशिः तत्संन्निकाशं भ्रमरतिमिरकज्जलांजनाभं । कज्जलरूपमंजनं । अंजनस्य नयन प्रसादहेतोः द्रव्यस्य गरुड विशेषणोपादानं ॥ विमलमल्लिकलापकोमलांगं सितदलेकुन्मलाकुशं खं । क्षतिरणितविविरंविरंवरी कंखरदं पकजलाशयं प्रपद्ये ॥२९॥ क्षतिभिर्वेदैरणितो मुखरवरितोपकजपचि विरिंविरेवरंवरीको भ्रमरोयस्मिन् तं ॥ स्वहृदयस्य प्रल्हादस्यैव जलाशयमिवाश्रयान्तं ॥ सितनखगणतारकावकीर्णं स्मितधवलाननपीवरं विंवाहृदय२

तु० ५
श्री।
२२०

यमणिमरीचिजालगंगं हरिशशांबरमाततं प्रपद्ये ॥४०॥ हृदयमणिमरीचिजालगंगं वक्षसि स्थितानां मुक्तामणी
नां मरीचिजालमेव गंगा मंदाकिनी यस्य तं ॥छ॥ त्रिभुवननलिनीसितारविंदं तिमिरसमानविमोहदीपमग्र्यं । स्फुटत
रमजडं विदात्मतत्त्वं जगदखिलार्तिहरं हरिं प्रपद्ये ॥४१॥ त्रिभुवनमेव नलिनी सरसि तस्यां सितारविंदं । सितत्वं नर
सिंहाद्यष्टिवताराभिप्रायेण ॥ तिमिरसमानविमोहदीपं ज्ञानप्रतिबंधकत्वात्तिमिरसमानस्य मोहस्य दीपमि
व निवर्त्तकं ॥छ॥ नवविकसितपद्मरेणुगौरं स्फुटकमलावपुषोपभूषितांगं । दिनशमसमयारुणांगरागं कनकनि
भांबरसुंदरं प्रपद्ये ॥४२॥ नवविकसितपद्मरेणुवत् गौरेण कमलाया वक्षःस्थलस्थितायाः श्रिया वपुषा उपभूषिता
नि अंगानि यस्य । दिनशमसमयः संध्या तद्वदरुणो ऽंगरागो यस्य तं ॥छ॥ अविरतकृतविश्वसर्गलीलं सततमजातम
वर्द्धनविशालं । युगशतज[illegible]भियी तदेहं तरुदलशायिनमर्भकं प्रपद्ये ॥४३॥ अत्राविरतकृतविश्वसर्गलीलस्य
सततमजातत्वं । अवर्द्धनस्य विशालत्वं । ज[illegible]रस्याप्यजातदेहत्वमर्भकत्वं च विरुद्धमिति विरोधाभासः प्रतीयते
अवर्द्धनं विशालं व्यसत्येन वर्द्धने विपुलं स्वभावत एव व्यापकत्वात् । युगशतजरगपि अजातदेहं युगशतेष्वजरं गेऽजी
र्णेऽप्यजातो रम्यो देहो यस्य तं । तरुदलशायिनं वटपत्रशायिनं ॥छ॥ इति स्तुत्वा नलिनीं उपाचपातं सुरनलिनी हा ततो

रग॰८

416

दिताऽर्कबिंबांकमलजननलिनीजन्मावहरं मे तितिलयं विधुंद्रपद्यो ॥४४॥ दितिसुताएवनलिन्यस्तासांपातः संहारके
तुवाः ॥ कमलजो ब्रह्मा सएव नलिनी ॥ अनेकमुखपद्मयुक्तत्वात् ॥ तस्याजलाद्वहरो जलाशयस्तं ॥ हृदिनलिनीनिलयं ना
लिनीशब्दोऽत्रपद्मसोत्रवाची ॥ हृदिवहृत्सियानलिनीयत्पुंडरीकं तन्निलयं ॥ शेषं स्पष्टं ॥ इति गुणावकृलाभिर्वीक्षि
रभ्यर्चितो सो हरिरसुरवितारी श्रीतिथमासरी देशः ॥ जैदइव मस्तपरप्रीतिमान् प्रीयमाणेकुवलयदलनीलः प्रत्युव
चाऽसुरेंद्रं ॥४५॥ श्रीभगवानुवाच ॥ वरंगुणनिधे दैत्यकुलानघ यमरमणोरणाभिमतं भयो जन्माऽऽः स्वोपवर्गांतये
॥४६॥ प्रह्लाद उवाच ॥ सर्वसंकल्पफलद सर्वलोकांतरस्थितायदुहारतमेवेसितदेवादिश्यं देवमो ॥४७॥ श्रीभगवानुवाच
सर्वसंभ्रमसंशांत्ये परमायफलाय च ॥ अनविश्रांतिपर्यंतो विचारोऽस्तु तवानघ ॥४८॥ वसिष्ठ उवाच ॥ इत्युक्त्वो दितिपुत्रं
इं विष्णुरंतरधीयत ॥ कृतघर्घरनिर्ह्रादस्तरंगस्तोयधेरिव ॥४९॥ पवेतस्यष्टा ॥ विष्णौ ह्यावंतर्हिते देवे ह्रजायां कुसुमांज
लिं पाद्यात्यं दानवस्त्यक्त्वा मणिरत्नपरिस्कृतां ॥५०॥ पाद्यात्यं पश्चात्कवौ उदासनं गत्ते तमित्यर्थः ॥ मणिरत्नपरिस्कृतां
मणिश्रेष्ठेरलंकृतां ॥७॥ पद्मासनस्थोपि सुदाक्रूपविष्टो धरातले ॥ स्तोत्रप्राग्विधिज्ञो मनेत चिंतयामास चिंतया ॥५१॥ प
द्मासनेनेत्यर्थः ॥ कृवेदरपरिविद्धंत्वापादतलेगे ॥ पद्मासनेन वेदे तत्सर्वेषामपिहृदि तो इत्येकत्वरूपं स्तोत्रप्राग्विधावज्ञ

स्वीकृतो॥न विषयो॥छ॥ विचारवानेवमभवानुभव वित्ति विचारिणा देवेनोक्तोऽस्मि तेनांतःकरोम्यात्मविचारणां।५२
स्पष्टः॥छ॥ किमहं तावद्देहस्यांयोस्मिन्नुवनंडुबराव मिगच्छामि तिष्ठामि भ्रुयाते विहराम्यहं।५३॥ वभीत्यादिस्सर्वेंद्रियव्याप
रोपलक्षणं वभीत्यादिरूपेण सर्वेंद्रियव्यापारालिमानीहं अपि किं स्यामिति विचारोपक्रमः॥छ॥ जगत्तावदिदं नाहं सद
कूटणपर्वतोयद्बाह्यं जडमत्यं तं तत्स्यां कथमहं किल।५४॥ इदं जगदहं न बाह्यत्वाज्जडत्वाच्चेत्यर्थः॥छ॥ त्रिहिसमानं॥छ॥
असन्नत्र्यक्षितो मूर्कोपयतनेनव विस्फुरत्। कालेनाल्पेन विजयी देहो नाहमचेतनः।५५॥ वस्कृतोऽसन्नेवाक्षादितः
कल्पितः। तत्तं द्रियसंघातस्य देहव्यपदेशाद्देहो नाहं अचेतनत्वाज्जडत्वाच्च। अत एवाचेतनत्वं असदत्र्यक्षितत्वाच्च।
केत्वाच्च। पवनप्रेर्यत्वाच्चेत्यर्थः॥छ॥ जडयाकर्णशंकुल्याकल्प्यमानकर्णरन्ध्रयो। शून्याकृतिः शून्यभवः शब्दो नाहमचेतनः॥
५६॥ शून्याकृति॥ अमूर्तत्वात्। शून्यभवः आकाशजत्वात्। अत्रापि हस्र्वत्वत्र सूक्ष्मसाधनं॥ गावोऽज्योऽज्यः। शेषं स्पष्टं॥छ॥ त्वचा
रूणविना त्रीन्याप्राप्यो ऽप्राप्यो यमन्यथ्यथा। शेषं येऽतेनेरूपायं विभ्रमसादोपलब्धात्मा स्पर्शो नाहमचेतनः।५७॥ त्वचात्वगि
द्रियेण प्राप्यः प्रकारांतरेणत्वप्राप्यत्वात्। विभ्रमसादेनइंद्रियप्रनाडिकयानहिःप्रस्तेनउपलब्धात्माप्रकारीत चित्तः॥छ॥

लब्धात्मा जिह्वयात्यक्तो लोलोल्लया लोलसत्तया। स्वल्पस्पंदोऽव्यनिष्ठोरसो नाहमचेतनः॥५८॥ लोला कृणिका सत्ता यस्या
स्तया। शोषस्पष्टः॥छ॥ दृश्यदर्शनयोर्लीनं क्षयिक्षय विनाशिनोः। केवलेद्रष्टरि क्षीणं रूपं नाहमचेतनं॥५९॥ दृश्यं घटादि
दर्शनं चक्षुः तयोर्लीनं समवेतं। केवलेद्रष्टरि क्षीणं अविद्यमानं। केवलग्रहणाऽनुपहित निद्रस्यार्थः॥छ॥ नासया गंध
जडया कृयिण्या परिकल्पितः। पेलवो नियताभोगो गंधो नाहमचेतनः॥६०॥ गंधजडया गंधवत्या जडया चेत्यर्थः। पेल
वो विरलः। अनियताकारः। कृणांतरे गंधांतरस्य प्राडुर्भावात्॥छ॥ नहिकस्त्वमित्यत्राह निर्ममइति। निर्ममो मनसो
शांतो गतपंचेंद्रियभ्रमः। शुद्धचेतन एवाहं कलाकलनवर्जितः॥६१॥ गतपंचेंद्रियभ्रमः। इत्यनेन चक्षुरादींद्रियतादा
त्म्यं वारयति। अमननइति। मननोरूपत्तां। मनने हि मनोव्यापारः। निर्मम इत्यहंकारत्वां ममेत्यव्ययं। निर्गतो ममेत्य
भिमानो यस्मात्। कलाकलितवर्जितइति जीवभावं वारयति॥छ॥ चेत्यवर्जितचिन्मात्रमहमेवाभिविभासकः। स
बाह्याभ्यंतरव्यापी निष्कलामलसन्मयः॥६२॥ निष्कलामलसन्मयः निष्कलं निरंशं। अमलं च यत्सद्वस्तु तद्रूपं॥छ॥ अ
इदानीं स्मृतं सत्यं एतत्तदखिलं मया। निर्विकल्पचिदाभासं एष आत्मास्मि सर्वगः॥६३॥ आइति स्मृतिद्योतकम्

ओ॥४।
२२२

चेतनेनेमे सर्वे घटपटादयः स्फुर्यंतां अवभासंते दीपेनोन्नमतेजसा ॥६४॥

व्ययं सत्यमखिलं सर्वात्मकं तद्रूपं मायास्पृष्टमित्यन्वयः ॥ तदेव रूपं निर्विकल्पेत्यादिना दर्शयति ॥ मय्येवेति ॥ चेतनेन म
येव दीपेन इमे घटपटादयः स्फुर्यंतां अवभासंते ॥ तस्य भासा सर्वमिदं विभातीति श्रुतेः ॥ स्पष्टमन्यत् ॥छ॥ मय्येवेताः स्फु
रंतीह विचित्रेंद्रियवृत्तयः ॥ तेजसोऽतः प्रकाशेन यथाग्निकणपंक्तयः ॥६५॥ एता विचित्रा इंद्रियवृत्तयोऽपि अतः प्र
काशमानेन मय्येव तेजसा स्फुरंति ॥ अंतर्गतागतयः काश्वशालाका इवेति ॥छ॥ विरिंचिसदनात्सारे तस्यां ते व्यास
रसदं ॥ प्रसरत्येव मेरूपं अद्यापि न निवर्तते ॥६६॥ मे रूपं चैतन्यं विरिंचिसदनात् सत्यलोकात् स्वरतोपि कल्पांता
पि पदं स्थानमाहरन् संपादयन् प्रसरत्सेव अद्यापि न निवर्तते ॥ देशकालाभ्यामपरिछिन्नत्वात् ॥ सर्वत्र प
रिपूर्णं मे रूपमित्यर्थः ॥छ॥ अयं नामाहमित्यं ततः कुतो निरवलंबना ॥ अपद्यताकृतेरेषा किलासीत्स्वल्पता मम ॥६७॥ अ
परिछिन्नस्यात्मनोऽयमिति परिछेदो निरालंबो निर्हेतुक इत्यर्थः ॥छ॥ शेषं स्पष्टं ॥छ॥ अनंतानंदसंभोगा परोपशमशालि
नी ॥ शुद्धेयं चिन्मयी दृष्टिर्जयत्यखिलदृष्टिषु ॥६८॥ प्रकृष्टोपशमशालिनी इयं मदीया दृष्टिः अखिलदृष्टिषु समस्तवस्तु
ष्वदर्शनेषु अनंतमानंदमनुभवंती चिन्मयी जयतीत्यन्वयः ॥छ॥ सर्वभावांतरस्थाय चैत्यमुक्तचिदात्मने ॥ प्रत्यक्चेत

नरूपाय मह्यमेव नमो नमः ।६२॥ आत्मैव देवताः सर्वा इति श्रुतेः । आत्मनश्चाद्वितीयत्वात् ३ । स्वस्यैव नमस्कारो युज्यते । सर्व
पदार्थांतर्यामिणे विषयासंस्पृष्टसद्रूपाय प्रत्यगात्मने मह्यं नम इति ।६॥ विचित्राः स्वैराः क्रियः स्वच्छसमया निर्विकारया । चि
ता क्रियंते परया कलाकलनमुक्तया ।७॥ स्वच्छया समया निर्विकारया च परया चितैव कलाकलनमुक्तया विचित्राः स
क्रयः जगत्सृष्ट्याद्यनुकूला ब्रह्मादिरूपा मूर्तयः क्रियंते । शिष्टं समानं ।८॥ कालत्रयमनुपेक्षिण्या हीनया याश्रित्य बंधनैः
चित्रः चैत्यमुपेक्षिण्या समतैवावशिष्यते ।११॥ अतीतं अनागतं वर्तमानं च कालं उपेक्ष्य तेनानुसंधत्ते या चिरसा च स्व
बंधनैर्हर्षविषादादिभिर्हीयते । तस्याश्च चैत्यं दृश्यभेदं उपेक्ष्यमाणाया स्थिता मम । तेव तैक्ष्ण्यं तैवावशिष्यते । उप
क्षिप्या इति हंतं ता द्वंद्वेभ्यो ऽभिवृति उपिरूपं ।१२॥ साहि वाचामगम्यत्वात् सत्तामिव शाश्वतीं । नैरात्म्यसिद्धांतदर्श
उपयातेव तिष्ठति ।१२॥ साहि समतामापन्ना चिरवाचां अगम्यत्वाद् व्यपदेश्यत्वात् शाश्वतीं असत्तां उपगतेव नै
रात्म्यसिद्धांतदर्शां शून्यवादसिद्धांतावस्थां शून्यरूपतामुपयातेव शिष्यते ।१४॥ इदानीं तामयेरंतर्या चिदावलि
तामसैः । साहि ना सा तिरस्कारा पारावतत्व पक्षिणी ।१३॥ इदानीं तामसैः रागद्वेषमयैर्मनोदोषैर्या विरुद्धा वलि

अ० ॥ २२३

तावेष्टितात्मवत्तिसावित्रपाशबद्धेर्वैपक्षिणीवोत्पतितुंमुक्ताशुचितुंनशक्ता ॥७॥ आत्मनेस्कन्नमोमहत्यंब्वाविच्छिन्नचिदा
त्मने। लोकालोकमणे देव विरेणाधिगतोस्यहो ।७॥ लोकालोकमणो लोकायल्लोकान तिश्रकाशयेमीति लोकाल
कः सत्रासो मणिश्च तस्यामंत्रणांङ्गतरस्समानी ॥७॥ परामृष्टोसि लब्धोसि प्रोदितोसि विरायर्थे उत्कृष्टतोसि विकल्पेभ्य
योसि सोऽसि नमोस्कृते ।७५॥ परामृष्टः श्रुत्यावार्थवाक्यैः सम्यग्विचारितोसि। ततो विकल्पेभ्यः कल्पिताकारेभ्य
उत्कृष्टतोऽसि ततश्च प्रोदितोऽसि प्रकृष्टेन सत्यज्ञानानंदादिनालक्षणेन स्वरूपेणाप्रादुर्भूतोसि। ततश्च लब्धोसि एव
स्थितोसि। तथा स्तुताय तेन मोस्त्विस्य व्ययः ।७। महत्तु भ्यमनंताय तुभ्यं महते शिवात्मने नमो देवाधिदेवाय पराय परमा
त्मने ।७९॥ जीवपरमात्मनोरैक्यात्महत्यं मह्यायतुभ्यं नमः। तुभ्यं वह्यायमे च नमः। देवानामधिदेवाद्यपरायपर
मात्मनेनमः ।७॥ गतघनमिवहर्निमिंदुबिंबं गतकलनावरणं स्वमेव रूपं स्वचिद्विशुद्धिते स्वयं स्वसंस्थं स्वय
दितं स्ववशं स्वयं नमामि ।७७॥ गतः कलनावरणं निवृत्तविद्यावरणं अतश्च गतघनं पूर्णमिंदुबिंबमिव स्थितं मुदि
तआनंदात्मके स्ववशस्थितः स्वस्वरूपेण नः पुनः स्वव्यतिरिक्ताधारस्वयं आत्मनेवनकारणांतरेण स्वसंस्थं स्व

स्वरूपमहतानन्तक्रियारूपासंस्थास्थिर्यस्यतंस्वयमेवोदितंआविर्भूतंस्ववशंअनन्याधीनंस्वयमेवरूपंस्वयंनमा
मि॥६॥ तिष्ठन्नपिहिवासीनोगच्छन्नपिनगच्छति।शांतोपिव्यवहारस्थःकुर्वन्नपिनलिप्यते।निष्क्रियत्वात्तिष्ठन्नपिअ
सीनोनभवसीति।अवस्थितदेहाभिमानाद्।गच्छन्नपिदेशांव्याप्नुवन्नपिनगच्छति।गमनक्रियायोदेहनिष्ठत्वे
त्।आत्मनस्तद्व्यतिरिक्तत्वात्।शांतोपिनिर्विकारचित्तोपिव्यवहारस्थःसर्वेंद्रियप्रवर्तकत्वात्।इच्छंकुर्वन्नपिव्य
वहरन्नपिआत्मानलिप्यते।पुण्यपापेनश्लिष्यते।अहंकारस्यनिवृत्तत्वात्॥७॥ मनांसिह्नोभयत्येषपल्लवा
जीवमारुतः।वाह्यत्यक्षपं।किंस्वामस्थालीमिवसारथिः॥७॥ मनांसिमनोबुद्ध्यादीन्यंतःकरणानिअक्षरूपं
क्षिं।वाह्येंद्रियगणं।शेषंस्पष्टं॥८॥ एषएवसदान्वेष्यस्तत्साध्यातव्यएवचाजरामरणासंमोहादनेनोत्तीर्यगम्यते
।८०॥ एषआत्मैवसदान्वेष्यःसोद्वेष्टव्यःसविजिज्ञासितव्यइतिश्रुतेः।एवंचसतिअनेनात्मनाजरामरणासंमो
हात्संसारादुत्तीर्यस्वरूपंगम्यते।८।सुलभश्चायमत्यंतंसुज्ञेयश्चाप्तबंधुवरः।शरीरपंकजकुहरेसर्वेषामेवषड्
दः।८१॥ नमेभोगास्थितौवांछानमेभोगविवर्जनेयदाया।इतितदायातुयद्यायातिप्रयातुतत्रा।र।दृश्यमा
नस्पष्टं।८२॥ एतावंतमहंकालमज्ञानरिपुणास्मिना।हृत्वाविवेकसर्वस्वंएकांतमवपोथितः।८३॥ एकांतेप

श्री॥ २२८

423

ये २

परैरविज्ञातं यथा तथाऽवपोथितो हिंसितः। शेषं स्पष्टं ॥छ॥ मनसा मनसि छिन्ने निरहंकारतां गते। भावेन गलिते
भावे स्वस्थः स्तिष्ठामि केवलः ॥८४॥ मनसा शास्त्रसंस्कृतेन मनोवृत्तिविशेषेण मनसि संसारवासिते चेतसि छिन्ने नि
रहंकारतां गते सति भावेन ब्रह्मादैतविषयेण तात्पर्येण संसारालंबिनि भावे गलिते सति केवलः स्वस्थः स्तिष्ठा
मि ॥छ॥ निर्लोवं निरहंकारं निर्मनस्कमनीहितं। केवलास्पंदशुद्धात्मयत्र तिष्ठति मेवशः ॥८५॥ निर्लोवमित्यादि ति
ति क्रिया क्रियाविशेषणं। भावः संसारवासना ॥छ॥ टह्मारज्जुगणं छित्वा मच्छरीरकपंज[illegible]रान्नजाने क्व[illegible]तो डीय
इरहंकृतिपक्षिणी ॥८६॥ विद्यमानापि वस्तु श्रीनस्थितावयिन स्थितावनितारूपलावण्यासक्तेव गतवदुष्टः॥
७॥ एतच्छ्लोकद्वयं स्पष्टार्थं ॥छ॥ जयेति श्लोकद्वयेनात्मानं स्तौति जय योऽगुमराकारजयशांतिपरायण। जयस
र्वगमातीत जय सर्वागमास्पद ॥८८॥ जय जात जयाऽजात जय कृत जयाऽकृत। जय भाव जयाभाव जय जेयज
याजय ॥८९॥ अगुमरो जयंकरो भैरवाद्याकारो यस्य सर्वागमातीत नाम जात्याद्यभावात्। सर्वागमास्पद॥ स
र्वोपनिषत्सु मेऽव्ययगम्यत्वात्। सर्वात्मकत्वाज्जाताजातादिरूपत्वात्। शेषं स्पष्टं ॥छ॥ वसिष्ठ उवाच इति संचिंत

यत्नेनैवं प्रह्लादः परवीरहा ॥ निर्विकल्पं परानंदसमाधिं समुपाययौ ॥ ९० ॥ निर्विकल्पसमाधिस्थश्चित्रार्पित इवाच
लो ॥ पंचवर्षसहस्राणि पीनां सौ तिष्ठदेकहृत् ॥ ९१ ॥ श्लोकद्वयं स्पष्टं ॥ ७ ॥ एतावता च कालेन तद्रसातलमंडलं ॥ ब [illegible]
राजकं ती[illegible] मात्स्यन्यायकदर्थनं ॥ ९२ ॥ तीक्ष्णां हिंसाच्च यिष्ठं मात्स्य न्यायो बलवता दुर्बलस्य बाधः ॥ मत्स्यादि
महांतः स्वल्पान्मत्स्या ॥ निलंति ॥ ७ ॥ अथाखिलजगज्जालक्रमपालनदेवनः ॥ क्षीरोदसागरे शेषशय्यासनग
तो हरिः ॥ ९३ ॥ अखिलानां जगतां जालस्य तत्क्रमस्य वर्णाश्रमधर्ममर्यादायाश्च पालनाय देहवान् ॥ ७ ॥ अष्टभिः
श्लोकैर्भगवतश्चिंता ॥ इदं संचिंतयामास त्रैलोक्यांमोहकां सुमनाः ॥ प्रह्लादे पदविश्रांते पाताले गतनायके ॥ ९४ ॥ क
हंसहितिरियं प्रायो निर्दैत्यत्वमुपागता ॥ दैत्या नावेसुरश्रेणीनिर्जितो पदं गता ॥ ९५ ॥ राममेष्यत्यपद्धंद मोक्षाप्यपद
मावयसिति ॥ देवो घेशां तिमा याते भुवि यज्ञतपःक्रियाः ॥ ९६ ॥ जुविष्यंत्यफलाः सर्वाः शममेष्यत्य संशयं ॥ क्रियास्व
योपशांतासु लोकोस्तसमुपेष्यति ॥ ९७ ॥ अ संसारप्रसंगो यत्रो वे व्यर्थे भविष्यति ॥ ततोहमपि शान्योस्मिन्नहं
वंशार्कतारके ॥ ९८ ॥ विततः प्रशांतिमाधाय स्थितिमेष्यामि तत्पदे ॥ अकांड एवमेवं हि जगत्क्षयपरामं गतो ॥ ९९ ॥ नेहश्री

श्रीम ॥
२२

425

योतु पश्यामि मन्ये जीवं तु दानवाः दैत्योद्योगेन विबुधास्ततो यज्ञतपः क्रियाः ॥७०॥ तेन संसारसंस्थानमसंस
रक्रमो ऽन्यथा । आकल्पमिह वस्तव्यं देहेनाऽनेन तेन रा ॥७१॥ इत्थं चिंतायाः क्रमः अल्हादस्य स्वपदविश्रांतेर्वा ॥
पाताले गतनायके सति तत्रस्यानां मनाथतया द्वयेसुरश्रेणी विजिगीषां विहायोपशांतासती सुमुद्धेतां त स्वा
क्रोमत्तमेः स्वर्गस्याभावात् ॥ भुवि यज्ञतपः प्रमुखानि स्वर्गफलानि सत्कर्माण्यपि धरातले ततो धर्मस्याप्रवृत्ते त्रैलो
क्यस्याप्यपरतो ऽसंसारप्रसंगस्तिपालनीस्याभावात् ॥ अहमपि स्वपदे विश्राम्ययं । ततश्चाकांडएव प्रलयस्य
दितिदानवानां जीवनं वरं मन्ये । ततो दैत्योद्योगेन विबुधानां विजिगीषायां यज्ञादिक्रियाप्रवृत्तौ संसारस्य स्थितिर्नि
न्ययेति शेषस्पष्टं ॥छ॥ एवं हि नियति र्देवी निश्चिता पारमेश्वरी । इति संचिंत्य सर्वात्मा निर्गत्य क्षीरसागरात् ॥७२॥ प्र
ल्हादनगरं प्राप्य प्रासादतलमाविशत् ॥ वेनतेयासनस्थो सौ लक्ष्मी विधुतचामरः ॥७३॥ त्वाम्बुधादिपरीवारो देव
र्बिभुनिर्वंदितः । महात्मन्संप्रबुस्सखेत्यवे विष्णुरुदाहरत् ॥७४॥ पांचजन्यं प्रदध्मानो ध्वनेयक्ककुभं गणं ॥ श्लोकस्या
र्थत्रयमतस्पष्टं ॥छ॥ महतातेन शब्देन ऽवैष्णवप्राणजन्मना । बान्धवसप्रबुद्धास्सा दानवेन्द्राः शनैः शनैः ॥७५॥ वैष्णव
प्राणजन्मना । विष्णुसंबंधिप्राणवायुजनितेन । समानमितरत् ॥छ॥ प्रसरं ध्वकृतोछाना प्राणशक्तिरथासुरा शनैर

क्रमयामास नाडीभ्यः सर्वतो मुखं ॥४॥ अथ प्रबोधानंतरं प्राणशक्तिश्चेतन्यशक्तिर्ब्रह्मरंध्रकृतोच्छ्वानापूर्वं समाधि-
समये तत्रैव ब्रह्मरंध्रे स्थिते तत ततश्च्छिता सती सर्वाभ्यो नाडिभ्यः शनैः स्फुरमाक्रमयामास व्याप्नुवती ॥छ॥ प्राणेषु नेत्र-
भाग एव विद्येति कथ्यते॥ उक्तान्यांशमन्यत्वाति दिशति राजसीति राजसी तामसी चेति स्पष्टिरेवं विद्याविद्या मोक्ष्य-
पिंडः स्थावरादिः आमस्तामसस्तामसी मता॥२५॥ एवमुक्तप्रकारेण राजसी तामसी च स्पष्टविधा अविद्या क्रांता तथा हि मनुष्या-
णामपि सर्वेषां राजससत्वे ज्ञानप्रधाना आत्मनः सत्वांशाः। शुद्धादिप्रवृत्तिप्रधानाः कृषिवाणिज्यादयो रजोंशाः। मोहबहुलाः सत्वरे-
ष्ठादयस्तमोंऽशाः। एवं तामसेषु तिर्यक्स्थविडादिकास्त्रिमोहबाहुल्याद्गवादिषु चैत्यविश्वेदितव्यं। मोक्ष्यपिंडः पिंडोऽस्मिता
ज्ञानरूपः स्थावरादिः सर्गविशेषः तामसी सेमता तामसस्पृष्टः परमावधिर्वं प्राप्तः॥ रामं उवाच। मोक्ष्यमत्यं तथ नेत-
मागतं समुपस्थिते स्थावरादितत्त्वं आसां कीदृशां वृत्तिः स्यात्यो रक्षा। अत्यंतघनतां सोऽन्तामागतं मोक्ष्यमज्ञानं स्थाव-
रादितत्त्वं प्राप्तं सत् कीदृशं समुपस्थितं भवति केन प्रकारेणावस्थितं भवति॥ इतरं समानं॥ ७॥ वासिष्ठ उवाच॥

श्री॰ का॰
२७८

२०१

529

३५

अमनस्त्वमसंप्राप्तं मनस्त्वादपि विच्युतं तटस्थं रूपमाश्रित्य स्थितैषा स्थावरेषु चिरं ॥२७॥ पाषाणादिवन्निर्मनस्कतां अ
संप्राप्तं हिताहितप्राप्तिपरिहारार्थायाः प्रवृत्तेः संभवान्मनस्त्वादपि मनोव्यापारादपि विच्युतं तां स्मरणाद्यभावाद्
क्तं तटस्थं मनस्त्वान्मनस्त्वमध्यवर्ति यन्मोरव्यं तादृशं रूपमाश्रित्य चिदेषा स्थावरेषु स्थिता ॥७॥ श्रीराम उवाच अम
नस्त्वाद्विच्युता यत्र संस्थिता स्थावरेषु चिरं तत्राहुरस्थितां मुक्तिं मन्ये वद विदांवर ॥२८॥ स्पष्टः ॥ वसिष्ठ उवाच यास
षुप्तपुर्यष्टकाया विस्थिता सुखदायिनी मूकांधजडवत्तत्र सत्तामात्रेण तिष्ठति ॥२९॥ यत्र स्थावरेषु चिच्चैतन्यं सुप्तपुर्यष्टक
अहंकारकलुषं बुद्धिबीजसमन्विता तत्पुर्यष्टकमित्युक्तं रोवागमेत्तास्याभ्युदयैकैमतः करणाधीकर्मकरणादीन्स्फ
कोता दृशं पुर्यष्टकमिंद्रियसहितरूपं सुप्तं निलीनं यस्यां सा तादृशी सती सुखदायिनी सुप्ता विचसुखा विभावदेहः स्थि
ता च स्थावरेषु मूकांधजडोपिव विरसत्तामात्रेण तिष्ठति न तु नःप्रकटतया प्रकाशते ॥७॥ श्रीराम उवाच सत्तादेतत्
याय त्र संस्थिता स्थावरेषु चिरं तत्राहुरस्थितां मुक्तिं मन्ये वद विदांवर ॥३०॥ यत्र स्थावरेषु विरसत्ता येतत यासत्तया
सत्तालिन्नतया सत्तामात्ररूपतयेति यावद्संस्थिता सेकल्पविकल्पाद्युन्मावात् तत्र स्थावरेषु मुक्तिं महत्स्थि
तां सन्निहितां सन्ये समाश्चवस्था सादृश्यादिति भावः ॥७॥ वसिष्ठ उवाच बुद्धिपूर्वं विचार्येदं यथावस्त्ववलोकनात् ॥र॥
सत्तासामान्यबोधोयः स मोक्षः स्यादनेतकः ॥३१॥ इदं जगदिचार्येत्युक्तविदन्तु ... वैः पर्यालोच्य यथावस्त्ववलो

कनारूपमार्थनिश्चयात्॥ शुद्धिस्सर्वेयः सत्तासामान्यबोधः सत्तासामान्यबोधः सत्तामात्रपर्यवसितो बोधः स एवानंतः
नराद्वृत्तिरहितो मोक्षः स्यात्। अन्यथा महापातकैरेव कार्यैकैः स्थावरत्वसिद्धेर्मोक्षस्य सुलभत्वात् लोकशास्त्राणां वै
यर्थ्यं स्यादिति भावः॥१॥ एतदेवाह परीति। परिज्ञाय परित्यागो वासनानां य उत्तमः सत्तासामान्यरूपत्वात् तत्केवलं
पदं विदुः॥२॥ परिज्ञाय विचार्य हेयत्वाद्वासनानां संसारहेतूनां य उत्तमः परित्यागः पुनः संसारप्राप्तिरहितः परि
त्यागः अतः सत्तासामान्यरूपत्वात्। चैतन्यस्य सर्वोपाधिविनिर्मुक्तत्वात्। तदेव कैवल्यरूपं विदुः॥३॥ विचार्येय
सहालोक्य शास्त्राण्यध्यात्मभावनात्। सत्तासामान्यनिष्ठत्वं यत्तद्ब्रह्म परं विदुः॥३॥ सर्वोक्तस्यैव प्रपंचः शास्त्राण्यध्या
त्मशास्त्राण्यालोक्य गुरुमुखादेवावधार्य आर्यैः सह ब्रह्मवादिभिः सह विचार्य युक्तिभिरनुचिंत्य अध्यात्मभावना
रूपचित्तानुसंधानात् यत्सत्तासामान्यनिष्ठत्वं तदेव परं ब्रह्म विदुः॥४॥ अतः सुप्ताः स्थिता मंदा यत्र बीज इवांकुरः॥ वास
नानन्तःसुषुप्तं विद्धि जन्मप्रदं पुनः॥४॥ यत्रैव यस्यां स्थावरदेशायां वासनाबीजांकुर इव अतः करणे सुप्ता निलीना मंदा
स्थिता तत्सुषुप्तं गाढनिद्रासादृश्यात्। तत्पुनर्जन्मप्रदं विद्धि। वासनाया निःशेषत्वे नवल्लिगूढमवस्थानात्॥
अंतः संलीनमननं परितः सुप्तवासनं। सुषुप्तं जडधर्मत्वाज्जन्मदुःखदं स्मृतं॥५॥ अंतरभ्यंतरे संलीनमननं नि
तममनोव्यापारे परितः सुप्तवासने च यत्सुषुप्तं सुषुप्तसमदृशी दशा तज्जडधर्मत्वात्। जडधर्मवर्तमानत्वात् जन्मदुः

श्री॥
२७०

२०८

खः शान्तप्रदं जन्मनां दुःशतानां हेतुः ॥ स्थावरादय एते हि समस्ता जडधर्मिणः सुषुप्तपदमारूढा जन्मयोग्याः पुनः पुनः
॥३८॥ अतः कारणादेते स्थावरादयो जडधर्मिणः समस्ताः सुषुप्तपदमारूढा इति कृत्वा पुनः पुनर्जन्मयोग्याः सुषुप्ताद्धि पु-
नः पुनः संसरन्ति ॥ यथा बीजेषु पुष्पाणि मृदो राशौ घटो यथा तथान्तः संस्थिता साधो स्थावरेषु स्ववासना ॥३९॥ बीजेषु
तादिबीजेषु यथान्तः पुष्पाणि पिण्डीभूततया रूपतया संस्थितानि पुष्पग्रहणं पत्रादीनामुपलक्षणं फलादीनां यथा च मृदो रा-
शौ मृत्तिकासमूहे घटाः संस्थिताः घटग्रहणं शरावोदंचनादीनामुपलक्षणं तथा स्थावरेषु स्ववासनाः स्वीयाः पु-
ण्यापुण्यसंस्काररूपा जन्मान्तरहेतवोऽन्तः संस्थिताः ॥ यत्रास्ति वासनाबीजं तत्सुषुप्तं न सिद्धये निर्बीजा वासना
यत्र तत्तुर्यं सिद्धिदं स्मृतं ॥४०॥ यत्र स्थावरादौ या वासना च तद्बीजमज्ञानं च संसारकारणमस्ति तत्सुषुप्तमेव न तुर्यात्म-
सिद्धये कैवल्याय न भवति यत्र यस्मिञ्जीवन्मुक्तपदे निर्बीजा निर्गतं बीजमज्ञानरूपं यस्याः सा शुद्धवासना प्रव-
र्तते न । तत्तुर्यं पदं सिद्धिदं स्मृतं ॥ वासनायास्तथा वह्नेः ऋणव्याधिद्विषामपि स्नेहवैरविषाणां च शेषः स्वल्पोऽपि बाधते
॥४१॥ वह्न्यादीनामपि वासनायाः शेषः स्वल्पोऽपि बाधत इत्यर्थः ॥ निर्दग्धवासनाबीजः सत्तासामान्यरूपवान्
सदेहो वा विदेहो वा न भूयो दुःखभाग्भवेत् ॥४२॥ निर्दग्धवासनाबीजः निर्दग्धा वासना च बीजमज्ञानं येन तादृशः
सत्तासामान्यनिष्ठ आत्मा तद्रूपवान् पुरुषः सत्यसति वा देहे भूयो दुःखभाग्भवेत् ॥ विशुद्धचिद्वासनाबीजरूपि

त्पिणी सर्वदेहिनां॥ अस्यास्तत्वदर्शनं यत्तदविद्येत्युच्यते बुधैः॥७॥ यावद्वस्तुविलक्षिर्देव चेतन्यारूपायाश्चितः शक्तिः
वासनाबीजरूपिणी वासनारूपा तद्बीजाज्ञानरूपा कस्वायधर्मिणि निद्राहेतुश्च विद्येति॥ यद्यस्याश्चित्स्वरूपे हेतोश्चितः
स्वरूपस्य तत्त्वसिद्धमदर्शनं अप्रतीतिः सा आवरणशक्तिरविद्येत्युच्यते॥ यत्तदविद्येति पाठे तद्दर्शनकारणं विद्ये
त्युद्देश्यगतलिंगोपादानान्नपुंसकत्वं॥७॥ अविद्यायास्तु भागेन प्रधानेनेतरेण हेतुना तावद्द्योवन्निथोवर्णद्वयं श
न्येष्ठिवं तु वेशः॥८॥ अविद्याया उक्तलक्षणायाः गुणत्रयात्मकत्वात् गुणानां च भूयस्त्वे केचि विविधत्वान्नवधा विभक्तायाः
प्रधानभूतो यो भागः शुद्धसत्वरूपः तेन विद्याशब्दवाच्यत्वेन भागेनेतरेण मविद्याभागं तावद्धेतुशायावद्भागद्वयं वि
द्याविद्यारूपं मिथो घर्षणात् परस्पराभिभवात् हदं सम्यक्संयमयेश॥ विद्ययाऽविद्या निवर्त्यमाना विद्यामपि
निवर्तयति॥ अन्यशब्देनापांत्यशब्दइवेतिभावः॥७॥ एतावदेवाविद्यावैनेदं ब्रह्मेति निश्चयः॥ एवमेवरूपोऽस्यायं
ब्रह्मेदमिति निश्चयः॥९॥ इदं जगत् ब्रह्म न ब्रह्मात्मकं न भवति। किंतर्हि बियदादिरूपमेवेति यो निश्चयः एतावदेवा
विद्यावैभविद्याव्यापारः॥ इदं ब्रह्मेति यो निश्चयः एवमेव तस्या अविद्यायाः क्षयइति संक्षेपः॥ आत्मकृतमनुसरति नि
श्चय इति॥ श्री ~~सामान्या~~ निश्चयो यो हरादीनां हृदि तिष्ठति निर्मलः॥ ऋषीणां नारदादीनां सततेजवउशधवाश्चाहरादी
नां देवानां नारदादीनां ऋषीणां च हृदि यो निश्चयो निर्मलो निश्चयो नियमो वर्तते स निश्चयस्ते तव उत्तमपि तमेव जीवन्मु
क्तमार्गमवलंबस्य स्वधर्म्यः॥१०॥

श्री॥
२८०

२००

533

श्रीराम उवाच ॥ येन तत्वगा वक्रधीरा निश्चयेन महाधियः विशोकाः संस्थितास्तन्मे ब्रह्मन् ब्रूहि तत्वतः ॥४५॥ एते हरादयो ये
न निश्चयेन विशोका जीवन्मुक्ताः संस्थिताः तं निश्चयं तत्वतो मे प्रब्रूहि ॥ शेषं स्पष्टं ॥४५॥ वसिष्ठ उवाच ॥ यदिदं किंचिदाभाति ज
गज्जालं प्रदृश्यते तत्सर्वममलं ब्रह्म ह्येवमेव स्थितं ॥४६॥ प्रतीयमानं दृश्यमखिलं ब्रह्मैवेति तद्वादिनां निश्चय इत्यर्थः
॥४६॥ एतदेव प्रपंचयति ब्रह्मेति ॥ ब्रह्म विश्वं भुवनं ब्रह्म भूतपरंपरा ब्रह्माहं ब्रह्म मच्छत्रुर्ब्रह्म मन्मित्रबांधवाः ॥४७॥ अकारि
का विस्त्रकार्यं च चेतनाचेतनात्मकं ब्रह्मेत्यर्थः ॥ भूतपरंपरा वियदादिमहाभूतसमूहः अहमिति प्रमच्छत्रुरिति च हरादीव
निश्चयः स्वरूपाभिनयः ॥ ज्ञानं चैकमेवेदं जगत्कथं कस्यचित्सुखाय कस्यादिसा शोकाय दृष्टांतेनोपपादयन्नाह ॥ अज्ञस्य
ति ॥ अज्ञस्य दुःखौघमयं ज्ञस्यानंदमयं जगत् ॥ अंधं भुवनमंधस्य प्रकाशं तु सुचक्षुषः ॥४८॥ ज्ञानाऽज्ञानकृतोऽयं विशेष
इत्यर्थः ॥ शिष्टं समानं ॥ ज्ञानप्रकारमेव सदृष्टांतमाह सर्वमिति ॥ सर्वमेव हि ब्रह्मेति भाविते ब्रह्मवेद्यमात्रापीन्द्रेऽमृतेऽमृतम
यः को नाम न तत्रैव क्लिन्नः ॥४९॥ भावितेति निश्चिते । स्पष्टमन्यत् ॥४९॥ आभासमात्रममलं सर्वं भ्रान्त्यैव बोधकोऽसि सर्वं चावस्थितेर
तं विज्ञस्येयं नु पश्यतो ॥५०॥ आभासमात्रे विषयासंस्पृष्टज्ञानरूपं यद्रक्तं तच्चिद्रूपमिति परब्रह्मेत्येवं पश्यतो चिद्रूपग्राहक
ह ब्रह्मणो निवृत्त्यर्थं ॥५०॥ एतदेवोदाहरणेन स्पष्टयन्नाह असंरक्तेति ॥ असंरक्तता ह्यगाल्लोके मनस्यन्यत्र संस्थिते साङ्ग
तीति नागरकाः तत्राचिद्रूपोऽस्मि सर्वगः ॥५१॥ असंरक्तस्य पूर्वमपरिचितस्य लोकदर्शने सति मनसि वान्यत्र वस्तुन
स्वाभिमते संस्थिते सति अनागरकानि खिलविकल्पनिर्मुक्ता या प्रतीतिरस्ति तत्सर्वगं चिद्रूपोऽस्मि ॥ अत्रासंरक्तेस

धगास्या

चिद्रूप

का२

नविकल्पानांनोदयस्तुक्तं।अध्यगेस्यनेनकालविलंबाभावान्निर्विकल्पोदयस्यावकाशोनास्तीतिदर्शितौमनसोऽन्यत्र
स्थानकथनात्तात्कालिकविकल्पकल्पनापिनसंभवतीतिसूचितंमित्यनुसंधेयंनरामतीतिरेवनोदेतीतिवक्तुंयुक्ते
बाह्येंद्रियबाह्येंद्रियग्राह्यादिकयाबहिर्मुखायाःसंविदःप्रकाशकत्वाव्यभिचारात्॥अथन्यथानिर्विकल्पेऽपिजीवंत
न्मूलस्यसविकल्पस्याप्यनुदयप्रसंगात्॥कालांतरेकिमत्रकश्चिदागतइतिपृष्टस्यतद्विषयस्मरणसंभवाच्चतस्मान्नि
र्विकल्पतया।विषयदोषनिर्मुक्तानिर्मलाप्रतीतिरस्तीति।अभ्युपगंतव्यं॥सर्वसंकल्पफलदंसर्वतेजःप्रकाशकंसर्वा
धारेयस्मीमांतंविदात्मानमुपास्महे॥५२॥सर्वेषांसंकल्पानांफलदंजगत्त्वामितानात्वाहशंविदात्मानमुपास्महे॥शां
तसर्वसंकल्पेविगता।खिलकौतुकंविगताशेषसंरंभंविदात्मानमुपास्महे॥५३॥स्पष्टो॥इतिनिश्चयवंतस्तेमहां
तोविगतेनसः।सत्यासत्येपदेशांतेसमेसुखमवस्थिताः॥५४॥इतिनिश्चयवंतः।उक्तप्रकारनिश्चययुक्ताः।अत
एवविगतेनसोनिःपापाःसत्यसतिसद्रूपेब्रह्मणिसाधवस्तेनारदादयोमहांतःसमेएकरूपेशांतेनिर्विशेषे
अबाध्यस्वरूपेपरेब्रह्मणिसुखंयथातथाअवस्थिताइतिव्याख्येयं॥इतिपूर्णधियोधीराःसमनीरागाचेतसः
नानंदंतिनिंदंतिजीवितंमरणंतथा॥५५॥इत्यनेनप्रकारेणपूर्णधियःपरिपूर्णबुद्धयोब्रह्मनिष्ठत्वात्॥अतएवे
ष्यतएवसमंनीरागानचेतोयेषांतेधीराःजीवितेननंदंति।आत्मारामत्वात्॥श्रीरामउवाचसम्यग्व्यक्तानविल

३सस्यासस्यइतिपाठेहमनम्बालस्येह ह्रूमत्ताउभसस३

श्री॥ २ को

२६

सनवासनाविलयोदयो जीवन्मुक्तेपदे ब्रह्मन्नूनं विश्रांतवाहनं ॥ सम्यग्ज्ञानस्य विलासेन महिम्ना प्राणनिरोधेन
वा कथं केन प्रकारेण वासनाविलये सति जीवन्मुक्तो विश्रम्यते ॥७॥ वसिष्ठ उवाच ॥ संसारोत्तरणे युक्तिः योगशब्देन क-
थ्यते ॥ आसमाप्तप्रकारोस्य प्राणानां संयमस्तथा ॥८॥ संसारस्योत्तरणे या युक्तिरुपायः स एव योगः स च आत्मज्ञा-
नं प्राणनिरोध इति द्विविधः ॥ शेषं स्पष्टं ॥ प्रकारौ द्वाव पि प्रोक्तौ योगशब्देन यद्यपि तथापि रूढिमायातः प्रा-
णयुक्तावसौ भृशं ॥९॥ प्रकारद्वयसाधारणोपि योगशब्दः प्राणनिरोधे तत्र रूढ इति अर्थः ॥ ॥ असाध्यः कस्यचि-
द्योगः कस्यचिज्ज्ञाननिश्चयः ॥ प्रकारौ द्वौ ततो देवो जगाद परमः शिवः ॥१०॥ स्पष्टं ॥ ॥ तदिदं यथई वाक्यं तत्प्रोक्तं उवेतस्मा-
न्योगक्रममथो शृणु ॥ तत्संसारोत्तरणसाधनं उवते पूर्वमेव प्रोक्तं ॥ अतः परं योगक्रमं प्राणनिरोधस्योपायं त्वं शृणु
॥ ॥ अत्र ते कथयिष्यामि वृत्तांतं परमाद्भुतं ॥ ज्ञानं ॥ अहं कदाचिदास्थाने स्वर्गे तिष्ठन् शतक्रतोः ॥११॥ शृणुत नारदादिभिः
कथास्ताश्चिरजीविनां ॥ कथाप्रसंगे कस्मिंश्चित् अथ तत्राब्रवीद्वचः ॥१२॥ शातातपो नाम मुनिः प्रस्तावे चिरजीविनां ॥
१३॥ साईद्वयमेतस्य स्पष्टं ॥ ॥ मेरोरीशानकोणस्थे पद्मरागमयोज्ज्वले ॥ अस्ति कल्पतरुः श्रीमान् शृंगे सर्वमनोरमे
॥१४॥ पद्मरागमयोज्ज्वले ॥ पद्मरागमणिमयाज्ज्वलित्तरुगुल्मादयो यस्मिन् मेरोः शृंगे कल्पतरुरस्तीति संबंधः
पद्मरागमये दीप्यतीति पावे पद्मरागमये मेरोः शृंगे याद्योः स्वर्गः तत्र कल्पतरुरस्तीति योजना ॥ एकविंशाः पमीत्यच

कोटरप्रदेशाः ८

निविष्टामेरुसूहनीतिखर्गाणां वाञ्छल्यश्रवणात्॥७॥ तस्य कल्पतरोर्मूर्ध्नि दक्षिणे स्कंधकोटरे। कस्मिंश्चोज्वलताशोभे
विद्यते विमलाशयः॥८३॥ स्पष्टः॥७॥ तस्मिन्निवसति श्रीमान् भुशुंडो नाम वायसः। वीतरागोद्य कोशोऽस्वैव निजपं
जरः॥९॥ तस्मिन्विहगालये भुशुंडो नाम भुवनेषु सर्वेष्वपि सुखं रमते विहरति। भुशुंड इति प्रसिद्धः॥७॥ स्पष्टमन्यत्॥
स यथा जगतां कोशे जीवती हसुराच्चिरं। चिरंजीवी यथा स्वर्गे न भूतो न भविष्यति॥९५॥ स दीर्घायुः सनीरागः सश्री
मान्सम लाम तिः स विश्रांतमतिः शीतः सकांतः कालको विदः॥९६॥ इति तेन भुशुंडो सौ भूयः पृष्ठेन वर्णितः॥ यथा
वदेव देवानां सभायां सत्यमुक्तवान्॥९७॥ कथावसरसंप्राप्तां तं वयं यातेसुरव्रजे। भुशुंड विहगं द्रष्टुं अहं यातः कौ
हलात्॥९८॥ भुशुंडः संस्थितो यत्र मेरोः शृंगोत्तमोत्तमो। कल्पांगमहमद्राक्षं निमेषार्द्धेन राघव॥९९॥ श्लोके पंचकु
मे तस्य स्पष्टः॥७॥ तस्य कच्छे गुंजेषु लतापत्रेषु पर्वसु। अभ्यन्तरालयसंलीनान् विहगान् दृष्टवानहं॥१००॥ कच्छाः जलप्रायाः
जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः। कुंजाः लतादिभिः पिहितप्रदेशाः। निकुंजकुंजौ वा क्लीबे लतादिपिहितोद
रे इत्यमरः। लताः शाखाः। पत्राणि पलाशानि। पत्रं पलाशमित्यमरः। पर्वाणि ग्रंथयः। ग्रंथिर्ना पर्व परुषी इत्यमरः। ते
ष्वालयान् विधाय तत्र संलीनान् विहगान् दृष्टवान् भुशुंडावयवणार्थमित्यर्थः॥७॥ निशानाथकलाखंडे मृ
णालदाकलेधितान्॥ चिरविरथहंसानां पोतकान्सोमगायिनः॥१०१॥ निशानाथेति चतुर्भिः श्लोकैर्वाक्यार्थ

ओंध

२७२

२२१

537

कीर्णमंत्रनिर्घोषैर्नृत्यत्साहाकारनिःस्वनैर्नानापशुकाननकाशान्नवानुरुध्यमानं त्रिशृंगं शिखिशिखाशिखान्नु
गौरीरक्षितबहोधान्नसमाराध्वरबर्हिणः ॥ स्कंदोपन्यस्तनित्यशेषशैवविज्ञानकोविदान् ॥७३॥ तत्र पश्यामि हं या
वदेकांतेस्कंधकोटरे ॥ पंच परिच्छिन्नाकाराः सजायां वायसान् स्थिताः ॥७४॥ चिरं चिरं अथ हंसपोतकादीन् प
क्षिणो यावत्पश्यामि तावदेकत्र स्कंधकोटरे सभार्यां वायसाः अपरिच्छिन्नाकाराः स्थिता इत्यत्र्यः ॥ अप
रिमितवयसं गुरुसन्निधौ चापरानौ विद्यात् ॥ अंतर्मुखत्वादितिवेदितव्यं ॥ हंसादीनां सामगायनेमंत्रोच्चारण
शैवागमविज्ञानादिकं अनलोकादीमहर्षिभिः सामगानादौ सहवासादितिद्रष्टव्यं ॥ दूरस्थमानं ॥ छातवांमध्य
स्थितः श्रीमान् भुसुंडः ज्ञोन्नताकृतिः परिशेषमना मौनी समः सर्वांगसुंदरः ॥७५॥ प्राणस्पंदावधानेन नित्यमंतर्मु
खः सुखी ॥ प्रसन्नगंभीरमनाः पेशलः स्निग्धवाक्सुरवधीः ॥७६॥ अथ तस्याहमपतं दीप्यमानं च्चचक्षुः पुरः ॥ भु
शोऽन वायसस्थानं नीलोत्पलसरःक्षणं ॥७७॥ अहो किं त्वमपि श्राद्धदर्शनान्मामनंतरं खे खेडस्कं च सिद्धोयं प्राप्तं ह
त्यवबुद्धवान् ॥७८॥ पात्रपुंजात्समुत्तस्थौ मेघशावइवाचलात् ॥ हंसमुने स्वागतमिति प्रोवाच मधुराक्षरं ॥७९॥ मामुवाच मे
हातेजाः सोऽहा हर्षान्मधुराक्षराः ॥ साहर्षं चक्रमे तत्स्पष्टं ॥८०॥ संकल्पमात्रजाताभ्यां सकराभ्यां कुसुमांजलिं मध्य
मास्तुत देवादौ मे घोऽहमिवाकरं ॥८१॥ सत्यसंकल्पनया संकल्पमात्रकरोद्धाडुर्ह्नाविस्थतः ॥ हे मधुकर मिव

सौवर्णगुच्छप्रकारमिव शिशुसमानं ॥ ६॥ इदमासनमिदमर्घ्यमानवं कल्प्यते रुच्छदं ॥ ७॥ यातिन्येमहाबुद्धिः स्वय
मेवस्वगाधिपः ॥ ७॥ समंतात्खगवृंदेषु दर्शनोन्मुखदृष्टिषु तस्मिन्कल्पलताकुंजे रूपविष्टोहमासने ॥ ८॥ अर्घ
पाद्यादिसंपाद्य भुशुंडस्तुष्टमानसः ॥ मामुवाच महात्मा तेजाः सौहार्दमधुराक्षरं ॥ ९॥ भुशुंड उवाच ॥ अहो नु भगवता
स्माकं प्रसादोद्य दर्शितः चिराद्दर्शनामृतसेकेन यत्सिक्ताः सद्भाव ये ॥ १०॥ किमर्थमद्यागमनं हे रो नासाकदर्थि
तः ॥ वचनश्रवणोत्का नो आज्ञानोदात्तमर्हसि ॥ ११॥ त्वत्पाददर्शनादेव सर्वज्ञाने मयामुने ॥ चिरजीवितवात्रामि

वः६ वयं वांस्मृतिमागताः ॥ १२॥ श्लोकषट्कम तत्स्पष्टं ॥ ज्ञातेवदागमोप्येवं यत्त्वां पृच्छाम्यहं मुने ॥ भवद्वाक्यामृतास्वा
दवांछेवमपिजृंभते ॥ १३॥ ज्ञाते त्वदागमोपि भवगत्वदागमननिमित्तोपि एवमनेन प्रकारेण बोधयस्मात्कारणात्तु
इच्छामि सर्वं कारणभूता भवद्वाक्यामृतास्वादवांछैव अतिजृंभते ॥ भवद्वाक्यश्रवणवांछैव भवदागमननिमित्तं
ज्ञानन्त्विपृच्छामीत्यर्थः ॥ इत्युक्तवान्सो पक्षी भुशुंडश्चिरजीवितः ॥ त्रिकालमलसंवेदी तत्रोक्तइदं मया ॥ १४॥
विहंगमहाराज समस्तसमतत्त्वयाच्युते इच्छुमभ्यागतोस्यधन्यामेव चिरजीविनां ॥ १५॥ त्वात्तदेतत्संशयं छिंधि भग
वन्मम तत्त्वतः ॥ कस्मिन्कुले त्वं जातोसि ज्ञातज्ञेयं कथं त्वया ॥ १६॥ कियदायुश्च ते साधो दृष्टं स्मरसि किं च वा ॥ केनायं
नाविवासस्तो निर्दिष्टो दीर्घदर्शिना ॥ १७॥ [illegible] ॥ अथ रामभुशुंडोसौ नवहृष्टो नवकंधीः ॥ यत्पृष्टमि
त्युनेस सर्वं शृणु तत्कथयाम्यहं ॥ १८॥ भवादृशामिमामाज्ञां कोविलंघयितुं क्षमः ॥ इत्युक्त्वा विहगाधीशः सर्वं कथितवा
निदं ॥ १९॥

श्री॥

२९३

२१२

उक्तं उवाच ॥ अस्त्यस्मिन् जगति ज्येष्ठः सर्वलोकनिवासिनां देवदेवो हरो नाम देवदेवाभिवंदितः ॥ ९६ ॥ स्रोत
लकमेतस्य हि ॥ खिरः उं खुरां खुरकरां करस्वामुखोदरां ॥ सक्रोशजे भवक्राश्च प्रमथा यस्य लैकैसकाः
खिरसि खुराः शफा निये षां ते वा खुरकराः खुराकाराः करा येषां ते वा करदंताः करस्थादंता येषां ते वा मुखो
राः मुखान्युदरेषु येषां ते वा ॥ रैक्रोशजा उवक्राश्वा नक्राः महत्काः उष्ट्राः क्रमेलकाः ॥ अजाः छागाः ॥ इभा
गजाः ॥ तेषां वक्राणीव वक्राणि येषां ते तादृशा आननानि रूपाः प्रमथा यस्य देवस्य लालकाः क्रीडाहेतवः
यथागणास्तथैवान्याः परिवारास्त्वमितरः ॥ दृश्यंति मातरस्तस्य पुरो भूतगणान्विताः ॥ ९६ ॥ वसंति निर्ऋति कुवे
ष्ण्यो मिलोकांतरेषु वा ॥ अवदेषु रमसानेषु शरीरेषु च देहिनां ॥ ९७ ॥ जया च विजया चैव जयंती चापराजिता
सिंहारक्ता लंबुका सा उत्पला चेति देवताः ॥ ९८ ॥ सर्वासामेव मातॄणां अष्टावेता नायकाः ॥ आसां मनुगता
स्त्वन्यास्तासां मनुगता धेना ॥ ९९ ॥ तासां मध्ये महाहर्षिणां मुनिनायकाः ॥ आसां मनु ॥ तास्त्वन्यास्तासां मनु
ताः परा ॥ १०० ॥ तासां मध्ये महाहर्षिणी मातॄणां मुनिनायका ॥ अलंबुसेति विख्याता मातामानं दाविघते ॥ १०१ ॥
षडेते श्लोकाः स्पष्टार्थाः ॥ ७ ॥ वज्रास्थितुंडं स्वं जाख्य इंद्रनीलाचलोपमः ॥ तस्यास्त्वाहनं काको वैष्णव्या
रूढा यथा ॥ १०२ ॥ वज्रास्थितुंडः वज्रवत्कठिन मस्थितुंडं अस्थिमयं मुखं यस्य सः ॥ चंडास्यः चंडउ ...

सा।१

सस्य ताहृशः काकस्तस्या अलंबुकौयावारुनमस्ति।शिष्टं समातं।२।इत्युक्तैश्वर्यं युक्तास्ता मातरो रौद्रचेष्टिताः
कदाचिन्मिलिता व्योम्नि सर्वाः कृतापिरुह्नताः।३। उत्सवं परं मंत्रं चक्रुः परमार्थप्रकाशकं।जहसुर्नन्नृतुश्चैव प
प्रसुस्वैर्जगुस्तथा।४।इत्थं सर्ववर्तमानंतासां वाहास्तथा श्रमाः।तथैव मत्ताजहसुर्नन्नृतुः पप्रुस्तासवं।५।तत्रैक
ासवोन्मत्ताः काचिन्नेदुरंबरे।६।अथ हंसस्तथा बाल्यः काकश्चालंबुसारथिः।६।संजातरतयस्तत्र सर्वाहं
स्यो मदाकुलाः।रेमिरे सह काकेन चंडकेनाथ मातरस्तदा।७।अथ तासां गर्भधारिण्यो बभूवुरतितोषिताः।देव्यश्च
हतनृत्यास्ताः प्रशांतमदतांडुययुः।८। ततो देव्यो हरश्चैव परिवारसमन्विताः।सुर्वाः संतुष्टमनसः स्वात्म्य
मुपययुर्हिरौ।९।अनंतवल्यो बभूवुस्ता ब्राम्ह्यो हंसस्य मुनीश्वर।वृत्तांतं कथयामासुर्ब्राह्म्यादेव्या यथा स्थितं।१०
प्रस्फुवाचाहं वरस्यः सांप्रतं वसर्वत्यो मेरथकर्मिणि।न समर्था उवैसा स्त्रियैर चरत सांप्रतं।११।इति गर्भालसा
साहंसीरुक्ता देवी दयापरा।निर्विकल्पसमाधाने ब्रासीतस्थौ यथा सुखं।१२।हंसस्योपि पक्षिगर्भस्ताः सुव
सुःयथाक्रमं वीरिं ब्यपसरसिस्फारेतनयानेकविंशतिः।१३।एवं तास्य स्त्रहंसीभ्यो जातावयमिमे मुने।भ्रातर
चंडतनयाश्चायसा एकविंशतिः।१४।मातृभिः सहंसीभिः ब्राह्मी भगवती तथा।ततः चिरमाराधितास्माभिः
समाधिविरतासती।१५।प्रसादपरया काले भगवत्यानतः स्वयं।तथैवानुगृहीताः स्मोयथा मुक्तावयं स्थिताः।

श्री॥
२८४

२१

541

तिष्ठाम इति निश्चित्य पितुः ॥ ...श्चैवयं गताः ॥१७॥ वं दिव्यापि तरं तत्र न
मत्त्वबुस ॥ ... ॥१८॥ प्रसादेन प्राकवृतस्तदावयं ॥१९॥ तातत्रातमत्तेजोयआत्मा देव्याः प्रसादेतः ॥ किंवे
ः स्थानमभिवांछाम उत्तमं ॥२०॥ तेनायं सर्वबाधानां अगम्यः कल्पपादपः ॥ कथितं स्थानमस्माकं ज्ञातिनं
र्शनी ॥२०॥ ततः कृतनमस्कारास्तस्माद्देशाद्विनिर्गताः ॥ इमं कल्पतरुं प्राप्य तिष्ठामो विगतक्लेशाः ॥२१
...मफलितैः पुण्यैः चिरकालोपसंभृतैः ॥ निर्विघ्नमवपश्यामि यकवे तं मुनीश्वर ॥२२॥ स्पष्टयेश्लोक विश्राति
...सायनमयी ज्ञाता परमानंददायिनी ॥ तानंदयति कं नाम साधुसंगतिवृंदिका ॥२३॥ रसायनमयी रामादिदं
षनिवर्तकत्वात् ॥ शीतातापत्रयापाकरणात् परमानंददायिनी ज्ञानोपदेशात् हे वत्साः ॥२४॥ वैते तासाधुर्तो स
गतिरूपा वृंदिका नानंदयति ॥ छान्नातः परतरं किंचिन्मन्ये कुशलमात्मनः ॥ संतोयदनुगाम्यं ते सत्यके सद
लिषणाः ॥२५॥ अधिगत परमात्मनोपि मन्ये सवदेव लोकनशीतऽहत स्याममसफलमि... धज्जन्मसाधोः
कलभयापहरो हि साधुसंगः ॥२५॥ वसिष्ठ उवाच ॥ इत्युक्त्वा ध्यंवपाद्यं च तेयोदत्तवतिस्वयं ॥ भुक्तुं विहगान
स्मिन्निदं रामा... हमुक्ते नारद ॥२६॥ वातरस्ते निहंगशाता हरेस्वामभ्राम्रियः ॥ इह कस्मान्न हरयं तत्वमेवैको हि देव्य
सा ॥२७॥ शुकउवाच ॥ तिष्ठतामिह नः कालो भूयानेतिगतो मुनो ॥ अनुगानां पक्षयः क्षीणाः कल्पानां च मलामतो ॥२८

एतावता च कालेन सर्वं एवम मातृगणाः तत्श्रेष्ठ स्तम्भसिवत्य स्कांशिवपरिणताः पदाः स्था दीर्घायुषो महांतोपि संता
पिबलिनोपि वा। सर्व एव निमीर्यंते कालेनाकलितात्मनो॥३०॥ अहमुवाच कल्पांतेषु महाबुद्धे वदस्वन्य
भुवा भुवा प्रतपत्सु तथा केषु कथं तिष्ठसि विह्वरः॥३१॥ भुशुंडउवाच यदा शाम्यति कल्पांते व्यवहारो जगन्मते
कृते स्तइव सन्मात्रं तदानीं इयं ज्ञान्यहं॥३२॥ न चेतस्य पदार्थाः॥ छा अकाशाद् इव तिष्ठामि विगताखिलकल्पनो॥ स्त
ब्धप्रकृतिसर्वांगो मनो निर्वासनं यथा॥३३॥ स्तब्धप्रकृतिसर्वांगः स्तब्धानि स्थला प्रकृतिः शरीरं सर्वांगानि सर्वावय
वा यस्य स ताहृशः स न्॥ निर्वासनं मनइव वासनाहीनं जीवन्मुक्तचित्तमिव। विगताखिलकल्पनं विगताभि
…कल्पनाय स्मिन्कर्मणि तद्यथा स्यात् सर्वकल्पनारहितं यथा तथा तिष्ठामि दग्धप्रकृतिसर्वांग मिति वा पाठः
…नादग्धा प्रकृतिरविद्या सर्वांगानि कामसंकल्पचिकित्सादीनि यस्येति मनो विशेषणं वेदितव्यं॥ छवि
…तौ॥ आवर्त मपति यदादित्याप्र… तपंति यदादित्याव्योमांगणजानतो हं। वारुणीं धारणां बद्धा तदा तिष्ठा
…॥३४॥ यदा … मये … दादित्या … ज्ञापि सुगापदेवोदिताः प्रतपंति तदा व्योमांगणगतो हं वारुणीं
…र्निश्चयबुद्धिस्तिष्ठामि वर… णोयथा… पो मभ्यासीनो बाधमा

श्री॥
२८५



543

तिष्ठति १

तपसंतापं मां व गच्छति तद्वत् कुंडोपि वरुणभावनया तन्मयत्वमासाद्य तद्वदेव संतापनात् उन्नवती स्पर्श्यः ।छ। यदा
लिताडीद्रावो तिन्नलयवायवः पार्वती धारणां बध्वा खे तिष्ठाम्यचलं तदा ।२५। यदा प्रलयवायवः शोकलिताडीद्रावाति
न्तदा पार्वती धारणां बध्वा खे आकाशे चलं तिष्ठामि ।२६। यदि षष्ठानामेव पर्वतानां संहार्यं वृत्ते तत्रैव प्रलयवायुसंरंभात्
संतप्तसंरंभविषयेष्ट तांडव रिंगाकाशे साधारणवायुसंदो भा भावाय पार्वती धारणामालंब्य सुखं तिष्ठामीत्यर्थः ।छ। ज
गत्संपत्संभवाद्दिभान्यैकार्णवे तायदा वायवी धारणां बध्वा खे स्वेवे चलधीस्तदा ।२६। एकार्णवसमये पि वायुधारणा स्वं
वेत्पर्यंतरानिः स्पष्टमन्यत् ।छ। ब्रह्मांडे तिस्रो लोकत्रये वा कथं ब्रह्मांडपरमासाद्य त्वांते विमलपदे सुषुप्तावस्थया तावत्
तिष्ठाम्यचलरूपया ।२७। यावत्पुनः कमलजः सृष्टिकर्मणि तत्र प्रविश्य ब्रह्मांडे तिष्ठामि विहगालये ।२८। प्रलये सति
ब्रह्मांडस्य पारं परिभोगमासाद्य नवांते ब्रह्मांडावरणे … तानामसृष्टेर्वा आकाशे हंकारमहत्प्रकृतिरूपाणां सम
नोत्तवा नामंते विमलपदे सुषुप्तावस्था यासमाध्यवस्थया तावत्तिष्ठामि ।छ। यावत्कमलजः पुनः सृष्टिकर्मणि
प्रतितदा पुनः सृष्टो ब्रह्मांडं प्रविश्य विहगालये तिष्ठामि ।छ। वसिष्ठ उवाच । कल्पांतेषु तिरश्चां हि दुर्लंघ्यापारम
शरीरमये दृष्टेन वै भाव्यं भाव्यमन्येष्वतादृशोः ।२९। यतिनियमकं साकापारमेश्वरीशक्तिः … ।छ।
नराक्यते चालयितुमवश्यं भवितव्यता । यद्यथा तत्तथैव तद्धि त्वगावस्यैव निश्चयः ।३०। चालयितुं विलंघयि
।२४। यथा तिष्ठसि पक्षींद्र धारणाभिः स्वं … कल्पांतेष्वत्र तथा तस्मादन्ये तिष्ठंति योगिनः ।२।

ना २

तुंभवितव्यता दैवगतिः नियतिः ईश्वरवादे भवितव्येति निरीश्वरवादे दृष्टस्वभावस्येत्यद्वैतं निश्चयइतिस्वभा
वादइतिमतभेदेनोक्तमित्यनुसंधेयं ॥ ७ ॥ ज्ञाने विज्ञाने वा धीरा योगयोग्यमनोगतिः ॥ किं किं स्मरसि कल्पा
चित्रमस्मिन्नुगात्रया ॥ ८ ॥ तत्र ज्ञानं मोक्षहेतुस्तत्वज्ञानं विज्ञानं लौकिकं निखिलकलाशास्त्रादि विज्ञाव
नं चित्रमाश्चर्यं ॥ ७ ॥ भुशुंड उवाच ॥ आसीत्तत्र शिलाहेमजा वृत्तपादपी रुक्मी ॥ अशेषत्वनदरौघां स्मरामी म
धरामधः ॥ ४३ ॥ आभोः तीते कल्पांतरागो वस्पष्टं ॥ ७ ॥ दशवर्षसहस्राणि दशवर्षशतानि चानुसमाभारभरा
र्णां संस्मरामि धराधमः ॥ ४४ ॥ शोषणदहनानंतर विलं वितायाम तिस्रष्टावेकादेश सहस्राणि वर्षाणि भूभ
भारपृष्ठे वर्णे वधरा स्थितेत्यर्थः ॥ ७ ॥ चतुर्युगांतमिति श्लोकद्वयं वाक्यं ॥ चतुर्युगांतमपरां नीरंध्रां वनपादपे
चतुर्युगामपरां नीरंध्रे स्वलेहितां ॥ ४५ ॥ अनगेस्याभिमामेक विंध्यपर्वततां गतां ॥ चतुर्युगांतमपरां संस्मरामि
गकुटी ॥ ४६ ॥ अपरां कल्पांतरगतां शृंगकुटीं जगदाधारस्तंभधरां चतुर्युगांमितं एकस्मिंश्चतुर्युगे वनपादपे
नीरंध्रां संस्मरामि ॥ अन्यस्मिंश्चतुर्युगे नीरंध्रे स्वलेहितां संस्मरामि ॥ अन्यस्मिंश्चतुर्युगे अगस्त्येन महविंध
स्त्यां अतएव नियामकाभावादेक विंध्यपर्वतां गतां विंध्य नैवेके न व्याप्तां स्मरामि ॥ ७ ॥ सुरापत्राः
येतानतिविहंसुरसद्दकां स्वेरहतिसती कं चकं क्विसर्गं स्मराम्यहं ॥ ७ ॥ सुरापाज्ञात्मपायस्मिन्निविहि

२८

बालैरपिविहितासाक्षात्स्मर्यंतेतास्तुकोग्रहः

सा०ई२

वर्जितंसुरायानाः स्रजायस्मिन्स्वैरहस्तयःस्वेच्छाचारिण्यःसस्तःकुलांगणीयस्मिंस्तादृशंकंकस्मिंसर्गेऽहंस्म
रामि ॥६॥ जन्मेतिश्लोकत्रयंवाक्यंजन्मेंद्रभास्करहीरादीनामिंद्रोपेंद्रव्यवस्थितिंहिरण्याक्षापहरणंवराहोद्ध
रणादितेः ॥७॥ कल्पनंपार्थिवानांचवेदानयनमेवच । मंदरोन्मूलनं [illegible] बुद्धस्मृतार्थंचमंथनं ॥८॥ प्रजापत्र
गरुडंसारंगाणांसमुद्भवः इत्यादिकायाःस्मृतयःस्वल्पातीतजगत्क्रमाः ॥९॥ इंद्रभास्करादीनांजन्मतस्मि
इंद्रोपेंद्रव्यवस्थितिंइंद्रस्यचोपेंद्रस्यचमर्यादांस्थितिंहिरण्याक्षेणापहरणंवाराहेणोद्धरणंपार्थिवानां
मन्वंतराधिपतीनांकल्पनंवेदानांसामकेतुनात्रिणापहृतानांमत्स्यावतारेणानयनंमंदरस्यमंथा
परिकल्पनायस्तुराज्ञोरेरुन्मूलनं अमृतार्थमब्धेर्मंथनंचऋतीयास्मृतिरस्ति इत्यादिका एवमादयःस्वल्पा
तीतजगत्क्रमायास्तुताःस्मृतयःसन्त्यार्थाः बालैरपिस्मर्यंते अतःकारणात्तासुस्मृतिकोग्रहःकोवाआ
दरःमांप्रत्येतादृशोवृत्तांतोनप्रष्टव्यइतिभावः ॥६॥ ननुइतिश्लोकद्वयंवाक्यंननुजगतिजातेभगवन्युष्म
दादिभ्यःभरद्वाजपुलस्त्यवसिष्ठनारदेदेदमरीचिभ्यः ॥१॥ सनत्कुमारताविद्विश्वक्रेदेवचंद्रवर्नादिभ्यःगौरीसरस्वती
लक्ष्मीगायत्र्याद्यास्तुस्त्रीभ्यः ॥१२॥ युष्मदादिभरद्वाजादिभ्यःसनत्कुमारादिभ्यःवयस्मरणंतथाअद्यतनसर्ग
भवयस्मरणंतत्रस्मरणेकागणनाकोवाआदरः ॥११॥ रम्यंत आद्यतनसर्गभ्यःस्मरणेगणनवका ॥१२

546

भ:७

मुनेते अस्तुत्तस्य जन्माष्टकमिदं किलासंस्मरास्यष्टमं सर्गं तस्मिं स्त्वं मम संगतः॥५३॥ अस्तुतस्य मां अस्तणा
मानसस्तुत्रस्य तेइदीं जन्म किल अष्टमं विशिष्टमे जन्मनि अस्तुत्व जाय ते इत्यर्थः॥ तस्मिन्नष्टमे सर्गे जन्म
नि तमेव संगतं इदानीं वर्तमानमपि सर्वमेव स्मरामि॥७॥ जन्मोत्तरे शुक्लता जायते इत्यत्राह कदाचिदिति
कदाचिज्जायसे व्योमतः कदाचिज्जायसे जलात्॥ कदाचिज्जायसे शैलात् कदाचिज्जायसे नलात्॥५४॥ क
दाचित् किं समं स्विन्मन्वंतरे स्पष्टमहं स्मर॥७॥ अंतर्हाने गता धावीवारे पंचकमुहूर्ता मुने पंचसु सर्गेषु क्रमपि
व पयोनिधेः॥५५॥ अंतर्हाने एकार्णवजले तिरोधानं क्रमेणैव नतु युगपत् हिना शीर्षसमानां॥७॥ स्मरामि
दशं वेदं अमृता जो विमंथरी वारत्रये हिरण्याक्षो नीतवान् वसुधां धीमन्॥५६॥ रेणुका जन्मतः यतः प्रष्ट
वारमिमं हरिः॥ गते कलियुगानां वहरे वृहद्दशा गतं॥७॥ इदं यमेतस्य पृष्टं॥७॥ त्रिंशद्विद्युर विक्रो मारूढो दक्ष
धरसंक्रयौ दशाराक्षविघातं च देशमौलेः स्मराम्यहं॥५८॥ केन विद् विनयेन तु शुभावेदमौलेः संस्क
शादशानां राक्षसाणां विघातार्थं सर्वमनुजस्ता निदानं स्मरामि॥७॥ बाणार्थमेषोसं ग्रामान्प्रधरस्य मत्रय
रास्यष्टं॥७॥ युगं प्रति धियां युसा न्यूनाधिकतया मुनाक्रियांगपाठवैचित्र्यमुक्तावृद्धिं स्मराम्यहं॥५९॥ युगं
ति युगापेक्षया॥ युसाधियां युक्तप्यमुहानां न्यूनतयाऽधिकतयावक्रियां म[illegible] वैचित्र्यं [illegible] वैचि[illegible]मु

गपाठ८ युक्तानू८

श्री॥ २७

स्मृतिक्रियावेदोक्तकर्मानुष्ठानं वेदांगानि व्याकरणादीनि पाठोऽध्ययनप्रकारः क्रियावैचित्र्येण पाठवैचित्र्येण
युक्तान्वेदान्स्मरामि। द्वापरे कलौ च धर्मह्रासात् पुरुषबुद्धीनां ह्रासे तत्तदनुसारेण वेदानां क्रियापाठह्रासो
भवति। त्रेतायां कृते च धर्मे ह्रासात् पुरुषबुद्धिप्रवृद्धौ सत्यां क्रियादिवृद्धिरिति वैचित्र्यमित्यर्थः॥१७॥ एकाधि
निसमग्राणि बहुपाठानि यानि पुराणानि प्रवर्तन्ते निवृत्तानि युगान्ते॥१८॥ निवृत्तानि संप्रदायाभावात् युगान्ते
एतानि युगान्तरे तिभावि युगापेक्षया पुरुषबुद्धिवैचित्र्यादेकार्थानि समानार्थान्यपि बहुपाठानि पुराणानि पुनर
पि प्रवर्तन्ते॥१९॥ इतिहासं महाश्चर्यं मया रामायणाभिधं ग्रन्थलक्षप्रमाणं वै ज्ञानशास्त्रं समग्राम्य हाद्य॥ महाश्च
र्यं महदाश्चर्याणि यस्मिन् तादृशं ज्ञानशास्त्रं मोक्षोपायनिरूपणपरं। अत एव हेतोः अन्यस्य रावणवधार्थप्र
सिद्धरामायणाद्भिन्नं रामायणाभिधं ग्रन्थलक्षप्रमाणमितिहासं स्मरामि। अन्यद्वितीयं ज्ञानशास्त्रापेक्षया न प्र
कृतिनिर्देशः॥२०॥ वाल्मीकिना महात्मा जीवनते नैवान्येन वा कृतं एतच्च द्वादशं वारं क्रियते विस्मृतिं गतो।२१। तेनैव यः प्र
सिद्धस्य रामायणस्य प्रणेता तेनैव अन्येन तस्मादन्येन वाल्मीकिना जीवनकृतमेतच्च ज्ञानशास्त्ररूपं रामायणं
युगान्ते विस्मृतिं गतमिति निष्कृत्वा द्वादशं वारमधुना क्रियते। यः सर्वरावणवधप्रोथितानां ज्ञानशास्त्ररूपाणां वरसा
प्तानां प्रणेता स एव वाल्मीकिः स्वप्रदाय प्रहृत्य परमेश्वराज्ञया पुनः पुनराविर्भवति। अन्यो वा कश्चिज्जीवः तपसा

हि स्मा वाल्मीकि भावमापद्य रामायणसंप्रदायं कृतयतीत्यर्थः ॥६॥ द्वितीयमेतस्य समं भारतं नाम नामतः स्मरा
मि प्राक्तनं व्यासकृतं जगति विस्मृतौ ॥६३॥ एतस्य रामायणस्य समं लक्षप्रमाणं भारतं नाम प्राक्तनं पूर्वकल्पातीतं
व्यासकृतं द्वितीयमितिहाससंज्ञं स्मि । विस्मृतिं गतमिति पिस्मरामि गतान्यपि भारतानि स्मरामीत्यर्थः ॥६॥ ॥
व्यासाभिधेन ऋषिणेव नैवान्येन वा कृतं । एतच्चु सप्तमे वारं क्रियते विस्मृतिं गतं ॥६४॥ व्यासे ति पूर्ववद्व्याख्येयं ॥ आर
रूसकृतये विष्णोर्महामवतरिष्यतः । अधुनैकादशांशेन रामनाम्नो भविष्यति ॥६५॥ रामावतारात्प्रागेव रा
मायणप्रवृत्तेरवतरिष्यतो भविष्यतीति च भावितया निर्देशः । शेषं स्पष्टं ॥६॥ वसुदेवगृहे विष्णोर्भुवि भारति
कृतये । अधुनाष्टांशेन जन्म भविष्यति मुनीश्वर ॥६६॥ स्पष्टं ॥६॥ जगन्मयी भ्रांतिरियं न कदाचन विद्यते । वि
द्यते तु कदाचिच्च जलबुद्बुदवत्स्थिता ॥६७॥ जगद्रूपो भ्रांतिरियं कदाचित्कल्पांते नैव विद्यते कदाचित्तु स्थिति
काले विद्यते अतो जलबुद्बुदवत्स्थिता ॥६॥ दृश्य भ्रांतिरनिश्चयमेतस्थासं विदामनः । जायते लीयते चाऽश्व
त्ताविव विरिवांधिः ॥६८॥ इयमनिशान्नियता अतिविचित्रताः । अनिशमिति पाठे नाशरहिता अनरपि अ
ज्ञाता । दृश्य भ्रांतिरात्मनोंतःस्था संविदेव अतावीचिरिव सी बलाल्लाजायते लीयते वै नेशात्कृत्वरा

श्री ॥
२९८

२९

र्वकंकुन्तायं च क्ष्मधरः। दिगुत्तरा तदन्यत्र पूर्वं एवमहीधरः सह्यः। पूर्वमतीते कल्पान्ते इहास्मिन्देशे उत्तराक
शनाभूत्। २। अयं मेरुस्तत्र नाभूत् अन्यत्रोत्तरादिग्भूत् अयं महीधरस्त्वन्यत्राभूत्। ३। ७। अर्कादिग्रहसंचारा
मेवादिस्थानकादिशां संस्थानमन्यथा तस्मिंस्थिते यांति दिशोन्यथा। ७०। अर्कादिग्रहसंचारारस्त्वां
दिग्रहसंचारार। मेवादिस्थानकानुमेरुप्रभृतिमर्यादापर्वतसंस्थानाद्य दिशां संस्थानं संनिवेशः तस्मिन्मेवादि
संस्थानेऽन्यथा स्थिते सति दिशोप्यन्यथा प्रकारांतरं यांति। दिशामादित्यादिग्रहसंचारमेवादिसन्निवेशोपा
पेक्ष्य कल्पितत्वात् तदन्यथाभावे दिशामप्यन्यथात्वं भवतीति भावः। ७। कलौ कृतयुगाचारानुकृते कलियु
गस्थितिं त्रेतायां द्वापरेवैव विपर्यासं स्मराम्यहं। ७१। वसिष्ठ उवाच। अथासौ वायसश्रेष्ठो जिज्ञासार्थमिदं मया। त्वय
पृष्टो महाबाहो कस्मृहलतनाशके। ७२। वरतो जगतः काले व्यक्तीरावतामपि। कथं विहगराजेंद्र देहं मृत्यु
र्नबाधते। ७३। द्वयमेतत्स्पष्टं। ७। भुशुंड उवाच। जानन्नपि हि सर्वज्ञो ब्रह्मन् जिज्ञासयैव मां। पृच्छसि प्रभो वानि
त्यं भृत्यं वा वाचयंतीति हि। ७४। स्पष्टं। ७। तथापि यत्पृच्छसि मां तत्ते प्रकटयाम्यहं। आज्ञावदैरणाम बाहुमुख्य
मासाधनं सतां। ७५। तथापि ज्ञानिनः प्रियं यस्मात् मोपृच्छसि तत्तस्मात्ते प्रकथयामि। सतां विदुषां भाज्ञा वरव
मेव आज्ञापितार्थानुष्ठानमेवाराधनमाहुः। ७। दोषमुक्तो फलश्रोता वासनानंतुसंततिः। हृदिनग्रथिताय

स्य मृत्युस्तन्न जिघांसति ॥७॥ आदोषैरा रागद्वेषादिभिः एवमुक्ताफलैः ओतावासनारूपा तंतुसंततिः यस्य हृदि न याति

नातं मृत्युर्न जिघांसति हंतुं नेच्छति ॥८॥ विश्वासवत्ककेकचा सर्वदेहलता घुणाः आधयो यं न भिंदंति मृत्युस्तं न जि

घांसति ॥७॥ विश्वासवृक्षकेकचा विश्वासानां पुत्रमित्रादिविषयाणां विश्रंभणामेव वृक्षाणां केकचा विदारणास्ता

नानिकरपात्राणि सर्वदेहानामेव लतानां घुणाः विलेखनपटवः कृमयः यत्कृते विलेखने घुणाक्षरमिति प्रसि

आधयो मानसदुःखानि ॥ शारीरतरुसर्पौघा चिंतापि तच्छिरस्फटाः आशायं न दंदशंत मृत्युस्तन्न जिघांसति

शारीरिणामेव तरूणां सर्पौघाः सर्पसमूहस्तत्पदेन वः आशाः चिंताविरोधाः चिंतापि तच्छिरः फटाः चिंताभिरपि

नाशिरस्फटायोसौ ताः आशारूपाणां सर्पाणां चिंता एव शिरोभागस्थिताः फणा इत्यर्थः ॥ रागद्वेषविषादूर्मिः

खमनो बिलमंदिरः ॥ लोभव्यालो न चुंबति यं मृत्युस्तं न जिघांसति ॥७॥ लोभव्यालः लोभरूपः सर्पः ॥ यस्य

पीताशेषविवेकांबुः शरीरांभो न धिवाडवः न निर्दहति यं कोपो मृत्युस्तं न जिघांसति ॥८॥ स्पष्टं ॥ यत्रैतत्सा

कविंतरां शिमुग्यमेवाकुलं यंपश्यति नानंगो मृत्युस्तं न जिघांसति ॥ कविनं दार्वादिमयं बाह्यदंतिसानां यं वति

लभ्यस्तलनिः पीडनार्थं यंत्रं कर्तं ग्रन्नंवाङीषयां ॥ एकस्मिन्निर्मले येन पदे परमपावने सौसृता चित्तवि

श्रांतिर्मृत्युस्तं न जिघांसति ॥ संस्थिता संश्रांता मृत्युस्तं न जिघांतिष्ठत्कंवान बाधन इतिष्टय यस्याशयदोषानसंति

तं नवाप्नुत इत्यर्थः ॥छ॥ तत्राशयदोषनिवृत्तिः कथमित्याकांक्षायामिदानीं तन्निवृत्त्युपायमाह ॥ ९ तत्र ॥ तेष्वेतेष्वन्म
दोषाः संसारव्याधिहेतवो मनागपि न लुंपंति चित्रमेकसमाहितो ॥ ८३ ॥ संसारव्याधि ॥ तत्र ॥ तेषु सर्वोऽपि कोमलदोषाः
एकसमाहितं एकस्मिन् संसारव्याधिसमाधिसुके चित्रं मनागपि न लुंपंति ॥ आधिव्याधिसमुत्थानि चलितानि मदोष
मेः न विलुंपंति दुःखानि चित्रमेकसमाहितो ॥ ८४ ॥ महाभ्रमेः पुत्रकलत्रादिविषयव्यासादच्चलितानि अवहित्वा
स्पष्टमन्यत्र ॥छ॥ अधीकृतहृदाकाराः कामक्रोधविकारजाः चिंतान परिहिंसंति चित्रमेकसमाहितो ॥ ८५ ॥ स्पष्ट
यऽरर्थ दुरारंभाः दुर्गुणा दुरुदाहृताः ॥ ८ प्रमास्ते न कंतंति चित्रमेकसमाहितो ॥ ८६ ॥ अर्थाः सांसारिककार्यसिद्धि
तवः संपदः ॥ आरंभास्तदर्थमुद्यमाः गुणाः सत्तदनुकूलाः शौर्यादयः ॥ उदाहृताः त्यागभोगादिपरिश्रमः पामरजनै
उदीरितकीर्तयः ॥ क्रमाः परिवृत्तिरंजनक्रमाः नीतिशास्त्रोक्तास्तेषां हृः खेदं दुःखभ्रयिष्यते पर्यंतविरसत्वादिति
त्वादिना सर्वमेव वैराग्यप्रकरणे निरूपितं तेऽरर्थादयः ९ एकसमाहितं चित्रं न हिंसंति ॥छ॥ किंतु हि विहिंसत्येवेतिम
हितोऽयऽदके हि तत्सत्यमनुपाक्षिणतो भ्रमो ऽरीहिति दिशान्मुक्तं तत्परं कारयेन्मनः ॥ ८७ ॥ यद्वस्तु दके हि तं ऽत्र क
लिरंगमाह ॥ गतभ्रमं निवृत्ताविद्यावृत्तस्यानुपाक्षपाधिरहितं प्रत एव ऽरीहिति दशायाः संसारदशायां च
काप्ततयसर्वमेवाध्यविष्ठितामनः कर्मतत्परं ताहृरूपं प्रदेतं निर्विकारयेत् ॥ यथा सततिनमनोदोषाः प्रसतिचद

यकालुष्येण न मुक्तभयमिति पूर्वोक्तनिर्वाहः। आयं दृष्टमसुहृत्त विरवैधुर्यदायिना। अनेकत्वपिशाचेन तत्परं
कारयेन्मनः॥८८॥ चिरवैधुर्यदायिना चिरकालं विरोधहेतुना असुहृता अप्रामाणिकेन अनेकत्वपिशाचेन भेदभ्र
मेण यद्दृष्टं असुहृत्तमस्पृष्टं एकमेवाद्वितीयं ब्रह्मेति श्रुतः मनस्तादृग्ब्रह्म परं कारयेत्। भेदस्य विरोधहेतुत्वं विर
द्धयितृत्वं च श्रुत्या भेदभावनायां इति पद्यते। इयदाद्येव एतस्मिन्नुदरमंतरं कुरुते। अथ तस्य भयं भवतीति॥
आत्मचिंतासमस्तानां दुःखानामंतकारिणी। सुखदा दिशु सुप्राप्या दुःप्रापा चास्मदादिभिः॥८९॥ अस्मदादिभिः
तिमंदबुद्ध्युपलक्षणं मंदानां दुःप्रापत्वमेवाह समस्तेति। समस्तक्लेशनाशकत्वं परोक्षोऽपि सुप्राप्य इति। पदमास
दयंत्यनेकार्थसामान्यबुद्धयः॥९०॥ सामान्यबुद्धयो मंदबुद्धयः। आत्मचिंताया दुःप्रापत्वादेव तत्समानां प्राणचिंता
मयाश्रितेत्याह। मेति श्लोकद्वयेन। आत्मचिंतासमानानां विविधानां मुनीश्वर। आत्मचिंतावयस्यानां मध्यादेकतम
मया॥९१॥ सर्वदुःखक्षयकरी सर्वसौभाग्यवर्द्धनी। कारणजीवितस्येह प्राणचिंता समाश्रिता॥९२॥ आत्मचिंतासमु
मानत्वादेव विधानानामुपासनांतराणां तद्वयस्यात्वं। [illegible] समाने॥ वसिष्ठ उवाच। इत्युक्तवंतं तं चिहंगं भुसुं
डमनरस्पृहं जानन्नपीदमव्यग्रः पृष्टवान्निह्नमादरात्। [illegible] सर्वसंशयविच्छेदिनात्यंतचिरजीविनं। यथार्थं ब्रूहि मे सा
धो प्राणचिंता किमुच्यते॥९४॥ इयमेतस्य पृष्टी॥ पृष्टवितिसाहश्लोकद्वयेनेत्युक्तं। भुसुंड उवाच। शृणु प्राणसमाश्र
ने वक्ष्यमाणमिदं मया। पप्रच्छ यदं भगवन् सर्ववेदेन [illegible] मनोरमं॥९५॥ तत्रोर्ध्वाधो हि संकेतो प्रस्तावनिलो मुने।

श्रीरामचन्द्र

श्री॥
२९०

हृत्सु उरसि स्थितस्यैव ~~[struck]~~ विलनू गच्छतिवासनाः सहस्रविनिहतांगा बिसतंतुलवादपि ॥२०॥ दुर्लक्ष्या विद्यमानापि नाति सूक्ष्मतरात्मयोः ॥
न१

प्राणापानाविति रव्याता प्रकृष्टौ तौ वरानिलौ । ह्यातयोरनुसरन्त्यियं सुनेग तिम ह्रं स्थितः । प्राणसमाधानं
प्राणगस्यनुसंधानमित्यर्थः इतरत्समानं ॥ शीतोष्णेति श्लोकत्रयं वाक्यं शीतोष्णवपुषोर्नित्यं त्तित्यमं
बरपांथयोः कलेवरमहायलवाहयोः श्रमहानयोः ॥१९॥ हृदाकाशार्कशशिनोरग्नीषोमस्वरूपयोः त
योर्ममानुसरतः प्राणापानाभिधानयोः ॥२०॥ गतिं शरीरमरुतो शरीरमरुहयोः जा...
सदेवसमरूपयोः ॥२१॥ शीतोष्णवपुषोः शीतवपुरपानः उष्णवपुः प्राणः हृदाकाशार्कशशिनोः प्राणार्कः
अपानः शशी ॥ सहस्रेति सहस्र विनिहंतांगाः शासहस्रं विनिहंतान्यंगानि यस्य तस्मात् शासहस्रधा छि
न्नादित्यर्थः । बिसतंतुलवादपि तयोः प्राणापानयोर्गतिः सूक्ष्मतरा दुर्लक्ष्या चास्येत्यर्थः ॥ प्राणोयमग्नि
शिखस्तनुस्पंदशक्तिः सदागतिः सबाह्याभ्यंतरे देहे प्राणोयमूर्ध्वगः स्थितः ॥२२॥ अयं प्राणः अग्निशिखः स्पंदश
क्तिः स्पंदरूपा वह्निनाभिका शक्तिर्यस्य सदागतिर्यस्य तादृशस्तिष्ठति । अयं च प्राण ऊर्ध्वगः सन् सबाह्याभ्यंत
रे द्वादशांगुलपर्यंतं बहिर्निःसरणात् बाह्यसहिते देहे यदभ्यंतरं तत्र ऊर्ध्वगः स्थितः ॥ पूर्वोक्तरीत्या द्विरुक्तौ
प्राणशब्दस्य पौनरुक्त्यं ॥ अपानोप्यग्निशिखस्तनुस्पंदशक्तिः सदागतिः सबाह्याभ्यंतरे देहे ह्यपानो यमध
ः स्थितः ॥२३॥ अयमपानस्तु अवारुअधोगमनस्वभावः स्थित इत्ययमेव विशेषः । अन्यत्तु प्राणवदेवेत्यर्थः ॥

जाग्रतः स्वपतश्चैव प्राणायामोयमुत्तमः प्रवर्त्तते योऽभिज्ञस्य तं तावत्कुर्यात्सदृढं ॥२०॥ प्रायोयमुत्तमः प्राणायामोऽभि-
ज्ञस्य प्राणापानगतिज्ञस्य जाग्रतः स्वपतश्चैव प्रवर्त्तते तं प्राणायामं तावत्कुर्यात्सदृढं ॥ ॥ बाह्योन्मुखत्वं प्राणानां यद्द्वाद-
शकोटराद्बहिः स्वरसेनास्तयत्नानां मतं रेचकं विदुः ॥५॥ स्पष्टं ॥ द्वादशांगुलपर्यंतं बाह्यमाक्रमतां ततः प्राणानां मं-
संस्पर्शयोः संपूरकं उच्यते ॥६॥ द्वादशांगुलपर्यंतं बाह्यप्रदेशमाक्रमतां प्राणानां प्राणवृत्तीनां मतो विस्मृतो योगसं-
गः प्राणावयवानां परस्परसंश्लेषः संपूरको बाह्यस्तु प्रउच्यते शरीरापेक्षया बाह्यस्य द्वादशांगुलात्परिमितस्य प्र-
देशस्य पूरणात्स्वतइति पाठे स्वतएव बाह्यमाक्रमतामित्यन्वयः ॥ ॥ बाह्यात्परापतत्यंतरपानयत्नवर्जितः योगि-
पूरसंस्पर्शो विदुस्तमपि पूरकं ॥७॥ अपानवायो बाह्यद्वादशांतः परापतति विशति शरीराभ्यंतरं प्रविशति यत्नव-
र्जितः अयत्नसिद्धः ... शरीरपूरणायः स्पर्शस्तमपि पूरकं विदुः ॥ अंतः पूरकं विदुरित्यर्थः शरीरांतः पूर-
णात् ॥ ॥ अपानेस्तंगते प्राणो यावन्नाभ्युदितो हृदि तावत्सा कुंभकावस्था योगिभिर्यानुभूयते ॥८॥ अपानवायो-
रस्तंगते सति हृदि प्राणो यावन्नाभ्युदितस्तावत्सा वायोर्निश्चलागतिः कुंभकावस्थोच्यते या योगिभिरनुभूयते
अयमवस्थाविशेषो ऽतः कुंभकइत्युच्यते शरीरस्यांतरवायोः कुंभितत्वात् ॥ ॥ रेचकः पूरकश्चैव कुंभकश्चै-
त्रिधास्थितः ... तदवस्थानिःस्पंदे घटवद्यास्थितिर्बहिः ॥ ॥ द्वादशांगुलपर्यंतं नासाग्रसमसंमुखं ... नित्य-
मपानस्य तं विदुः कुंभकं बुधाः ॥९॥ इयमेतत्स्पष्टं ॥ बाह्योन्मुखस्य वायोर्यन्नासिकाग्रावधिर्गतिः न वाह्यस्य

श्री॥
२८१

समावस्तंभरणे १

कंत्राद्यं विदुर्योगविदो जनाः॥११॥ बाह्योन्मुखस्य प्राणवायोर्यन्नासिकाग्रावधिर्गतिरस्ति तं गतिविशेषमाद्यं बाह्यपू
रकं विदुः। अपरस्यापि बाह्यपूरकस्यैव समाणबाह्याद्यव्यपदेशः। नासिकाग्रलक्ष्यबाह्यदेशस्य पूरणात् बाह्य
पूरकत्वं॥ नासाग्रादपि निर्गत्य द्वादशांतावधिर्गतिः या वायोस्तां विदुर्धीराः अपरं बाह्यपूरकं॥१३॥ नासाग्रादपि
निर्गत्य वायोर्यावद्द्वादशांतावधिर्गतिरस्ति तं गतिविशेषं अपरं बाह्यपूरकं विदुः॥१३॥ बहिरस्तंगते प्राणे यावन्ना
न्तर्गमः तावत्पूर्णसमावस्थं बहिष्ठं कुंभकं विदुः॥१४॥ प्राणे बहिरस्तंगते सति यावदपानो वायुरंतराकर्षणा
ल्लानोद्गतस्तावत्पूर्णकुंभत्वस्य मध्ये विशेषं बहिष्ठं कुंभकं विदुः। शरीराद्वायोः कुंभितत्वात्॥१४॥ अंतर्मुखं वा
यदपानोदयरूपकं तं बाह्यरूपकं विद्याद्वियमानं विमुक्तिदं॥१५॥ वायोरपानोदयरूपकं यदंतर्मुखं तं बाह्य
विद्यात्। बहिः कुंभितस्य वायोः अंतर्मुखतया रेचनात्॥१५॥ द्वादशांतात्समुच्छ्रायरूपपीवरता परा। अपानस्य बहि
स्तं अपरं रेचकं विदुः॥१५॥ बाह्यं तावत्तत्रैव कुंभकादीननारतं प्राणापानस्वभावांस्तान् बुध्वा भूयो न जायते॥१६॥
इयमेतत्स्पष्टं॥ अष्टावेते महाबुद्धे रात्रिंदिवमनुस्मृताः स्वभावादेव देहानां कथिता मुक्तिदा मया॥१७॥ बाह्य
रकाद्यास्त्रयः आंतराश्चत्रयः अतिरिक्तौ बाह्यपूरकावित्यष्टविधत्वं तत्राद्यश्लोकेन स्थूलो प्राणापानगति
मार्गस्य पदद्वयमुक्तं। अनंतरश्लोकषट्केन सूक्ष्मगतिमार्गस्य षड्विधा निरूपिता इति विवेकः॥१७॥ अव्यग्र
स्थिर्व्यापारबाह्यपरिजनस्य मनः स्थिनः कतिपयैरेव पदैर्मात्रातिकैवल्यं॥ स्पष्टं॥ अथ तदभ्यासतः कुंभो बहिः

क्ष्यह्नि त्रिधा नव ध्यानिरतिं वेन तः अव हृतौ ग्रसनयोर्यथा ॥ १ ॥ श्वहृतौ सुतनक चर्मनिर्मितायां भस्त्रिकायां शेषं स्पष्टं ॥ ७ ॥
प्राणस्याभ्युदयो ब्रह्मन्नूर्ध्वमपवाह हृदि स्थिता श्वहृदाद्वादशांगुलपर्यंते प्राणोस्तमयात्यथैव हि ॥ २ ॥ हृदि स्थितस्य मध्यस्य
प्राणस्याभ्युदयः उक्तमनेन यः प्राणो बहिर्द्वादशांगुलपर्यंतमस्तं याति ॥ ७ ॥ अपानस्योदयो बाह्याद्वादशां
तान्महामुने । अस्तंगतिरथो भोज मध्ये हृदय संस्थिते ॥ ३ ॥ यत्र प्राणस्य लयः तस्माद्वादशांतादपानस्योदयः
यत्र प्राणस्योदयस्तत्र हृत्स्वमध्ये अपानस्य लय इत्यर्थः ॥ ७ ॥ अपानश्चंद्रमा देहमाप्याययति बाह्यतः ॥ प्राणः सूर्यो
ऽग्निरथवा पचत्यंतरिदं वपुः ॥ ४ ॥ अपानश्चंद्ररूपत्वाद्देहबाह्यद्वादशांतरूपात् बाह्यदेशादागत्य आप्याययति ॥ सू
प्राणः सूर्याग्निरूपत्वात् इदं वपुः पचति पाकयुक्तं करोति ॥ ७ ॥ इत्थं प्राणापानगतेः प्राणायामरूपेणानुसं
धानप्रकारमभिधाय इदानीं प्राणगत्यनुसंधानमुखेन आत्मानुसंधानप्रकारमाह प्राणेति ॥ अपानशशिनां तं
स्त्वाक्रम्य प्राणविवस्वता ॥ यत्र ग्रस्ता तदा तदा साधक न भूयो जन्मभाङ्नरः ॥ ५ ॥ अपानशशिनोऽपानरूपस्य चंद्रस्य
तस्य शारीरीनिर्गताकला एकदेशः प्राणविवस्वता प्राणाख्येन सूर्येण यच यस्मिन्नासमवे ग्रस्ता ॥ आत्मनः अयं
तस्या हृता तत्पदं तदात्मतत्त्वमासाद्यानुसंधाय भूयः पुनर्न जन्यते ॥ ७ ॥ प्राणार्कस्य तथोत्सृष्टाय नापानसितांशुना
ग्रस्तात्तत्पदमासाद्य नेह योजन्मभाङ्नरः ॥ ६ ॥ प्राणेति पूर्ववद्व्याख्येयं ॥ प्राणापानयोः परस्परग्रासावस्थायां
सेव शाक्तवत्तित देवात्मतत्त्वमनुसंधाय ग्रस्यत इत्यर्थः ॥ प्राणार्कस्यात्तस्याकलेति संबंधः शेषं स्पष्टं ॥ ७ ॥

२ ।३।।
२ ३२
२१

प्राणो गतागतीकुर्वन्संधत्ते स्वयं वहतां स्वयं। प्राणभक्षोन्मुखे वाने प्राणे वापानभक्षके उभयोरेतरालस्थो
भूयो जायते नरः॥२५॥ इत्थमनेन प्राणभक्षोन्मुखे सति प्राणे वापानभक्षके सति यस्मिन्नेव समुद्भवयोः प्राणापानयोरेतदं-
स्थे मध्यस्थे साक्षितया वर्तते तत्पदं तदात्मतत्त्वमासाद्य नरो भूयो न जायत इत्यनुष्टुभा संबंधः॥७॥ प्राणद्वयसमीपस्थं
अपानोदयकोटिगं। अपानप्राणयोर्मध्ये चिदात्मानमुपास्महे॥२६॥ यः खलु चिद्रूप आत्मा प्राणद्वयसमीपस्थः प्रा-
णस्य द्वादशांतरद्वये सति स्वयं समीपे तिष्ठति साक्षितया सन्निधत्ते न तु स्वयं दीयते अपानोदये च कोटिं केगः सा-
पगः साक्षी न तु स्वयमुदेति इत्थमपानप्राणयोर्मध्ये साक्षिणं चिदात्मानमुपास्महे॥ अनुसंदध्महे॥७॥ एतदेव विवृ-
णोत्यपान इति। अपानोऽस्तंगतो यत्र प्राणो नाभ्युदितः क्षणा। कलाकलंकरहितं तं चिद्रूपमुपास्महे॥२७॥ कलाकः
करहितेऽविद्यासंबंधरहितं शिष्टं समानो॥७॥ नापानोऽस्फुदितो यत्र प्राणश्चास्तमुपागतः। नासाग्रगगनावं-
तस्थितं त्वमुपास्महे॥२८॥ यत्र चित्तत्वे प्राणोऽस्तमुपागतः अपानश्च नाभ्युदितः नासाग्रगगनावर्तनासिकाया अ-
भागे यद्गगनं द्वादशांतरूपं तत्र चावर्तमानं प्राणापानप्रवर्तकं तया गगनागमने अस्तमापन्नं तं तादृशं चित्तत्वमुपास्महे। हो
पदखिलकलनाकलंकरहितं परिवलितं च सदा केलागणे॥ अनुभव विजुवैपदं तदस्य सकलस्तु रखपणतप
प्रपद्य॥२९॥ तत्पदं अखिलकलनाकलंकरहितं परमात्मस्वरूपता ज्ञानकलनागणेन अविद्यासहितेन परिवलित-
च परितो व्याप्तं जीवरूपत्वात्। अनुभव विजुवै स्वानुभवप्रमाणेन तदायं परं पदं प्रपद्य॥७॥ उकुरुउवाचाष्टमादि

ज्ञोवं२ नै८

चित्ते विश्रांतिर्मया प्राप्ता समाधिना क्रमेणानेन संप्राप्तास्त्वय्यमात्मतिर्मलो ॥३०॥ अनेन पूर्वोक्तेन क्रमेणैवाचित्ते चिद्रूपेऽ
स्मिन् विश्रांतिर्मया प्राप्ता तिसं बंधः स्पष्टः ॥छ॥ न भूतेन भविष्यत्र चिंतयामि कदाचन । दृष्टिमालंब्य तिष्ठामि वर्तमानामि
हात्मना ॥३१॥ भूतं भविष्यच्च न चिंतयामि वर्तमानामेव दृष्टिमालंब्यात्मनास्वरूपेणैव तिष्ठामि ॥छ॥ चिरंजीवितदेहम
मेनस्थितेन तृप्तिप्रकारमेवप्रपंचयितुमाह इदमित्यादिभिर्नवभिः श्लोकैः इदमद्यमयालब्धं इदं प्राप्स्यामि सुंदरं इति चि
तमनेन चिरंजीवाम्यनामयः ॥३२॥ सुंदरं अभिनवं वस्तु स्पष्टमन्यत्सर्वं स्तौमि न च निंदामि किंचित्कदाचन ॥३३॥ आ
त्मनोऽन्यस्य वा साध्वी तेन जीवाम्यनामयः ॥३३॥ न तुष्यामि शुभप्राप्तौ नाशुभे खिद्यते मनः समं नित्यं तेन जी
म्यनामयः ॥३४॥ इयमेतत्स्पष्टं [illegible] परमसारगामी लब्ध्वा सर्वमेव सद्देवहि । जीविताद्प्रियान्यत्र कं तेन जीवाम्यनामयः ॥३५
परमं त्यागं त्यज्य तेनेति सागौ वैराग्यं प्रकृष्टं वैराग्यमित्यर्थः ॥छ॥ गृहीतवान् पैलवीत [illegible] कमस्तसमीहितं मनो मम मु
नेष्टं तेन जीवाम्यनामयः ॥३६॥ तत्र बालतनामस्व वर्तमानेष्टं वै दर्शनेनैकौ त्रहलीतद्रक्तौ तेन रहलेरम्य दृष्टौ चालना
रिक्तीर्तितमित्रिशोकानुष्टं वस्तु विषयः समीहितं भविष्य दिष्टं वस्तुवांछितं ॥छ॥ आशापाशशतैर्मुक्ता यास्वितदृष्टे
मारितः । संस्पर्शं न ददाम्यतः तेन जीवाम्यनामयः ॥३७॥ आशापाशपरवशाया चित्तवृत्तेः अंतः संस्पर्शं यन्न ददामि सम
हितं बाशतेन जीवामि ॥छ॥ दुःखितोऽस्मि सुखासीनो दुःखितो दुःखितेजने । सर्वस्य प्रियमित्रं च तेन जीवाम्यनामयः ॥३८॥ स्प
ष्टं ॥छ॥ आपद्यचलधीरोऽस्मिन् जगन्मित्रं च संपदि । भावाभावेषु नैवास्मि तेन जीवाम्यनामयः ॥३९॥ आपदि आपत्सु

क्रू १

समयेऽवलवहीरोस्मि। संप्रत्यपोऽगतः सर्वस्यामित्रं सर्वदा आगतः सर्वस्योपरणाः ३। भावाभावेषु नैवास्मि एते
भावरूपाः एते चाभावरूपाः इति पदार्थानुगान्तच्छेदं नानुसंदधामीत्यर्थः ॥७॥ मत्तुङ्गज्याकदर्थेन रक्षोऽहं लमिनि
भुवनं। विष्टरादहं सुष्ठायनभः स्वगावदा १ सुतः ४०॥ मत्तुङ्गज्याकदर्थेन अहङ्कारज्ञानहीनेनात्तं मत्तुङ्गज्यां मा
ऽविस्यर्थः। तोहं समानं योक्तियोजनमात्रे हुमदनुङ्गज्ययागतः। मया निवारितः हूता रुत्ला ज्यासगतिः
सतो। ४१॥ यातेकृतयुगस्यादोषतस्तेनास्मि संगतः संगतोहं मुहुर्हेन मेरोः श्रृङ्गे मे अनवे। ४२॥ वसिष्ठत्वासाम
रामहृते हीणे त्रेतासं प्रतिवर्तते मध्ये त्रेतायुगस्यास्य जातस्त्वरि पुसदना। ४३॥ तेनरप्यष्टमे वर्षे तत्रैवापरिमहं
मिलितो भद्रे ह्युदडोमतथैवाजररूपवान्। ४४॥ श्लोकचतुष्टयमेतत्स्पष्टम्॥७॥ इति सेकथितं चित्रं भुशुण्डादेनमुत्त
मं। अ श्रुत्वा विचार्य यथावत् धर्मं तत्समाचरः। २५॥ यद्धर्मं तत्समाचर पूर्वोक्ताख्यानेषु भुशुण्डदृष्टान्तेन यद्धर्मं त
तथाऽतीयत तत्समाचरेत्यर्थः॥ इत्यतः समानी ॥७॥ ॥६॥ ॥७॥ इति श्रीवाल्मीकीयरामायणे महाकाव्ये मोक्षोपाये
श्रीमत्परमहंसपरिव्राजकाचार्य मरुखण्डपूज्यपादशिष्य श्रीमदात्मसुखकृते वासिष्ठचन्द्रिकायां निर्वाणप्रक
रणे भुशुण्डोपाख्यानं नाम एकोनत्रिंशः सर्गः ॥७॥ ॥६॥ ॥७॥ एवं प्राणवृत्त्यनुसंधानात् चित्तविश्रान्त्या निर्वाणमुक्
त्वा इदानीं तद्वदेव देवपूजयापि चित्तविश्रान्तिलक्षणं निर्वाणं भवतीत्युच्यते तत्र तावद्देहाभिमानस्य सर्वे निर्वाण।

पायप्रतिबंधकत्वात्तन्निवृत्तये हितं किं विदुप दिशति आभासेमिति वसिष्ठवाक्य आभासमात्रमेवेदमित्यं
संप्रतिभासते।अयं नामाहमित्यं तरसदेवशरीरकः।।१।।इदं शरीरं वस्तुत आभासमात्रं प्रतीतमात्रसिद्धमविसंवादि
अविचारदशायां मिथ्यमयमित्यहमितिवात्मनो भेदेनवाभिमानविषयतयांतरंतःकरणे भासते।विचार्यमाणं तु
नरसदेवकल्पितत्वात्।२।मांसास्थिमयनिर्माणदेहोऽहमितिविभ्रमोऽत्यजसंकल्पनिर्माणदेहोऽसंसेतिसत्यत्वं
।२।मांसास्थिमयं निर्माणं यस्य तादृशो देहोऽहमिति यो विभ्रमः तं त्यज।एवंविधानां संकल्पकल्पितानां देहा
नां सहस्रो विद्यमानत्वादित्यर्थः।३।देहाऽसत्यत्वमेवाह सुखेति।सुखतल्पगतो येन स्वप्नदेहेन दिक्चक्रपरि
भ्रमसि हराम सदेहस्तैकसंस्थितः।३।सुखं तल्पगतस्य ते दिक्चक्रभ्रमणदेहस्त्वाय स्वप्नदेहास्ते ब्यांअसत्यत्वं ब्रू
व्यास्वरूपगाममेवेत्यर्थः।शेषं स्पष्टं।४।जागरायां मनोराज्ये येन स्वर्गपुरांतरोपरि भ्रमेरुवा स देहस्तैकसंस्थितः।५।
जाग्रद्दशायामपि मनोरथपथेन प्रवृत्तश्चित्तस्य देहविस्मरणपूर्वं वसिते यत्सारवद्र्व्यं तन्मनोराज्यं तत्रापि मि
थ्यादेहेनैव देशांतरभ्रमणमित्यर्थः।५।दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमं दीर्घं वापि मनोराज्यं संसारं र
घुनंदन।६।दीर्घं वा चित्तविभ्रमं नीलनभ इतिवत् चिरकालानुवृत्तो भ्रांतिः।६।आभासमात्रमेवेदं न सन्नास
ज्जगत्त्रयं।इत्यन्यकल्पनात्यागी सम्यगालोकने विदुः।७।जगत्त्रयं सच्च न बध्यमानत्वात्।असन्न प्रतीयमानत्वा

२

अत आभासमात्रं प्रतिभासमात्रमेव न वास्तवमित्यन्यकलनात्यागमेव सम्यगालोकनं विदुः ॥६॥ अवश्यप्रा
वरिमयामन्तव्यमिति निश्चयः इत्यात्मस्मरणप्राप्तौ किं मुधा परितप्यते ॥ आत्मरणस्य ज्ञाने नैव आवश्यकत्वनिश्चया
त्प्राप्तौ परितापो व्यर्थ इत्यर्थः ॥७॥ अवश्यमेव ज्ञातेन किं विस्तु विभवादिकं । प्राप्तव्यं गुरुवेषेणेति लाभे ह
र्षस्य को मदः ॥ ज्ञातेन जीवता गुरुवेषेण तु विभवादिकं किं विस्तु यः प्राप्तव्यमिति निश्चयादर्थलाभे हर्षमदा
पि नोचित इत्यर्थः ॥८॥ अविभागं परित्यज्य पदार्थपटलं वृषो आभासमात्रं सामान्यमिदमालोकयानघ ॥
पदार्थपटलं वृजे पदार्थवरी समुदायात्मके प्रपंचे प्रविभागं भेदबुद्धिं परित्यज्य इदमाभासमात्रमेव सामान्यं
वोत्तुङ्गं सचिन्मात्रमेवालोकय अनुसंधत्स्व ॥९॥ आभासमात्रमखिलं चित्तमर्थकलंकितं । ततस्तदपि सं
त्यज्य निराभासो भवोत्तम ॥१०॥ यतः कारणादाभासमात्रमपि चित्तमर्थकलंकितं विषयसंबंधदूषितं ततः का
रणादपि आभासमात्रमपि संत्यज्य निराभासो भव निर्विकल्पो भव ॥ ॥ रागद्वेषस्वरूपो हि न विलीनो मनो
लोयस्य कल्पतरोस्तस्मात् किं नाम अंगं न लभ्यते ॥११॥ रागद्वेषाख्यौ द्वौ सर्पौ यस्मिन् नो विलीनौ विलीनौ नावस्थितौ स एव क
ल्पतरुः सर्वगुरु पाथ साधकत्वात् तस्मात् ज्ञानादितात् गुरुः सकाशात् लोके किं नाम श्रेयो न लभ्यते सर्वमपि श्रे
यो न लभ्यत इत्यर्थः ॥१२॥ ये प्रज्ञागर्वमापन्ना विदग्धां शास्त्रशालिनः । रागद्वेषभयामान्यगर्दभास्ते ग्गिगस्तना ॥१३॥

येऽगुनः शास्त्रशालिनो विदग्धाः लौकिकवैदिकव्यवहारनिपुणा अपि प्रज्ञावर्गप्रज्ञावंतोऽप्ययमेवेत्यहंका
रमापन्नाः संतो रागद्वेषमयाः रागद्वेषप्रहयपिशाचैर्भवंति ते मान्यगर्दभाः हरभारवहनक्षमत्वात् ॥७॥ कुं मू
येगर्दभास्तत्तुल्याः स्तोधिगाश्कनस्त्रष्टव्या इत्यर्थः ॥ इदं संसारचक्रं हि नाभौ संकल्पमात्रके संरोधित
यां वहनाशे रघुनंदन रुध्यते ॥१३॥ संसारो जननमरणादिप्रवाहः स एव चक्रं भ्रमणशीलत्वात् तस्य संकल्प
त्मके चित्तमेव नाभिः प्रवर्तकत्वात् अनुचित्तनिरोधे संसारो निरुध्यते ॥ दोभितायां मनोनाभ्यां इदं संसा
रचक्रकं प्रयत्नाद्रोधितमपि प्रवहत्येव मगनः ॥१४॥ मनसि दांपिते संसारः प्रवहत्येव न ह्यप्रकारांतरेणारा
शक्यते ॥ पौरुषमाश्रित्य बलेन प्रज्ञा च युक्तितः । नाभिं संसारचक्रस्य चित्तमेव निरोधयेत् ॥१५॥ स्पष्टो ॥ प्र
ज्ञा सौजन्ययुक्तेन शास्त्रसंवलितेन च । पौरुषेण च यत्नाप्तं न तल्लवनलभ्यते ॥१६॥ प्रज्ञा प्रतिभा सौजन्यं श
मादिसंपत् शास्त्रमध्यात्मविद्या पौरुषं गुरुषस्य कर्म ॥ भयप्रदमकल्याणं धैर्यसत्त्वं वस्तुतारिणी मनः
पिशाचमुत्सृज्य यासि सोऽसि स्थिरो भव ॥१७॥ मनो विकारे परित्यक्ते स्वरूपमेवावशिष्यत इत्यर्थः ॥ चित्तयक्ष
दृढाक्रांतं न शास्त्राणि न बांधवाः । शक्नुवंति परित्रातुं गुरवो न च मानवाः ॥१८॥ मनःपिशाचपरवशस्य केना
पि परित्रातुं न शक्यत इत्यर्थः ॥ संशांतचित्तवेतालं गुरुशास्त्रार्थबांधवाः । शक्नुवंति समुद्धर्तुं स्वल्पपंका

श्री॥
२८५

२२८

न्मृगं यथा ॥१९॥ स्पष्टं ॥ छ ॥ भोगा भोगा बहिः कार्या आर्यस्यानुसरेत्पदं । प्रविचार्य महार्थं स्वं आत्मानमेकमाश्रये
त् ॥२०॥ भोगा भोगा विषयविस्ताराः आर्यस्य जीवन्मुक्तस्य । महार्थं परमार्थसिद्धमात्मानमेकमाश्रयेत् ॥ मनू
र्यत्वमिति पाठे स्वात्मन एवमुत्कार्यं तं प्रविचार्य तमेवात्मानमेवाश्रयेदित्यर्थः ॥ छ ॥ अत्रैव मोक्षपुरी दृष्टिमस्ता मोक्षवि
नाशिनी । शृणु या कथिता पूर्वं मम कैलासकंदरे ॥२१॥ अपरां दृष्टिमान्यमात्मज्ञातोपायां ज्ञो भैः स्पष्टं ॥ छ ॥ संसारदु
खशांत्यर्थं देवेनार्द्धेन्दुमौलिना । स्पष्टं ॥ छ ॥ अस्तीन्दुकरसंभारभास्वरः परमो द्विवः । कैलासो नाम शैलेन्द्रो गौरीर
मणमंदिरे ॥२२॥ दिवः स्वर्गादपि परमुत्कृष्टः श्रीष्टः समातः ॥ छ ॥ तत्रास्ति भगवान्देवो ऽर्धेन्दुकलाधरः । तं सज्जयन्म
हादेवं तस्मिन्नेव गिरौ पुरा ॥२३॥ स्पष्टं ॥ छ ॥ कदाचिदिति श्लोकद्वयमेकं वाक्यं । कदाचिद्दृष्टसंगे गानटे विरचिताश्र
मः । तपोर्थं तापसाचारश्चिराय चिरतः स्थितिः ॥२४॥ सिद्धसंघातवलितः कृतशास्त्रार्थसंग्रहः । पुण्यार्थस्फूर्तपु
टिकः पुस्तकव्यूहसंग्रही ॥२५॥ स्फूर्तपुटिकः पुटिका हि ज्ञानपुष्पनिक्षेपयोग्या पुटिका सा स्फूर्ता प्रोता येन स तथा ।
पुस्तकव्यूहसंग्रहो ज्ञानशास्त्रविषयाणां पुस्तकानां यो व्यूहः समूहः तत्संग्रहशीलः ॥ छ ॥ एवं गुणविशिष्टस्य
कैलासवनेऽनंतकेतनः अवरतारामममकालेप्रवर्त्तते ॥२६॥ स्पष्टं ॥ छ ॥ अथेति श्लोकद्वयमेकवाक्यं । अथैकः
स कदाचित्तु वजन्स्याष्टमे दिनागते श्रावणवपक्षस्य रात्र्यर्धे कृष्णमागतो ॥२७॥ दिक्पुसंज्ञांतरूपस्थकाष्ठमौन

१८

567

टि५ गि४ गि२ ४० नानाविधैः नमस्कारार्णामष्टांगं पंचांगादिभेदेन स्तोत्राणां चलौकिकवैदिकभेदेन भिन्नत्वान्नानाविधत्वं ४०

रपरास्वसंकल्परूपं परं परामात्रसिद्धमिति दर्शयितुं दृष्टान्ततया शतरुद्रीयाख्यायिका निरूप्यते। वसिष्ठ उवा
च। अथ राघव वक्ष्येऽहं इतिहासमिमं शृणु। यद्दृष्टं कस्य विङ्क्षिकोः किंचिन्मननशालिनः॥१॥ स्पष्टं॥ आसीत्
कश्चिन्महाभिक्षुः समाध्यभ्याससततरः। नित्यं स्वव्यवहारेण रूपयस्य खिलं दिनं॥ श्री महाभिक्षुः महान्यति
र्बाह्यत्यव्येव ... समाध्यभ्याससंप्रवृत्तिना॥२॥ स्पष्टं॥ समाध्यभ्याससंशुद्धं तत्तस्य चित्तं कर्णेन यशा वि
यया श्रुतजाग्रद्गतं संविद्वीचितो॥३॥ समाध्यभ्याससंशुद्धं निर्मलं तस्य भिक्षोश्चित्तं यत्र चिन्तयति भावयति आशु
तस्य वस्तुनो भावं स्वरूपं गच्छति तद्रूपं तु वर्तते बुद्बुदवीचिन्तामिव॥ ॥ कदाचित्समाधानविरतो तिष्ठदेकधीः

श्री॥ ३५४

604

२१

किंचित्सं चिंतयामास स्वासनस्थः क्रियाक्रमं ॥४॥ समानविरहः समाधेर्व्युच्छितः। क्रियाक्रमं व्यवहारप्रकारं ॥ शेषस्य हृ
तस्य चिंतयतो जाता प्रतिमेयमिति लिखितः। भावयाम्याशु लीलार्थं सामान्यजनवृत्तितां ॥५॥ चिंतयतस्तस्य लीलार्थं
विनोदार्थं सामान्यजनवृत्तितां सामान्यजनतः स्मार्थो गजनः पामरजन इत्यर्थः। तद्वृत्तितां भावयामीति स्वत एव
यं प्रतिभाप्रज्ञाविशेषो जातः ॥६॥ इति संचिंत्य चेतोस्य स्थितं किं विस्तरोत्तरं। स्पंदसंस्थानसंत्यागमात्रेणावर्तितं ॥ तेन निर्मितं स्व
ष्विवा ॥६॥ इति पूर्वोक्तप्रकारेण संचिंत्य तस्य चेतः तदा चिंतानुसारेण नरांतरे गुरुर्वांतरमं भ्रमं ॥७॥ स्पंदस्खलने संस्थानसंत्यागः
अहं तेनात्मानं वांछया तथा हि चेतश्चिंतावशात्स्पंदसंस्थानसंत्यागमात्रेण स्पंदस्खलने संस्थानसंत्यागः [illegible]
निवेशात्यागः पूर्ववासनात्यागः इत्यर्थः। तन्मात्रेणावर्तितरूपांतरं प्रविपद्यते। अंब्धिवयथा हि द्विलं वायुवेगाद्वलि
सरः पूर्वसंस्थानत्यागनंतरंगादिरूपतामापद्यते तद्वत् ॥८॥ तेन चिंतांतरेणाथ हतेनात्मानं वांछया। जीव
स हंसाकाकतालीयवांछितं ॥९॥ तेन चिंतांतरेण चिंताकल्पितपुरुषेण स्वयमेवास्मीति जीवः स्मीति
लीयवांछितं यदृच्छया स्मिमतां पुनरपि जविद्याधरादिनामसु प्रार्थनामकृतं स्वतेनैव काचिद्व्यक्तनास
त्यर्थः ॥९॥ जीवको विजत्वाराथ स स्वप्नपुरुषस्थिरे। स्वप्ननिर्माणनगरे कस्मिंश्चित्सुरवीथिषु ॥१०॥ बुध्वनिसर्ग
हस्वेति स्वप्नपर्यंतः स्वप्नपरंपरा तत्र पीनैर्यानं प्रपामत्तो मदनिद्रामवाप च। स्वप्ने ददर्श विप्रं स प्राणा
मत्राप्य प्रतिभामात्रमात्रसंपन्नं वित्ते देशांतराप्नि वरं। कदाचित्स हि जन्मेष्टः स्वल्पव्यापारनिरतः [illegible]
जीवक इत्यादि इयमिह जीवकप्रभृतिरूढपरंपर्यंता स्वप्नप[illegible]

वहति वीज्जावस्थामिव द्रुमः ॥ ...दिडो पश्यन् स्वयं स्वप्ने सामंतत्वमथात्मनि ॥११॥ स सामंतः क्षणात्सारः क... ष्टि

न निद्रया ॥ अपश्यद्राजतो स्वप्ने कंअंचलयपालिनीं ॥१२॥ स कदाचिन्नृपः स्वस्थः सुखापास्तमितेहितः ॥ अपश्य...

स निस्वप्ने सुरस्त्रीवमनिंदितां ॥१३॥ सा सुरस्त्रीरतिश्रांता निद्रां गाढामुपागता ॥ अपश्यदात्मनि स्वप्ने मृगी...

तिवैवलं ॥१४॥ सा मृगीलोलनयना कदाचिन्निद्रया युता ॥ स्वप्ने ददर्श वल्लीत्वं त्याभ्यां हृढमात्मनि ॥१५॥ ति...

सोपि अपश्यंति स्वप्ने चित्ते स्वभावतः ॥ हृष्टानां अंकुतानां च चेतः स्मरणमकृते ॥१६॥ सा बध्वे वलताडाग्रफल...

लवशालिनी ॥ वनदेवी वनक्रीडालता दृष्ट्वा विलासिनी ॥१७॥ बीजांतस्थांकुराकारसामर्थ्याधिरूढया ॥...

स्यद्वं तं सवित्या स्फुटं लंबनमात्मनः ॥१८॥ कंचित्कालं सुश्रुतस्थ कल्पयाजडतां घनां ॥ जहौ त्ते यददर्शा...

मानं भ्रमरस्थितो ॥१९॥ सबंसरोजिन्यां व्यसनी बिसनालगः ॥ कश्चिद्देवरतिर्यातिचेतो जं...तेरवौ ॥२०॥ तामा...

गोमनलिनीपारिलोलचित्तंगजः ॥ रम्यवस्तूकृपायैव सूतानां जृंभते पदं ॥२१॥ नलिन्यासतया सार्द्धतेन...

र्णवमायया ॥ भ्रमरो वारणालोका द्वारणालोकभावना ॥२२॥ ददर्शात्मानमामोदमत्तहस्तिनत्यो दितां गुह...

सागरगं गिरिगजः खाते पपात तदा बिभ्रद्वल्गुभाराज्ञो बध्वा तेन शृंखलितः ॥२३॥ क्वचित्समरसंमर्दे घातितोस्त...

पाययो ॥२४॥ गंडस्थभ्रमराश्यासीत् जौ भूयोप्यभूद्दलिः ॥ पुनः करिखुराक्रांत्या पद्मिन्यां पूर्णतां ययौ ॥२५॥

त्तवध

२ तत्रकुहिरमूलस्यरूढोऽहमितिनिश्चिता २

पार्श्वस्थ हंससंचित्रासावत्सवकलहंसकः ॥ कलहंसस्थिरतरं यो निषण्यांस्तु संस्तुठगुरुहायदृछया कदाचित्
जातः पम्पासारसंगःसकदाचिददर्शोथ रूढं रूढगुरेखवगः ॥२७॥ जीवदृः स्वचपाठावधानेन हिम रूपा वेनतदृतं
वारणपाचतुर्हिमराकृतेतत्कृत्याप्रति भामात्रेणैवसंपन्नं विप्रवंददर्श । चित्रे देशांतरा त्रिवरयथा प्रिचित्रे देशां
तरमापद्यते तद्वरासचद्धिजे अष्टः कदाचिद्दृष्यापारतिगयादिवसव्यापारसरणेश्रांतिहेतुना । बीजरूप
तांपादपइवघननिद्रामागतः स्वप्नआत्मनिपतताकायुक्तदृस्य आदिसनयेवजलदमालयायुक्तं सामंतत्वंम
डलेपरस्यशासचनृपः सुरस्त्रीवं सावसुरस्त्रीमृगीवं सामृगीवल्लीवांततस्तिर्यंचोपी स्यर्थांतरन्यासः । यतो हेम
नांश्रुतानां च चेतोकृतं अनुपदत्तं स्मरणं स्मृतिहेतुः ॥२८॥ नो हस्तोः संस्कारवशात् तिर्यंचोपि स्वप्नं पश्यंति । सा
लतावनदेवानां वनक्रीडास्थलता गृहवरं विलसंतीव भृवासावलता बीजांतः स्थांकुराकारसमर्थेयाधिरूढं
बीजांतस्थांकुरस्य यः आकारस्तत्समेन निरूढेन ज्ञेयवस्कना अधिरूढया आश्रितया अंतः संचिंत्य आत्मना
लतादेहदौर्धार्यालंबमानं लतामावो चितं वृक्षादोद्धविरुलंघनमपश्यदितिलताया जायदशा दर्शिता ॥ अ
थसैवलतास्तुस्तस्यस्थकलयास्तुस्तस्थस्यया दृशीकलासं वितिता दृश्येव कलयाघनांजड तां निजरूपं जाय
मभ्युपस्य स्वप्नस्यात्मानं भ्रमरस्थितं ददर्श ॥ ॥ सच भ्रमरः सरोजिन्यां मसन्यासके सनूबिसनालगोबहस्व ।

गते २ पे २

तथा हि गजेंद्रमत्तेरपि रसानभिज्ञस्य कृमिकीटादेरपि चेतनं किंचिदेव स्त्रीव्यक्तोरतिं याति। स च भ्रमरस्तया नलिन्या
सार्द्धं गजेन्द्रेण घूर्णमानस्तद्रूपालोकभावनया आत्मानमामोदमत्तहस्तितया आमोदेन गंधविशेषेण मत्तो यो हस्ती त
द्भावेनोदितं तद्देशे। स च गजः केन चिद्राज्ञा रवात्तेमत्त्यं निपात्य बद्धः शिक्षितश्च। राजवल्लभो भूत्वा कं चित् समरे हन्य
मानो गंडस्थलगतभ्रमरभावनया पुनर्भ्रमरो भूत्वा। स च भ्रमरः करिपदाक्रांतो घूर्णितः पार्श्वस्थहंससंविसाकमल
हंसो वभूव स च कलहंसो योन्यंतरे शुश्रुवन्यहं तु यायमजस्य ब्राह्मणः सारसो हंसो जातः। स च खगो हंसः कदाचित्
~~कस्मिंश्च~~ ब्राह्मणो रुद्रपुरगामने रुद्रं दृष्ट्वा तद्भावनया रुद्रोहमिति संस्कारवशान्निश्चितबुद्धिर्भूत्वा। रुद्र भूत्वा तत्पु
रस्तत्र विजहार यथेच्छया। ते स्तोः शिवपुराचारे गणानां श्री विलासिभिः॥२८॥ तत्र रुद्रपुरे रुद्रभूत्वा पुरः रुद्राकारवपुरयं
हंसो गणगोष्ठी विलासिभिः प्रथमपरिवलसंभूतैस्तैस्तैः प्रसिद्धैः शिवपुराचारैः रुद्रलोकव्यवहारैः शिवमाहात्म्य व
र्णनादिभिः यथेच्छया विजहार॥ रुद्रस्त्वनुत्तमज्ञानविलासिन्या तया ततः स्वमशेषमुदंतं तं अपश्यज्ज्ञाके नेवि
या॥२९॥ स तु रुद्रत्वनुत्तमज्ञानविलासिन्या सर्वत्रिमज्ञानविलासिन्यास्तारयातया धिया आकृतं सर्वं जन्मसं
तं अशेषं स्वमुदंतं वृत्तांतमपश्यत्॥ निरावरणविज्ञानवपुः स भगवान् हरः। उवाच स्वयमेकांते स्वं मनसि तवि
स्मितः १ त्रेमः॥३०॥ निरावरणं जन्मांतरेष्वावरणरहितं विज्ञानमेव वपुर्यस्य स भगवान् हरः स्वस्य जातविस्मितः स्वीयम

अध्या ३९६

608

स४

स्वप्नशातेन विस्मितः सन्नेवं कांते स्वयमेव मुवाच ॥ ३० ॥ अहो नु चित्रा मायेयं वनविश्वविमोहिनी । असत्सैवापि सद्रू
पा सुरूढा मरुवारिवत् ॥ ३१ ॥ इयं माया असत्यैवापि मिथ्याभूतापि मरुवारिवत् सुरूढा सती सद्रूपा विश्वं विमो
हयति ॥ ३१ ॥ एवमिति श्लोकत्रयं वाक्यं । एवमत्यंतविचित्रासु संसाराख्यासु मिश्रु बद्धोऽहमिति भावाचीर्णोऽस्म्यात स्वशक्त्या स्वि
वेषरिशः ॥ ३२ ॥ कस्मिंश्चिद्भवे स्वर्गे वटजीवटनामकः । कस्मिंश्चिन्नुब्राह्मणश्रेष्ठः कस्मिंश्चिद्वसुधाधिपः ॥ ३३ ॥ हंसः पम
वने भूत्वा विंध्यकच्छे च वारणः । एवं योनिशतं गच्छन्यातोऽहमिति रुद्रतां ॥ ३४ ॥ अत्यंतविचित्रासु संसाराख्यासु मिश्रु बद्धो
ऽस्म्यातोऽहमिति स्वमनोमात्रकल्पनादनेकेषु सर्गेषु जीवटादिरूपेण योनिशतं गच्छन्निदानीं रुद्रतां गतः ॥ ३४ ॥ त्र
ति श्लोकत्रयं वाक्यं । अत्र वर्षसहस्राणि चतुर्युगशतानि च । समतीतान्यनंतानि दिनानुरवितानि ॥ ३५ ॥ तान्स
र्वांश्च संसारानुल्लाघ्यालोकयाम्यहं । सम्यगालोकदानेन तेभ्य एव करोम्यहं ॥ ३६ ॥ इति संचिंत्य रुद्रोसौ तेन सर्गं प्र
जगाम ह । यत्र भिक्षुर्विहारस्थः सुप्तः शव इव स्थितः ॥ ३७ ॥ असौ रुद्रोत्र जन्मांतरेषु वर्षसहस्रादिरूपे भूयः कालेन
तः तस्मात्तांस्तान्नानारूपान्स्वसंसारानुल्लाघ्य गत्वा आलोकयामि तेभ्यः सम्यगालोकदानेन सम्यग्ज्ञानद
दानेन तन्मया सहैकीकरोमि । इत्येवं संचिंत्य यत्र सर्गे भिक्षुर्विहारस्थो मठे स्थितो विहरस्यस्मिन्भिक्षुवदिति वि
रोम ७ तन्च्यतो सुप्तः शववदास्तो तं सर्गं प्रजगाम ॥ ३७ ॥ बोध इत्याथ ० तं भिक्षुं चेतसा चेतनेन चायोजयामास स्मारं भि

क्षुरव्यात्मनो भ्रमं ॥३७॥ बोधयित्वाथ बोधश्चैतत्सा चित्तेन चेतनेन तज्ज्ञानेन च योजयामास भिक्षुरव्यात्मनो भ्रमं सस्म
र ॥३८॥ रुद्रमात्मानमालोक्य जीवटादिमयं तथा ॥ बोधाद्विस्मयमाप्तेपि स भिक्षुर्विस्मयैर्ययौ ॥३९॥ स भिक्षुरात्मानं रुद्र
मालोक्य तथा जीवटादिमयं चात्मानमालोक्य नो भास्वरमार्थावगमात् ॥ अविस्मयापन्नोपि मायीयामहिम्नो विस्म
यं ययौ ॥३९॥ अथ रुद्रस्तयाभिः क्षुर्द्वविबोधाय जगन्मतुः ॥ क्वापि जीवटसंसारं विदाकारो रोकको णगं ॥४०॥ अथ रुद्र
स भिक्षुर्बन्धूंश्च तं प्रबोध्य नियोज्याशु चेतसा चेतनेन च ॥ बोधयंतस्तु योऽव्यासन्नु विस्मिता अथ विस्मिताः ॥४१॥ ए
कस्तपास्त्विरूपास्ते रुद्रभिक्षुकजीवटाः ॥ जग्मुर्विप्रादिसंसारान्नृ तैश्च संमिलितास्तथा ॥४२॥ दिव्यज्ञानाविरु
स्ते रुद्रांशास्से नमुन्नमी रुद्रेणाप्रेषिताः सर्वे तेप्रतिरवं स्वमालयं ॥४३॥ तेन रुद्रेण तां मायामवलोक्य तथोदिता
स्वांशास्तामेव संसारस्थितिं संप्रेषिताः पुनः ॥४४॥ अथ पुः स्वास्पदे तेपि जीवटब्राह्मणादयः ॥ स्वकलत्रैः समं दे
हपश्चात्राथ कालेन तः ॥४५॥ अथ रुद्रेण भिक्षुवरजीवटादीनामपि प्रबोधने सति ते सर्वेपि रुद्रवद्दिव्यज्ञानतया
रुद्रांशास्संतो विरेजिरे ततो भिक्षोर्जन्मशतोपभोग्यप्रारब्धशेषमनुसंधारय परमार्थरुद्रेण प्रेषिताः संतो जी
वटादिसंक्रांता रुद्रांशाः स्वस्वमाकयश्राद्धः ॥ रुद्राणां तत्स्थानानां च बहुत्वात् ॥ स्वंस्वमिति वीप्सानिर्देशः ॥ तेपि जी

अथेत्यादि

श्री॥
३५

610

यत्स्वप्ने दृश्यते यच्च संकल्पैरवलोक्यते तत्प्राप्यावियते नलं सर्वकाल तं तदात्मकं ॥२

रत्नाकराद्यः स्वस्वमास्पदं प्राप्य स्वकलत्रादिभिः सहविहारादेरुत्तरे रुद्रमाप्नुवन्ति निश्लोकषष्ठ्यार्थः ॥६॥ वसिष्ठ
उवाच सर्वमस्ति चितिः कोशे यद्यथा लोकयत्यसौ । चित्तं यथा तदेवाप्नोति सर्वात्मित्वादसंशयं ॥४८॥ चितः कोशे कोशव
त्समस्तवस्तुनिधौ स्वरूपे सर्वं वस्तु स्थितमतः सर्वात्मित्वादसौ चित्तं यथा तत्तथैव प्राप्नोति तदात्मकं तद्रूपं स सर्वं क
लं विद्यते सर्वस्यापि संविद्विवर्तत्वात् ॥७॥ यं ॥८ — दि विद्यते तर्हि न प्राप्यते इत्यत आह संकल्प्येति संकल्प्यस्वप्नगं वस्तु
यथादर्शयाप्यते परमाभ्यासयोगाभ्यां विनात्वे तन्न लभ्यते ॥७॥ संकल्प्यस्वप्नगं कं संकल्पगतं स्वप्नगतं वस्तु
यथा दर्शया प्राप्यते सैव सिद्धदृशा अभ्यासयोगाभ्यां वायुनिरोधनेन चित्ता लभ्यते ॥७॥ येषां तु योग विज्ञानं
हृयः फलिताः स्थिताः सर्वे सर्वत्र पश्यन्ति ते ते ॥ तेशं करादयः ॥४०॥ येषां तु सिद्धानां योगविज्ञानदृष्टयः योगः समाधि
विज्ञानमध्यात्मशास्त्रज्ञानं तज्जन्या दृष्टयो दर्शनानि फलिताः फलवत्यः स्थिताः ॥ ते एव शंकरादयः स्वसंकल्प्य
नुसारेण सर्वं वस्तु सर्वत्र देशे काले च पश्यन्ति ॥७॥ सर्वत्वाभिमतं कार्यमेकनिष्ठस्य सिध्यति दक्षिणां कक्षान्तपद्मम्
नामोत्तरां दिशं प्राप्नोति ॥७॥ अभिमतं सर्वं कार्यमपि एकनिष्ठस्य तदेकनिष्ठस्यैव सिध्यति दक्षिणां ककुभं प्रस्थानु
॥५०॥ संकल्पार्थपरे वसंकल्पार्थावगम्यते ॥ [illegible]
॥५०॥ संकल्पार्थमत्स्यरेवावगम्यते प्राप्यते ॥ अग्रसंस्थितार्थः अग्रे पुरोभागे स्थितो व्यर्थः ॥ अग्रस्थार्थपरे ... नं

अहं श्लोकुत्रुकमाप्नेर

७७

वस्तु तस्यैवावगम्यते ॥ ७ ॥ अन्यस्त्वेवबुद्धिसंस्थेयः संकल्पं प्राप्तुमिच्छति । तदासावेकनिश्चयत्वादेवागान्नाशयेदयं ॥ ८ ॥
योऽमूढो यस्त्वेव वस्तुनि बुद्धिस्थो बुद्धौ स्थिते सति संकल्पं संकल्पितमर्थं प्राप्तुमिच्छति तदा अविवेकी एकनिश्चयाभावाद
कर्तृतास्वर्याभावान्नद्वयं अग्रस्थं कल्पितं चोभयं ताश्रयं शायर बुद्धिस्थं तत्र प्राप्तुमिच्छति । न तद्बुद्धिस्थमेतस्मै भयोर
प्यसिद्धं विनाशः ॥ ७ ॥ इन्द्र विद्याधरोऽहं स्यामहं स्यामिति वैदिकः । स्यैकज्ञानसाफल्यं दृष्टांतः कार्यसिद्धयो ॥ ९ ॥ अ
हं देशे काले च विद्याधरः स्यामिति वा अहमिन्द्रो वैदिकः स्यामिति वा यदेकध्यानसाफल्यं एकवस्तुविषयस्य
ध्यानस्य फलसंबंधः स एव कार्यसिद्धये दृष्टांतः ॥ ७ ॥ तस्मादेकार्थनिश्चयात् भिक्षुर्जीवेन रुद्रतां प्राप्य रुद्रात्मना
लब्धा संकल्पार्थस्य सत्यता ॥ १० ॥ तस्मात्सर्वोऽकाहितारेकार्थनिश्चयात् संकल्पार्थैकनिश्चयात् भिक्षुरूपेण जीवेन
रुद्रतां प्राप्य तेन रुद्रात्मना संकल्पार्थस्य सत्यता प्राप्ता ॥ ७ ॥ भिक्षुसंकल्पजीवास्ते प्रत्येकं तत्तथा जगत्वो पश्यंति रुद्र
रूपत्वात् प्राप्ताः सर्वे च सत्यतां ॥ ११ ॥ ते भिक्षुसंकल्पसिद्धा जीवा रुद्ररूपत्वात् संकल्पानां सत्यतां साफल्यं प्राप्ताः त
तः प्रत्येकं तज्जगत् पृथग्विलक्षणं पश्यंति । स्वतंत्रत्वात् रुद्रस्य संकल्पाद् इति भावः ॥ ७ ॥ एवं ते भिक्षुसंकल्पा जीवटाभा स्वप
स्य रुद्रविज्ञानवशात् स्वसंकल्पपुरीं गताः ॥ १२ ॥ ते सर्वे भिक्षुसंकल्पकल्पिता जीवटब्राह्मणादयः रुद्रमति
म्नास्वसंकल्पपुरीः स्वसंकल्पकल्पिता निरस्थानानिगताः प्राप्ताः ॥ ७ ॥ ततो रुद्रेण संगत्य विविक्तस्तत्परैः पदार्थैः

यो॰ ४
३१८

612

वसिष्ठउवा

राम उवाच एवं ते भिक्षुसंकल्पजीवटब्राह्मणादयः कथं सत्यत्वमायाताः संकल्पार्थक्रसत्यताः ॥१॥ एकैकः स्वं स्वं उवतियथा वेषजनार्दनः ॥ श्रीशावतारलीलाभिः कुरुते जागती स्थितिः ॥२॥ एवं ते भिक्षुसंकल्पा जीवटब्राह्मणादयः संशुद्धसंविदेकोशाः सत्याइव किल स्थिताः ॥५८॥ ॥२॥ इति श्रीरामायणे वाल्मीकीये मोक्षोपाये श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्सुखप्रकाशपूज्यपादशिष्यश्रीमदात्मसुखकृतो वासिष्ठचंद्रिकायां निर्वाणप्रकरणे सारतरणिनाम्नि शवतरुशाख्यानं नाम बद्ध्वि(?)शः सर्गः ॥ ॥३॥ ॥सर्वमेवाजन्मपरं पराख्य संकल्परूपभ्रांतिसिद्धिनिदर्शयित्वा शवतरुशाख्यानमुक्तं इदानीं सौषुप्तमौनसंपादयिकं वक्तुं कर्कटीप्रश्नसंघवरुघटीवेताल प्रश्नघोनिरूप्यते। वसिष्ठ उवाच। सुषुप्तमौनवान्भूत्वा सन्ता चित्तविलासिताकुलनामलनिर्मुक्तः स्तिष्ठावष्टब्धतसद ॥१॥ चित्तविलासितां संकल्पादिरूपं चित्तविलसितस्य त्योकलनामलनिर्मुक्तो वासनारूपमलरहितः सुषुप्तमौनवानुवक्ष्यमाणलक्षणसुषुप्तमौनयुक्तो भूत्वा अवष्टब्धतत्पदः अलं बितब्रह्मभावस्तिष्ठ ॥१॥ श्रीराम उवाच। वाङ्मौनं अक्षमौनं च काष्ठमौनं च वेद्म्य हं सुषुप्तमौनं त्वं ब्रह्मन्ब्रूहि किमुच्यते ॥२॥ मौनेशमुनीनां सुषुप्तमौनं तस्येशमुनिश्रेष्ठ स्वर्थः शिष्टसमानं ॥७॥ वसिष्ठ उवाच। द्विविधः प्रोच्यते राम मुनिर्मुनिवरैरिह ॥ एकः काष्ठतपस्वी स्याज्जीवन्मुक्तस्तथापरः ॥३॥ एतत् श्लोकार्धमेकं स्पष्टार्थं अपरं अभाविताया मिश्लोकद्वयेन विविच्यते अभाविताया शुष्काय ...मायां

मौनं २

वागिसाद्दिनावाङ्मोगादीनां सद्भं शुद्धं ...

९६

हनिश्चयः ॥ हठाज्जितेन्द्रियग्रामो मुनिः स्यात्काष्ठतापसः ॥ ब्रह्मभावितायां ब्रह्मभावरहितायां अतःशुष्क
रसायां क्रियायां प्राणायामादिरूपायां बद्धनिश्चयः सन् हठयोगाज्जितेन्द्रियग्रामो मुनिः काष्ठतापसः स्या
यथाभूतमिदं बुद्ध्वा भावितात्मा निःस्थितः । लोकोपमो चित्तमौनी यः स मुक्तो मुनिः स्मृतः ॥५॥ यो मुनिरिदं जगद्य
याभूतं तथा बुद्ध्वा ब्रह्मैवेदं सर्वमिति निश्चित्य भावितात्मा ब्रह्मैवाहमिति निश्चितात्मा नवः आत्मनि स्थितः ॥ रूपस्व
वाचु संदधानो व्यवहारमात्रेण लोकोपमोपि अंतः स्वरूपसुखानुभवात् [illegible] इति समुक्तो मुनिः
तः ॥७॥ उपायानुगतं सामान्यलक्षणमाह तयोरिति । एतयोर्यो भवेच्छ्रावः शांतयोर्मुनिनाथयोः । चित्तनिश्चयरूप
सा मौनं शब्देन कथ्यते ॥८॥ शान्तयोर्निर्विकारचित्तयोरेतयोः प्रकृतयोर्मुनिनाथयोः चित्तनिश्चयरूप
शानेन वाचयश्चित्तनिश्चयः एकनिष्ठता तद्रूपं आत्मस्वभावो यः सत्तादृशो भावोभिप्रायो मौनशब्देन कथ्यते ॥ मुमुक्षु
मौननिरूपणाय प्रथमं मौनांतराणि लक्षयन्नाह वाचेति । वाङ्मौनं वचसां रोधो बलादिंद्रियनिग्रहः ॥ अक्षमौनं परि
त्यागः चेष्टानां काष्ठसंज्ञकं ॥९॥ वचसां निरोधः ज्ञानेन वाङ्मौनं बलाद्धठयोगवशाच्च रागादींद्रियनिग्रहः अक्षमौनं
हठादेव चेष्टानां शरीरस्य देहयववक्रियाणां परित्यागः काष्ठमौनं ॥९॥ प्रस्फुरच्चित्तकलनं एतन्मौनत्रयं स्थितं ॥ एतेषां
मौनानां विषयः काष्ठतापसः ॥ एतत्सर्वं किं मौनत्रयं प्रस्फुरच्चित्तकलनं विलसच्चित्तवासनं स्थितं एतेषां

अविभागमि–

ब्रह्मोनानां कार्यतापसएव विषयभ्रान्त्या योन जीववस्तु क्वइति विपर्ययः ॥छ॥ अथ स्तेत्यादिभिश्चतुर्भिः श्लोकैः सु
तमोनमो दाक्षविभागमनायासं यदनाद्यंतमास्थितं । ध्यायतो ध्यायतो चैतत्सोऽहं ब्रह्मोनमुच्यते ॥१॥ ध्यायतोऽध्यायतो वा
अंतर्मुखस्य बहिर्मुखस्य वा मुनेर विभागं अविद्यमानजाग्रदादिविभागं अनायासं अविद्यमानज्ञानकर्मेंद्रिय
निरोधक्लेशं अनाद्यंतमुपक्रमोपसंहाररहितं यच्छद्वास्थितं ब्रह्मनिष्ठवं एतत्सोऽहं ब्रह्मेति सुदृढं मोनमुच्यते ॥
हायोग एव वस्तुसुब्रह्मोनमित्यर्थः । यदा हृस्सर्वं जयो गो । अपंच स्वभानेप्यभाने व्यभाने सममंयतया विद्यया विद्यया
ध्येयालिंगितांगा । तदात्मस्वरूपं दत्तदानंदं सोऽहं परब्रह्मभानेन महायोगमाहुरिति । यथा च शैवे । शिवस्वभाव एवैकः
विस्तेनेनिरुपाधिकः । यभासेवमनोवृत्तिर्महायोग इहोच्यत इति ॥छ॥ यथास्तमिदं बुधा । जगन्नानात्वविभ्रमं यद
स्थितमसंदेहं सोऽहं ब्रह्मोनमेव तत् ॥१०॥ नानात्वविभ्रमं नानात्वेन परिभ्रांतमिदं जगद्यथास्तं येन प्रकारेण तिष्ठ
त्तं तं प्रकारं बुधा । अन्यथ्यस्तत्या तदात्मकं तिष्ठित्यपसंदेहं निर्विकल्पं यद्ब्रह्मभावेनावस्थितं तत्सोऽहमिति मोन
मेवाकविंतु सोऽहं मौनसंगतमिति ॥११॥ तत्र मौनसंगतं मौनेसंस्थानं मौनस्य प्रकारमित्यर्थः ॥छ॥ अनेकसवि
रूपात्मशिवमेवदमानं तां रस्यास्थितमनंतं यत्सोऽहं ब्रह्ममौनमुच्यते ॥१२॥ अनेकसंविद्रूपात्म अनेकसंविद्रूपात्मा
नःस्वभावायस्यतादृशोब्धानंतं व्याप्तं शिवं ब्रह्मैवत्तियदनंतं निरवधिकमास्थितं ब्रह्मनिष्ठं तत्सोऽहं ब्रह्ममौनमुच्यते ॥

आकारंनैवचाकारंसर्वमस्तिननास्तिवाइतिस्थितंसमंशांतंयत्नन्मोनमस्तुभ्यमव्ययः॥९॥सर्वंजगदाकारंचिदाकारा
विवर्त्तितं॥आकाशंनैवचमूर्त्तिवाइ॥१०॥तथाअस्तित्वअधिष्ठानसत्तायाःसद्रूपेणप्रतीतेःनास्तिवकल्पितत्वा
दितिजगतोब्रह्मव्यतिरेकेणनास्तित्वंतिष्ठितंसमममेकाकारंशांतंनिर्विकारंत्वयेत्स्थितंयानिष्ठातस्मैतुभ्यमवन्मो
नमस्तुभ्यमतुल्यमानमित्यर्थः॥७॥स्तुभ्यमनोनंयोगीशैर्विविधैःप्राप्यतेखलुसांख्यायोगिनएकेस्फुरपरेयोगमार्गिणः
॥१३॥सांख्ययोगिनोयोगयोगिनश्चवदंतेसम्यग्ज्ञानावबोधेनसिद्धएकसमाधिना।सांख्ययेवावबुद्धायेतेसांख्यायो
गिनःस्मृताः॥१४॥सम्यग्ज्ञानावबोधेनतत्त्वज्ञानोदयेनसिद्धायएकसमाधिःएकस्मिन्नद्वितीयब्रह्मणिचित्तविश्रांतिः
तदुपलक्षितायेयोगिनस्तेसांख्ययेवसम्यग्ज्ञानेनैवबुद्धाइतिहेतोःसांख्ययोगिनःस्मृताः॥७॥प्राणाद्यनिलसंशां
तोयुक्त्यायेपदमागताः।अनामयमनाद्यंतंतेस्मृतायोगयोगिनः॥१५॥येतुयुक्त्याअष्टांगयोगेनप्राणादीनामनिला
नांसंशांतशांतोसत्यांअनामयमनाद्यंतंचपदमागतास्तेयोगयोगिनःस्मृताः॥७॥उपादेयंतुसर्वेषांशांतंपदमकृ
त्रिमं।यत्सांख्यैःप्राप्यतेस्थानंपरंयोगैस्तदेवहि॥१६॥शांतमकृत्रिमंपदमेवसर्वेषांयोगिनामुपादेयं।अतोहेतोःसांख्यै
र्योगिभिःयत्स्थानंप्राप्यतेयोगैरपितत्परंस्थानंप्राप्यते॥७॥किंतत्पदमित्यत्राहयत्रेति।यत्रप्राणमनोवृत्तिरस्तंगता
पलभ्यते।वासनावागुराक्रांतातद्विद्धिपरमंपदं॥७॥यत्रयस्मिन्पदेवासनावागुराक्रांतावासनैववागुराबंधकर्त्री

श्री०॥

२२०

२८८

सम्यक्

ध्यायतस्याकांतत्वाभावात् प्राणमनसोर्वृत्तिव्यापारः अत्यंतं नोपलभ्यते तत् देवास्य स्वरूपं परमं पदं विद्धि परब्रह्मस्वरूपं वि
द्धि ॥ मनो मुधैवाकांक्षति तेष सदेवानवेक्षणात् स्वप्ने स्वमरणाकारं प्रेक्ष्यमाणं न विद्यते ॥१८॥ मनस्तावदस्तीवस्क्त
ः सदेव अनवेक्षणाद विचारात् मुधैव स्वप्ने स्वमरणवदुल्लिखितं ॥ अतः प्रेक्ष्यमाणं विचार्यमाणमपि सत् न विद्यते ॥ अविचार
सिद्धस्य विचारेण निवृत्तिर्युक्तैवेति भावः ॥ एकतत्त्वघनाभ्यासः प्राणानां विलयस्तथा ॥ मनो विनिग्रहश्चेति म
रुक्षोक्षार्थसंग्रहः ॥१९॥ एकतत्त्वघनाभ्यासः एकस्यैव वस्त्वात्मनस्तस्य तत्त्वस्य निरंतरं अनुसंधानं तथा
प्राणानां विलयो मनोनिग्रहश्चेति ॥ त्रितयमेव मोक्षरूपस्यार्थस्य संग्रहः ॥ अत एतदेव मोक्षसाधनमि
त्यर्थः ॥ एकार्थाभ्यसनप्राणरोधचित्तपरिक्षयाः ॥ एकस्मिन्नेव संसिद्धे संसिध्यंति परस्परं ॥२०॥ एक
तत्त्वाभ्यासादीनां त्रयाणां मध्ये एकस्मिन्नपि सिद्धे इतरेऽपि सिद्ध्यंतीत्यर्थः ॥ अविनाभावनीतिश्लोकद्व
यं वाक्यं ॥ अविनाभावनी नित्यं जंतूनां प्राणचेतसी ॥ कुसुमामोदयन्मिश्रे तिलतैलेइवस्थिते ॥२१॥ आधाराध
यवच्चैते एकाभावे विनश्यतः ॥ कुरुतश्च स्वनाशेन कार्यं मोक्षाख्यमुत्तमं ॥२२॥ जंतूनां प्राणचेतसी कर्तृणी अविना
भाविवान्निले तैलवत् कुसुमामोदवदाधाराधेयवच्च मिश्रे परस्परसंगते एव स्थिते अतो हेतोरेकस्याभा
वे द्वे अपि विनश्यतः ॥ स्वनाशेन कारणेन मोक्षाख्यमुत्तमं कार्यं कुरुतश्च ॥ एकस्मिन्नुदिते तत्त्वे तावच्चांव

विभावयेत्॥ तावेत्तावत्त्वमायाति स्वभ्यासाद्यावदानतं॥२४॥ सुंदरे ग्रामणिकेएकस्मिंस्तवे तावज्ज्ञावं चित्त
ह्रतिं विभावयेत्प्रवर्तयेत्॥ यावज्जावः स्वभ्यासात् हेतोरात तं सततं तावच्चं भाव्यमानं तत्त्वरूपत्वमायाति॥छ॥
यदेकतानं भवति चेतस्तद्भवति तद्रूपा॥ शांतारो॥ चित्रबोधं चिराभ्यासस्य प्रभावतः॥२५॥ चेतः चित्तं यदेकतानं यस्मिन्
स्तन्येकाग्रं भवति चिराभ्यासस्य प्रभावतः चिरकालानुसंधानवशात्॥ शांत॥ तारोषविशेषबोधं निरंतनिखिलप्रदेश
रद्रूपाणां तदेव वस्तु भवति॥छ॥ वसिष्ठ उवाच॥ संस्मृतिस्वपनविभ्रांतो वेतालो दाहतानि मान्नुपश्नानाकर्णय प्र
भान्नप्रसंगात्स्मृतिमागतान्॥२५॥ स्पष्टं॥छ॥ अस्ति विंध्यमहाटव्यां वेतालो विपुलाकृतिः॥ स किंचिन्मंडलं ग्रामात्
आजगाम जिघांसया॥२६॥ मंडलं देशं॥ जिघांसया उद्रूपछया॥ शेषं स्पष्टं॥छ॥ स वेतालो ऽवसत्तत्र वंकस्मिंश्चित्
ज्ज्ञानास्पदे बहुबल्कपत्रेण नित्यं तृप्ततया सुखी॥२७॥ बहुवल्कपत्रारेण मांसादिकल्पितबहुविधबलि
समर्पणेन॥ रतरत्तमानं॥छ॥ निर्निमित्तं निरागस्कं पुरो भ्यागतं नसः॥ क्षुधितोपि नरं हंति सन्तो हि न्यायद
र्शकाः॥२८॥ स वेतालः क्षुधितोपि निरागस्कं निरपराधं नरं पुरोभ्यागतमपि निर्निमित्तं न हंति॥ हि यस्मात्कारणा
त्सतो विद्वांसः न्यायदर्शकाः न्यायस्यप्रवर्तकाः॥ वेतालो बलविशेषात् अन्यायेन न हंतीत्यर्थः॥छ॥ स कदा
नाटवीगर्हो ग्राम नगरं नरं न्यायवृत्त्या नर द्रोहं क्षुधा समभ्यसिना दितः॥२९॥ स्पष्टं॥छ॥ नवप्रापसभ्रपा

श्री॥
३२१

२५७

618

क्ष २

सार्द्धत्रयेण ... नवउक्तराव सरस्कृ ... व्यतिरिक्त ... राजानि

रात्रिचर्याविनिर्गतं ।तमादवनघोरे प्राह्येनोग्रनिशाचरः ।३०। रात्रिचर्याविनिर्गतं राजानो हि राज्यरक्षितं विचा
रयितुं एकाकिनः प्रच्छन्नवेषेण रात्रौ वदंति । तया रात्रिचर्यया विनिर्गतं । शेषं स्पष्टं । वेतालउवाच । राजन्नुद्धोसि
धीमन् वेतालेन मयाधुना । [illegible] सि विनष्टोसि तव भोजनमद्य मे ।३१। राजोवाच । रात्रिंचर निर्न्यायं मां वद स्त्रिव
लादि हात त्रेस ल्लवधा मूर्ध स्फुटिष्यति न संशयः ।३२। वेतालउवाच । न त्वामन्यथ मत्वायं न्यायो वृद्धि मयोच्यते ।
राजासि सकलाशास्त्रधूरणीयास्त्वयार्थिनां ।३३। श्लोकत्रयमेतत्स्पष्टं । इमे तामर्थितां राजन्सभार्थं प्रथमं या प्रश्ना
न्निमान्मयोक्तांस्त्वं सम्यगाख्यातुमर्हसि ।३४। संभवार्थं संभवद्र्थं । अथ श्लोकैः पंचभिर्नवेतालप्रश्नाः । कस्य सूर्यस्य
रश्मीतां अनाडानिक्षराणवः । कस्मिन्स्फुरंति पूर्वने महागगनतरणवः ।३५। चर्नोत्यमांतरं गच्छन्नशातरो । अथ सद
स्वरः । स्वजन्नोस्यजति स्वच्छं कस्य रूपं प्रभास्वरा ।३६। रं भास्त्वं भो यथा पत्रमात्र एव पुनः पुनः । अंतरं तस्तथां तथ तथा
कोणुः स एव हि ।३७। शिलां तर्निर्विडैकांतरूपामज्ञा जगत्त्रयी । वसिष्ठउवाच । स्फुरू वति वेतालेवदं कुप्रभान्विद
स्य सः । उवाच वचनं राजा दंतांशुधवलांबरं ।३८। सार्द्धश्लोकद्वयमेतत्स्पष्टं । एव चित्सूर्य इत्युक्तः सर्वमेतन्तपत्य सोऽपि
ज्ञानात्मैव परमो भास्करो भावितात्मयः ।३९। इमे ये भुवनाभोगास्तस्यैव त्रसरेणवः । विज्ञानपरमार्कस्य भासाभा
तिभवंति च ।४०। कस्य सूर्यस्य तिरश्मीः एव सूर्यो चित्सूर्य एवेति भग्यं तरणवयोक्तः । यतो सौ चित्सूर्य एवैति र सर्वं जगत्त्रय

स्य सूर्यस्य ... शा ... नाशनिप्र ... स्यो तरेण ... निश्चा कदर्थे नाव

तितस्यभासासर्वमिदंभातीतिश्रुतेः।एषवित्सूर्यउदितइतिकविस्पार्थः तत्रउदितत्वयोक्तइस्यायमेवार्थःतस्यप्रसिद्ध
सूर्यवैलक्षण्यमाह।एषविज्ञातात्माभावितात्मायः जीवरूपेणसर्वांतःकरणप्रवर्तकः परमोभास्करःभास्करादीनाम
पितत्तेजोलेशावाशयेइक्षेंगीतासुयदादित्यगतंतेजोजगद्भासयतेखिलं।यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमिति
इमेभुवनाभोगास्तस्यैवविज्ञानपरमार्कस्यत्रसरेणुतुल्याअंशाःतस्यैवचभासाभांतिवर्ततिचउक्तार्थंतेचा॥७०॥घन
यंतेचाकस्मिन्पवनेमहागगनादयोरेणवःस्फुरंतीतिद्वितीयंप्रश्नंकालेतिश्लोकद्वयेनविवृणोति।कोचसत्तानभ
सत्तास्पंदसत्ताथचिन्मयी।शुद्धचेतनसत्ताचसर्वमित्यादिपावनेोऽ॥परमात्ममयेवायोरजःस्फुरतिचेचलं।कुसुमां
इवामोदस्तदतद्रूपकंस्वतः॥७१॥कालसत्ताकालरूपायाःशक्तेःस्फूर्तिः।इ●छंनभःस्फूर्तिर्नभःसत्तास्पंदसत्ता
स्पंदस्वभावस्यवायोःसत्ता।अथचिन्मयीशुद्धचेतनसत्ताचकेवलचेतनस्यचिच्छसादिचेतनाचेतनात्मकंपावनंचिद्वि
वर्तरूपंचचलंरजःकुसुमांगेकुसुमावयवेष्वामोदइवपरमात्ममयेवायोतदतद्रूपकंतद्रूपमतद्रूपंचस्वातःस्फुरति
तत्रतद्रूपत्वंसद्रूपत्वात्भासमानत्वात्केनविकारेणप्रतीतिहेत्वाच्चा।अतद्रूपत्वंतुविकारित्वजडत्वदुःखमयत्वा
दिभिरितिद्रष्टव्यं॥७२॥स्वप्नात्स्वप्नांतरंशतसद्वस्वशोगच्छत्सर्वखसंस्यैस्यजन्नपिकःस्वच्छंस्वभास्वरंचस्वरूपं
नसजतीतितृतीयप्रश्नंश्लोकेनविवृणोति।जगदाख्यमहास्वप्नेस्वप्नात्स्वप्नांतरंव्रजन्रूपंस्यजतिनोज्ञांते

जगदिति।

श्रीय॥
३२२

पिताः इदानीं दुर्लभापि चित्तविश्रांतिः स्वप्रयत्नेनैव लभ्यत इति दर्शयितुं भगीरथकथा कथ्यते। वसिष्ठ उवाच। सं
हृत्य सर्वतश्चित्तं स्तिमितेनांतरात्मना। प्रवाहपतितं कुर्वन्निरिच्छस्तिष्ठ राघव धीः॥ १॥ सर्वतो बाह्यविषयाच्चित्तं संहृत्य
स्तिमितेन स्वरूपनिष्ठेनांतरात्मनांतःकरणेनोपलक्षितः प्रवाहपतितमाचारक्रमं प्राप्तं कुर्वन्निरिच्छ
राघव त्वं धीः तिष्ठ॥ ७॥ आकाशविशदं कृत्वा मनः सैव मनो मुनिः। तिष्ठेकसमतां तातमाप्तो सर्वत्रसमदर्शनः॥ ३॥ मन
सैव विचारतत्परेण स्वचित्तेनैव। शिष्टं समानं। ७॥ स्थिरबुद्धिरमूढस्य यथा प्राप्तानुवर्तिनः। राज्ञो भगीरथस्येव तु
साध्यमपि सिद्ध्यति॥ ३॥ स्पष्टं॥ ७॥ श्रीरामउवाच। यथा चित्तचमत्कृत्या राज्ञो गंगावतारणं। भगीरथस्य संपन्नं तन्मे
कथय मे प्रभो॥ ४॥ चित्तचमत्कृत्या आश्चर्यकारिणी चित्तवृत्तिश्चित्तचमत्कृतिस्तया। स्पष्टमन्यत्॥ ७॥ वसिष्ठ उवा
च। आसीद्भगीरथो राम राजा परमधार्मिकः। भुवः समुद्रयुक्ताया भूमंडले तिलकोपमः॥ ५॥ संकल्पानंतरं प्राप्तार्यार्थ
मिमतमर्थिनः स्वेदप्रसन्नवदनाद्यथा स्माच्चिंतामणेरिव॥ ६॥ गंगासोपानपदव्यायेन या तालवासिना॥ यो द्वि
ता ब्राह्मणा लोके बांधवा लोकबंधुना॥ ७॥ त्रयमेतत्स्पष्टं॥ ७॥ यौवन इति श्लोकद्वयं वाक्यं। यौवने वर्तमानस्य त
स्य क्षत्रमिव तेरपि प्रविचारयतो लोकयात्रां पर्याकुलामिमां॥ ८॥ खुविचीरचमत्कार विचारकणिकोदक्षत्र राघव
स्य पितुरूव्येदेवाहली मरा विव॥ खु विरागचमत्कारो भनो विरागचमत्कारो वैराग्यनिश्चयो यस्यासौ सद्वि

नार

रकणिकास्तन्मो विचारः। शेषं स्पष्टं ॥७॥ एकांते चिंतयामास महीपतिरसावथ। जगद्ग्रामिमां नित्यमसमंज
ससंकुलं ॥१०॥ असमंजससंकुलं असमंजसमन्याय्यं तेन संकुलं व्याकुलं ॥७॥ पुनर्दिनं पुनः श्यामादीनादान
रातं पुनः। तदेव शुष्कं विरसं लभ्यते कर्म कुर्वता ॥११॥ श्यामा रात्रिः। कर्म सांसारिकं व्यापारं शुष्कं विरसं नीरसं वि
परीतरसं वा दानादानग्रातं लभ्यते स्याभोगरातं प्राप्यते ॥७॥ येन प्राप्तेन लोकेऽस्मिन्नाप्राप्तमवशिष्यते। तत्कृ
तं सुकृतं मन्ये शेषं कर्म विसूचिका ॥१२॥ येन वस्तुना प्राप्तेन सता अप्राप्तं वांछितं किंचिदपि नावशिष्यते तदेव सुकृ
तं सुकृतं मन्ये। शेषमन्यत्कर्म विसूचिकेव पुनः पुनः प्रवृत्तिहेतुत्वात् बंधनिवृत्तिहेतुरेव सत्कर्मेत्यर्थः। यदाह्यबु
द्धः। तत्कर्म यन्न बंधाय विद्या सा या विमुक्तये। आयासायापरं कर्म विद्यान्या शिल्पनैपुणमिति ॥७॥ पुनः पुनः पयु
षितं कर्म कुर्वन्न लज्जते। मूढबुद्धिरमूढस्तु किं कुर्यात्क्लिष्टबालवत् ॥१३॥ अथैकदोद्विग्नमनाः कदाचिद्विच्छिन्नलंगु
रुं। एकांतसंस्थितं भीतः समपृच्छद्भगीरथः ॥१४॥ जरामरणमोहादिरूपाणां भयकारिणां। भगवन्सर्वदुःखानां क
थमंतः प्रजायते ॥१५॥ व्ययमतस्पष्टं ॥७॥ विपुलत्वार्थं विरतिश्लोकद्वयं काक्वं विरसाम्यात्मनोल्लेनेति विभा
गविलासिना राज्ञोयावबोधेन पूर्णेन भरितात्मना ॥१६॥ क्षीयते सर्वदुःखानि चेष्टितिर्यथयाभितः। सेशाया
विलयं यांति सर्वकर्माणि चानघ ॥१७॥ विरसाम्यात्मना विरसामान्यरूपेण सर्वाभिगताकारणयुक्तितः

श्रीः। ३२४

२५२

संज्ञायाः २

यदुदितास्तेन निर्वीभागविलासिता निर्विशेषं स्फुरता पूर्णेनाखंडेन परितात्मना व्याप्तेन ज्ञेयावबोधेन ज्ञेयस्य
परतत्त्वस्य साक्षात्कारेण सर्वदुःखानि क्षीयंते। अग्रंथयो बंधहेतवः अहंकाराद्यः टंघंते छिद्यंते कैवल्यमस्ति भ
वात्मा परमानंदरूपो भवति चित्तेन माद्यः शाममायांति सर्वकर्माणि पुण्यापुण्यरूपाणि॥ सर्वाण्यपि
कर्माणि शाममायांति। भिद्यते हृदयग्रंथिरित्यादिश्रुतेः॥१८॥ किं तज्ज्ञेयमित्यत्राह ज्ञेयमिति। ज्ञेयं तु विद्यात्म
नं संसृष्टं ज्ञप्तिरूपिणं॥ स च सर्वगतो नित्यं नास्त्यमेति न चोदयं॥ आत्मा ज्ञानस्वरूपो नित्यः सर्वगतश्च विसृ
ष्ट आत्मैव ज्ञेय इत्यर्थः॥१९॥ चिन्मात्रमिति श्लोकद्वयं वाक्यं। भगीरथ उवाच॥ चिन्मात्रं सर्वगं शांतमच्छं
निर्मलमव्यक्तं। देहादिनेतरत्किंचिदिति वेद्मि मुनीश्वर॥१९॥ किं च त्वत्प्रतिपत्तिर्मे स्फुटतामेति न प्रभो।
एतावन्मात्रसंवित्तिः स्यामहं सर्वदा कथं॥२०॥ शांतत्वादिलक्षणं चिन्मात्ररूपं निर्गुणं ब्रह्मैवात्मे
ह तदात्मव्यतिरिक्तं देहादिरूपं वस्तु किंचिदपि वस्तुतो नास्तीति वेद्मि किंतु अत्रास्मिन्नर्थे प्रतिपत्तिः स्थिर
प्रतिष्ठा नेति। अत एतावन्मात्रसंवित्तिश्चिन्मात्रानुसंधानमयी कयकेन प्रकारेण स्यात् तं प्रकारं निरूप
येत्यर्थः॥२०॥ वसिष्ठ उवाच॥ ज्ञानेन ज्ञेयनिष्ठत्वमेति चेत्ताहं दं वचे। ततः सर्वं तत्त्वात्मयो जीवो न ज्ञा

यते॥२१॥ ज्ञानेन वक्ष्यमाणक्षेत्रलक्षणेन तज्ज्ञानसाधनेन चेतो यदा हृदंबरे हृदयाकाशे ज्ञेयनिष्ठं स्वरूपनिष्ठं च
मेति तत्तस्तदा जीवः सर्वविद्भूत्वा सर्वात्मको भूत्वा भूयो न जायते। अतएव स्वतया स्वरूपनिष्ठत्वेन सर्वात्मकं ज्ञा
त्वा पुनर्जीवभावं नेति इत्यर्थः॥७॥ किं तज्ज्ञानमित्यत्राह असक्तिरिति श्लोकत्रयवाक्येन। असक्तिरनभिष्वंगः
पुत्रदारगृहादिषु। नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥२२॥ आत्मनोनन्ययोगेन तद्भावनमनारतं। विविक्त
देशसेवित्वमरतिर्जनसंसदि॥२३॥ अध्यात्मज्ञाननिष्ठत्वं तत्त्वज्ञानार्थदर्शनं। एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो
न्यथा॥२४॥ असक्तिर्विषयेषु अनासक्तिः पुत्रदारगृहादिषु अनभिष्वंगो ममताराहित्यं। इष्टानिष्टोपपत्तिषु प्रि
याप्रियेषु नित्यं संसमचित्तत्वं हर्षविषादराहित्यं। अनन्ययोगेन भेदभावनया आत्मनः स्वरूपस्यानारतमविच्छि
न्नं तद्भावनं ब्रह्मभावनं। ब्रह्मैवाहमित्यनुसंधानं विविक्तदेशसेवित्वं विविक्तः पूतो निर्जनश्च यो देशः तत्सेवना
शीलत्वं जनसंसदि पामरजनसभायां अरतिरनवस्थानं। अध्यात्मज्ञाननिष्ठत्वं आत्मविषयज्ञानतत्परत्वं तत्त्व
ज्ञानार्थदर्शनं तत्त्वज्ञानप्रयोजनस्यात्यंतिकदुःखोपरमस्यानुसंधानं एतत्सर्वं क्षेत्रज्ञानसाधनत्वात् ज्ञानमिति
प्रोक्तं। इतरत्वन्यथा [illegible] अज्ञानं विपरीतं विषयासक्त्यादिकमज्ञानं संसारहेतुः स्यादित्यर्थः॥८॥ रागद्वेषद्वयकरं सं
सारव्याधिभेषजं। अहंकारोपशांतौ तु राजज्ज्ञानमवाप्यते॥२५॥ देहादावहंभावप्रतिबंधकत्वाच्छांतउपशांतौ

तस्यात्मज्ञान

औ॥
३२५

तावेवात्मनः स्वरूपमवगम्यत इत्यर्थः। भगीरथ उवाच। शरीरेस्मिन्स्थिरारूढो गिरौ तरुरिवस्वके। अहंभावो म-
भागवदेमेत्सज्यते कथं॥१६॥ संसारस्यानादित्वान्मूलभूतस्याहंकारस्य सूढमूलतया त्यागो दुष्कर इति भावः।
॥छ॥ त्रितल उवाच। पौरुषेण प्रयत्नेन सत्यक्तो भोगौघभावनां। गत्वा विकसितां सत्तामहंकारलयं व्रजेत्॥१७॥
पौरुषेण प्रयत्नेन वासनाक्षयहेतुः सम्यग्ज्ञानसमाध्यभ्यासादिरूपः पौरुषः प्रयत्नः तेन भोगौघभावनां विष-
यवासनां सत्यक्त्वा विकसितां परिपूर्णां सत्तां गत्वा आश्रित्य अहंकारलयं व्रजेत्॥१७॥ समाधये दित्यर्थः॥छ॥ येन त्र-
णापंजरं यावचरे लग्नं लज्जादिना खिलं। अकिंचनत्वशेषेणे स्फुटा तावदहंकृतिः॥१८॥ ये लज्जादि अनुचि-
ते कर्मणि चेतसः संकोचो लज्जा आदिशब्दाज्जातिकुलाभिमानादिग्रहणं तदुक्तं। घृणा शंका स्पृहा लज्जा
जुगुप्सा चेति पंचमी। कुलशीलं तथा जातिरष्टौ पाशाः प्रकीर्तिता इति। तादृशं लज्जादिरूपं यं त्रणापंज-
रं अकिंचनत्वशेषेण स्वरूपातिरिक्तं किंचिदपि यस्य नास्ति सो अकिंचनः। तद्भावमात्रशेषेण यावदखिलं न
लग्नं न त्यक्तं तावदहंकृतिः स्फुटा न निवर्तते इत्यर्थः॥छ॥ सर्वमेतद्धियात्यक्त्वा यदि तिष्ठसि निश्चलः। त-
दहंकारविलये त्वमेव परमं पदं॥१९॥ एतत्सर्वं लज्जाभिमानादिकं सर्वमित्यर्थः। स्पष्टमन्यत्॥छ॥ ७

शांताशेषविशेषणो विगतभीः संत्यक्तसर्वैषणो गत्वानूनमकिंचनत्वमरिभृत्यक्तासंगोश्रियं
शांताहंकृतिरस्तदेहकलनस्नेषेव सिद्धामटन्नुमामप्कस्मितवान त्वंयदि भवस्यैवैस्तुधेरसि ॥७०
शांतान्यशेषविशेषणानि बाल्यपोहं गृहस्थोहमित्यादीनि यस्य । विगताभीर्भयहेतुर्यस्मात् शांतं
त्यक्ताः सर्वाएषणाः पुत्रकलत्रादिविषयोद्योगेन तादृशः स नरो अरिषु समग्रां श्रियं वसत्यक्त्वा अकिंचनत्वमेव
गत्वा आश्रित्य शांताहंकृतिरस्तदेहकलनस्नेषेव वारिधौ सिद्धामटन्मामपरिसाध्यं गुरुमपि अल्पस
स्य गुरुस्सि न वा नूनं यदि भवसि तत्र हि गुरोरप्यवैरसि उन्नतादप्युन्नतोसि सर्वोत्कृष्टं बलेवासीत्यर्थः ॥७०
वसिष्ठ उवाच । अथ तस्य गुरोर्वक्त्रादित्याकर्ण्य भगीरथः । मनस्याहितकर्तव्यः स्वव्यापारपरोभवत् ॥७१
मनस्याहितकर्तव्यः गुरूपदिष्टं कर्तव्यं चित्ते निधायेत्यर्थः । स्वव्यापारपरः राज्यचिंतास्वव्यापारः तत्र ता
त्पर्यवान् निवाभ्रत् । शान्तिष्टं समानेना ॥७ ततः कतिपयेष्वेव वासरेषु गतेषु सः । अग्निष्टोमम खं कृत्वा चक्रे सर्वस
गोकसिद्धये ॥७२ सर्वत्यागैकसिद्धये सर्वधनत्यागावसरसंपादनीयेत्यर्थः ॥७ गोभूम्यश्वहिरण्यादि
द दो धनमशेषतः । द्विजदेवार्त्तबंधुभ्यो गुणागुणविचारवान् ॥७३ दिवसत्रयमात्रेण सर्वमेव परित्यजन् ॥

श्री०४।
३२६

626

स्ववस्त्रमात्रशेषो सावासीद्राजा भगीरथः ॥३४॥ इयमेतस्य षष्ठी ॥छ॥ अथ सर्वार्थरिक्तं तत्र खिन्नप्रकृतिपौरकं ।
सीमांतिने तृणमिव राज्यं स्वमरये ददौ ॥३५॥ अथ भगीरथः सर्वार्थरिक्तं सर्वधनशून्यं खिन्नप्रकृतिपौर
कं खिन्नाः दीनाः प्रकृतयो मन्त्र्यादयः पौराः पुरजनाश्च यस्मिन् तत्स्वं स्वीयं राज्यं तृणमिव सीमांतिने स्वरा
ज्यसीमांते वर्त्तमानाय अरये ददौ । सामंतिन इति पाठे सामंताः सामंतसंभवा देशास्तद्वतो समापदेशा
धिपतय इत्यर्थः ॥छ॥ आक्रांते द्विषता राज्ये मुनिः सन्निमंडले । अधोवासो वशेषो सौ निर्जगाम स्वमंड
लात् ॥३६॥ द्विषता राज्यभावे स मुनिः स्वराट् स्वे मंडले स्वराष्ट्रे आक्रांते सति तिष्ठन् सो भगीरथः अधोवासो
वशेषः परिधानमात्रशेषो मुनिर्मौननिष्ठः स्वमंडलान्निर्जगाम ॥छ॥ यत्र न ज्ञायते नाम्ना यत्र न ज्ञायत
सुखात् । तत्र ग्रामे पुरण्यस्मिन्दूरेष्ववास धैर्यवान् ॥३७॥ रसल्पेनैव कालेन प्रज्ञातः सकलेषणः परमेण स
मेनासौ प्राप विश्रांतिमात्मनि ॥३८॥ स्पष्टौ ॥छ॥ भ्रमन्नु द्वीपानि भूपीवे कदाचित्कालयोगतः । अवशः शत्रु
णाक्रांतं स्वमेव प्राप तत्पुरं ॥३९॥ अवशः स्वस्य गंतव्यदेशाभावात्पथिकानुसारी शत्रुणाक्रांतं स्वमे
व तत्पुरं कदाचित्प्राप इत्यर्थः ॥छ॥ नानागारांश्च तत्रासौ प्रवाहपतितांश्चतान् पौराणां मं । भिक्षां चैव शनैः

क्षामयाचनात् ॥४०॥ प्रवाहपतितानुमेगेन प्रवाहानुसारेण आगतानू त्रिहंसमानतां ॥ ०॥ विविक्तस्तेन पंथे रामं त्रि
णश्च भगीरथः ॥ स जयामास्तुरथ तेस विषादेसपर्यया ॥ ०॥ प्रभो राज्यं यत्र स्या येति अर्थिनोप्यरिणा मुनिः ॥ नाद
देनाहताच्छेषं तृणमप्यत्रानाहतो ॥४२॥ कति चिद्दिवसांस्तत्र नीत्वान्यत्र जगाम सः ॥ भगीरथो यं त्ताकष्टमिति
लोके न शोचितः ॥४३॥ अथान्यत्रो पत्रां तत्रामा परिभ्रांवितधीः सुखी ॥ आत्मारामः कदाचिद्यस्प्राप्त्रितुलं
गुरुं ॥४४॥ चव्दहय मे तस्य [illegible] ॥ ०॥ स्वमेव स्वागतं कृत्वा तेन सार्हं भगीरथः ॥ कं चित्कालमुवासाद्वैव नेग्रामे
पुरे वने ॥४५॥ स्वयमेव स्वागतं कृत्वा ख्याचितं स्वागतादि सत्कारं कृत्वेत्यर्थः ॥ ०॥ समतामुपयातौ तौ गुरुशि
ष्यौ समौ स्थितौ ॥ कलयामासतुः स्वस्थौ चित्तोदं देहधारणं ॥४६॥ देहधारणं विषादं दुःखहेतुं मध्यममनु
त्कृष्टहेतुं कलयामासतुः ॥ ०॥ किमित्थि लोकद्वयं वा क्व किमयं भाग्यते दृढः ॥ किं वानेनोज्झितेन नः ॥ यथा
क्रमं यथाचारं तिष्ठत्वेष यथास्थितौ ॥ ०॥ इति निश्चित्य तौ तत्र वनाद्वनगामिनौ ॥ आनन्दं दुरानन्दं न सुखं न
तु मध्यमं ॥४८॥ आनंदं अनाहृतेन ते सुखहेतुं न ननं दतुः नाभ्यवदतां ॥ दुःखं दुःखहेतुं मध्यममनुभवद
तौ ॥ ०॥ धनानि वाजिविजवासेश्वर्यं चाष्टधोदितं ॥ सिद्धैरप्यर्पितं तुष्टैर्मेनाते तृणं [illegible] ॥४९॥ धनानि प्रसिद्धा
नि ॥ वाजि विजवाश्चसंपत्तिः ॥ नदारलियजात्रामैश्वर्यं तच्च तदष्टधोदितं अणिमादिकं तच्च सिद्धैः [illegible]

श्री ॥
२२९

२४९

628

सिद्धिमद्भिर्द्वयोनिमेदैस्तुष्टैः प्रीतैः अर्पितमपि जर्जरं मेने नान्तरायधियेतिभावः ॥४९॥ अथैकदा गुरा श्रेष्ठ
कस्मिंश्चिन्मंडलान्तरात् अनपत्येन्नृपं मृत्युकरहरत्त्वमिवामिषं ॥५०॥ तत्र प्रकृतयः स्विन्नान्तः कष्टदेश क्रमान्नृपं ॥ अभि
ष्यंतिस्म सेतुकं गुणालन्द्या विशालया ॥५१॥ तं भगीरथमासाद्य स्थितं भिक्षामरं मुनिं ॥ परिज्ञाय समानीय
सेत्येत्य कुर्म हीपतिं ॥५२॥ भगीरथः क्षणेनैव प्राप्तश्रीर्वा हुनारसैः वलितः सेनया गुर्व्या समारोहन्म तं गजं ॥५३॥
भगीरथो जगन्नाथो जयतीति जनारवैः नीरंध्रतां प्रजग्मुर्गिरां द्वावां महामुखाः ॥५४॥ तत्र तत्सालयं तं तं राज्ये
राजानमाहूताः जग्मुः प्रकृतयः प्रायाः प्राकृरिक्तमृताधियाः ॥५५॥ राजन्नस्माकमधिपो यस्त्वया सद्गुराकृतः
मृत्युना धिनिर्गमीर्णोसौ मत्स्येनेवामिषं प्रभु ॥५६॥ तत्र पालयितुं राज्यं प्रसादं कर्तुमर्हसि ॥ अर्थितो पयात
नासौ गाथतां वनोवितः ॥५७॥ श्लोकाष्टकमेतस्य ॥छ॥ वसिष्ठवाचा इति संप्रार्थितो राजा तद्दीक्षत्यतद्वचः स
प्रसागरविज्ञायाः सबभूवभुवःपतिः ॥५८॥ तत्र दृष्टांतद्वचस्तां प्रकृतीनां वशः ॥छ॥ समः शांतमनो मौनी वीत
रागो विमत्सरः प्राप्तकार्यैककरणरतिसाद्भितविस्मयः ॥५९॥ स्पष्टं ॥छ॥ अथ वर्षसहस्राणि तपस्तप्त्वा सुदारुणं
स्वपितामहोद्धारणे प्रभुर्विगंगामयोजयच्च ॥६०॥ पितामहाः सगरतनयाः तेषामुद्धारणार्थं नरकाद्धरणाद्यर्थं
॥छ॥ भगीरथे महीपतौ यशःप्रचारवीथिका तदादि सा त्रिमार्गगा महीतले बभूव हि ॥६१॥ यशःप्रचारवीथिका

लभ्यत इति २

खि॰ ७१

गीरथस्य कीर्त्तिसंचारमार्गः। तदादि स भगीरथ आदिर्यस्मिन्कर्मणि तद्यथा भवति तथेति महीतलं भवनं क्रि-
या विशेषणं॥ ॥७॥ ॥इति वासिष्ठविवरणे भगीरथोपाख्यानं नामैकोनषष्टितमः सर्गः॥ ॥७॥ ॥सर्वं दुर्लभाभि-
चिरात्र विश्रांतिः स्वप्रयत्नेनैवं दर्शयितुं भगीरथकथा कथिता। इदानीं तु प्रतिबंधकपापसंक्षयकृत्याभावे दु-
र्लभमपि स्वात्मज्ञानमाचार्यस्य प्रयत्नातिशयाल्लभ्यत इति दर्शयितुं अनेकोपाख्यानगर्भं शिखिध्वजोपाख्या-
नमारभ्यते। वसिष्ठ उवाच। इदं सर्वं परित्यज्य कोऽडीकृत्य मनः स्वकं। शांत आत्मनि तिष्ठ त्वं शिखिध्वज इवा-
स्वः॥१॥ सर्वमिदं विश्वं परित्यज्य प्रपंचरूपं हित्वा तद्वासनां त्यक्त्वा मनः स्वकं परिच्छिन्नं परिश्रमपात्रीलं मनः क्रो-
डीकृत्यैकनिष्ठं कृत्वा शांतः सन् शिखिध्वज इवामन्यबलस्तिष्ठ। श्रीराम उवाच। कोसौ शिखिध्वजो नाम कथं बाल-
ब्धवान्पदं। एतन्मे कथय ब्रह्मन्भूयो बोधविवृद्धये॥२॥ वसिष्ठ उवाच। द्वापरेष्वसमभवदतीते सप्तमे मनौ। मा-
लवानां पुरः श्रीमान्शिखिध्वज इतीश्वरः॥३॥ धैर्यौदार्यदयायुक्तः क्षमादमशमान्वितः। शूरः शुभसमाचारो
मानी गुणगणाकरः॥४॥ सुराष्ट्राधिपतेः कन्यां चूडालां नाम नामतः। उपयेमे स तीमात्मसदृशीं स शिखि-
ध्वजः॥५॥ चतुष्टयमेतत्स्पष्टं॥७॥ अथ वृद्धतत्तयोः प्रीतिरन्यार्पितचेतसोः। नित्यमेवाभियुक्तत्वात्प्रियत्वाच्च स्थि-
रस्य चा॥६॥ विहितस्य परस्परालोकसंभाषणादिरूपस्य प्रियत्वादभिमतत्वाच्च तयोः प्रीतिरवर्द्धतेत्यन्वयः

योवा॰
७२९

२न्यो

630

एवं यत्कृतिवर्षाणि मिथुनं तन्निर्जरस्पृहं रेमे यौवनलीलाभिर
नेकाभिर्दिने दिने॥
सा॥ ८

मिथः कलाकलापस्य कोविदौ तौ बभूवतुः स्वरूपमेकमेवैतौ दधतुर्मित्रतां गतौ॥७॥ कलाकलापस्य गीतवादि
त्रनृत्यादिरूपस्य॥ ७॥ अथ वेति श्लोकषट्कं वाक्यं॥ अथ जातेषु बहुषु वर्षेषु पादपहिमालिङ्गनेनेगलति तारुण्य भि
ऊर्माद्विवांभसि॥ पातः पक्वफलस्येव मरणं दुर्निवारणं॥ हिमांशाविव खिन्नौ जीर्णौ ते नित्य पतनोन्मुखौ॥१०॥ आयु
लत्व विरतं जलं करतलादिवायातॄष्णा वलताचैवीद्द॥ कादीर्घतां गता॥११॥ गलनघादयइव संप्रयातेवयौवन
सुखानि प्रविलीयन्ते शरदाइव मनुष्यकृताः॥१२॥ रे भागभ इवासारो व्यवहारो विरागदः॥ तदिदत्यान्नसंसारे ताद्ट
कृदमति शोभनं॥१३॥ यदा साधु पुनरत्र तादृशस्तु न विद्यत इति निश्चीय युगमतेर संसारव्याधि भेषजं॥१४॥ विर
वियथारयामास शास्त्रमध्यात्मसंमतं॥ अथ बहुषु वर्षेषु यातेषु तत्र बुडयालाशी विधि जयोर्युगमं तरुणं ज्ञान
गलति जराशनिपतनो न्मुखीत्यादिना प्रकारेण संसारतांनिर्णीय संसारव्याधि भेषजं अध्यात्मशास्त्रं विरंविचा
रयामासेत्यन्वयः॥ त त्रचुडालीला तौ लाः शेषं स्पष्टं॥७॥ आत्मज्ञानैकमंत्रणा संस्पृत्याख्या विह विकासेशाम्यतीति
विरतेचुः॥१६॥ तदित्यात्मज्ञाने परामृश्यते॥ तत्तत्प्राणो वित्तस्य तत्तत्त्वा विन्नप्राणयोश्चाविनाभावात् तन्निष्ठान
इवात्मज्ञाने निष्ठा नियमाययोस्तौ तद्विधाश्रयौ तद्विधाः आत्मज्ञाननिष्ठाः तथा अपाश्रयणीयाययोः
तौ तद्दर्शनपरौ आत्मवित्सज्जनपरौ॥ दत्तदीक्षौ तदुचितचेष्टायुक्तौ॥७॥ तत्रैवा तिघनाभ्यासौ बोध यतो परस्परं

दासिन्नोऽज उष्टवसः१

तस्मीनोनत्समारंभो निरारंभोबभूवकः॥१९॥स्पष्टं॥छ॥अथेति श्लोकद्वयं वाक्यं॥अथसा विरतं रामरमणीयपदक्रमा॥२॥ श्रुत्वाध्यात्मविदां वक्त्रात्शास्त्रार्थस्तीर्णरं क्रमानू॥१०॥इच्छं विचारयामास स्वमात्मानमहर्निशं॥अव्याप्टता व्याप्ता वाधियो धवलयेहया॥११॥अव्याप्टता रसीमा सा ना॥व्याप्टवतावासमुचितं व्यापारं कुर्वाणापि॥धियास्वमात्मानं इच्छंव क्षमाणप्रकारेण विचारयामासा॥छ॥हडालोवाच प्रिक्रेया कस्वमात्मानं किम दंस्या [illegible]तिस्वयंकस्यायमागतोमोहः कथमप्युचि[illegible]तः क्व वा॥२०॥स्पष्टं॥छ॥ देहस्तावज्जडोमूढो नाहमित्येव निश्चयः॥कर्मेंद्रियगणश्चास्मा [illegible]लोष्टकः॥२१॥देहस्तावज्जडः न त्र हेतुः मूढो विचिन्तः॥अनीहमित्येव निश्चयः॥कर्मेंद्रियगणश्च अस्माद्देहाद भिन्न इति जडएव॥छ॥बुद्धीन्द्रियगणोप्येवं जडएवेति हन्यते॥अर्यते मनसायस्मादस्थिवल्लुविलोष्टकः॥२२॥बुद्धीन्द्रियगणोपि यष्ट्या लोष्टक इव मनसायस्मादर्यते तस्माज्जड एवेति हन्यते निश्चीयते॥मनस्त्वेवं जडं मन्ये संकल्पात्मकरा क्रिमरा क्षेपणेरिव पाषाणः अर्यते बुद्धिनिश्चयैः॥२३॥संकल्पात्मकरा क्रिमन्मनस्य क्षेपणैः पाषाण इव बुद्धिकृतैर्निश्चयैः अर्यतेइति जडं मन्ये॥क्रियं तेएभिरिति क्षेपणानि रज्जुदावादिमयायंत्रविशेषाः॥छ॥बुद्धिर्निश्चयरूपेव जडा ससैव निश्चयः॥स्वातेनेवसरिन्क्षेपअहंकारणचाल्यते॥२४॥निश्चयरूपा बुद्धिश्च स्वाते न स्वनन्नजनितश्वात्रेणसरिदिव अहंकारेणचाल्यते॥अर्यतेइति जडैवेति निश्चयः॥

श्री॥

३२९

व२ वा२

अहंकारोपि निःसारो जड एवावरात्मकः। जीवेन जन्यते यद्वो बालेनैवाऽत्ममात्मकः। रूपानिःसारः विपरीतज्ञान
रूपत्वान्निःसत्वे चेहाऽरहितश्चारव अवरात्मको ऽहंकारोपि बालेनऽत्ममात्मको यद्रूद्रवज्जीवेन जन्यते। कल्प
त इति जड एव। अवरात्मकइ प्रोग्य परवशः स्वभाव इत्यर्थः॥६॥ जीवस्वकलनाकारो वा तास्मात् हृदये स्थितः
सुकुमारान्तरन्यैर्न केनापि परिजीवति॥१६॥ हृदये स्थितः अन्तःकरणप्रफुलितचैतन्यरूपत्वात् हृदयवर्तिम
नः। अपि तेव कलनाकारः कल्पितस्वभावः। वा तासाद्याणामयत्वा रात्रौ सुमाकारो ऽत्र वः। प्रसहं सुषुप्तावा
त्मनि लीयमानत्वात्। एवंविधो जीवस्य अन्तरुच्छेनस्वस्याप्यन्तरनुप्रविष्टेन केनाप्यवपर्यदेरचेन आपाप्रदायिन
पुरुषेणानुप्रवीतः परिजीवति। अतो जीवोपि पारमार्थिकमात्मस्वरूपं न भजतीत्यर्थः। एतदुक्तं भवति यथाघ
टाद्युपाधावविच्छिन्नो ऽनवच्छिन्न आकाशोस्ति। यथा च जलाद्युपाधौ प्रतिबिम्बभूतो बिम्बभूतश्चाकाशोस्ति। त
था सर्वप्राणिनां हृदि जीव ईश्वरश्चास्ति। तथा च व्यासस्तत्त्वं गुहां प्रविष्टावात्मानो हि तद्दर्शनादिति। तत्र च माया
विषयो जीवः विधेयमाय ईश्वर इति भेदः। तदुक्तं श्रीगौडपादाचार्यैः। कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोवशिष्यते इति॥७॥ आ अहो ज्ञातमेतेन चेत्यो हि ते स्वकलनं किं ना जीवो जीव इति जी
र्णनविरूपेणात्मरूपिणा॥१७॥ आ इति स्मृतिद्योतकमव्ययम्। अहो इत्याश्चर्ये। अहो मया ज्ञातमेतत्। किं तदित

व६

नात्॥ अयं जीवः चेत्योल्लेखकलंकिनां चेत्योल्लेखोदरस्य संबंधः तेन कलंकिना प्रतिबिंबरूपकलंकवता।
जीर्णेनानादिना। आत्मरूपिणा सर्वेषामात्मभूतेन एतेन चिद्रूपेण विश्वरूपेणैव जीवति। प्राणान्धारयति।
एतदेव सदृष्टांतमाह चेत्येति चेत्यभ्रमवता जीवः चिद्रूपेणैव जीवति। आमोदः पवनेनेव खातेनेव सरिद्रयः।
१२८। चेत्यभ्रमवता चेत्ये प्रतिफलनं नानोल्लासात्तादात्म्याभिमानवता। ७। असत्यजडचेत्यांशावयनाच्चिद्घन जी-
डामहाजलगतोऽग्निरिव रूपं स्वमुज्झति। २९। चिद्घनश्चित्स्वरूपं असत्यजडचेत्यांशावयनात्र असत्यात्मा
श्वयेचेत्यांशाः तेषां चयनात् उपचयात् हेतोः जडं सत् महाजलगतोऽग्निरिव स्वरूपं चित्त्वभावमुज्झति। ७। एवं चि-
द्रूपमप्येतच्चेत्योन्मुखतया स्वयं जडं शून्यमसंकल्प्यं चैतन्येन प्रबोध्यते। ३०। एतच्चिद्रूपमेवं सर्वोक्तप्रकारे-
ण चेत्योन्मुखतया हृदयभावनया स्वयमेव जडं जाड्ययुक्तं अन्यसममसंकल्प्यं च चापि पुनश्चैतन्येन प्र-
नुप्रविष्टचैतन्येन प्रतिबोध्यते। तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः। ७। इदानीमहमसौ केयं केनेषा विस्तव-
त्यतोऽप्यहो चिरकालेन ज्ञातं ज्ञेयमनोमयं। ३१। ज्ञेयं ज्ञातं यज्जिज्ञासितं विद्धि वर्तेनिमित्तं ज्ञातव्यं। तत्र
ज्ञातव्यमित्यर्थः। किं तदित्यत्राह तेनेति। एतद्धि चिद्विलासांता मनोबुद्धीन्द्रियादयः। असन्तः सर्व एवाहो अव-
धाने विनोच्छिताः। ३२। चिद्विलासांताः जडेषु वस्तुषु चैतन्यप्रतिफलनं चिद्विलासः तदंताः तत्पर्यंताः।
एते मनोबुद्धीन्द्रियादयः सर्व एव वस्तुतोऽसंतोऽपि वा। अवधानं विना एकाग्र्यमवधानं तेन विना तदभावे

ड्वैधा।

३२०

२१२

१ दिने पूर्वभाविदिने पश्चाद्भाविदिनं वानुदिनं सर्वेष्वपि दिनेष्वि- त्यर्थः। एषा ह्यद्गुला। स्य सम्बन्धः॥१

४ तत्समेति द्विरूपादीयते तयोरेकः समाशब्दः सदृशशब्दपर्यायः समः सर्वश्चे- त्यर्थः॥ अन्यस्तु वैषम्यवाची ... इति नपौनरुक्त्यं॥४

नोदिताः॥३॥ भ्रान्ताः अमनाः स्वस्वरूपनिष्ठत्वाभावरूपेण प्रमादेनोदिताः। घनवधानमेव चित्तेनानास्वरूप त्वविवर्तहेतुरित्यर्थः॥७॥ महाचिदिति श्लोकद्वयं वाक्यं। महाचिदेवास्तीदं महासत्तेति योच्यते निष्कलंकासम शुद्धा निरहंकाररूपिणी॥३३॥ सकृद्विभाति विमला नित्योदयवतीसमा॥ सा ब्रह्मपरमात्मादिनामभिः परिगीय ते॥३४॥ महासत्तापरपर्याया निष्कलंकाया महाचिदस्ति सैव ब्रह्मपरमात्मादिनामभिर्गीयत इत्यर्थः॥ शेषं स्प ष्टं॥७॥ वसिष्ठ उवाच॥ दिनानुदिनमित्येषा स्वात्मारामतया तया। नित्यमन्तर्मुखतया बाह्यवस्तुकृतस्थितिः॥३५॥ नीरागा निरुपासंगा निर्द्वन्द्वा निःसमीहिता। न जहाति न चादत्ते प्रकृताचारशालिनी॥३६॥ परमात्ममहाला भपरिपूर्णान्तरान्तरा। सर्वोपमातीततया जडमाव्यपदेश्यता॥३७॥ स्वविवेकघनाभ्यासवशादात्मोदयेन सा पुष्पगुच्छेशोभना गुच्छलतेवाभिनयोत्कृता॥३८॥ अथ तामनवद्यांगी कदाचित्सा शिखिध्वजः। अपूर्वशोभामालोक्य स्मयमान उवाच ह॥३९॥ भूयो यौवनयुक्तेव मण्डितेव पुनः पुनः। अधिकं राजसे तन्वि कान्त्या विमलया तनोः॥४०॥ प्रपीतामृतसारेव लब्धालब्धपदेव वा। आनन्दामृतपूर्णेव राजसे नितरां प्रिये॥४१॥ अभोगकृपणं शान्तमू र्जितं समतां गतं। गंभीरं च प्रसन्नं च चेतः पश्यामि ते प्रिये॥४२॥ श्लोकषट्कमेतत्स्पष्टं॥७॥ अथाष्टभिः श्लोकैः चू डाला स्वानुभवं भर्त्रे निवेदयति॥ चूडालोवाच॥ न किंचित्किंचिदाकारमिदं त्यक्त्वा समागता। न किंचित्किं किंचिदाकारं तेनास्मि श्रीमती स्थिता॥४३॥ न किंचिद्भोगतत्त्वावेश उपवाति नेह नास्तीति बाध्यमानत्वान्नाप्य स

४८ रागः इच्छा उपासंगः आसक्तिः द्वन्द्वमिष्टानिष्टबु- द्धिः समीहितं उद्योगः नजहाति दुःखभावान्नचादत्ते रागाभावात्॥८

स्तूयमानत्वात्॥ अतश्च सत्तया व्यवहर्तुमयोग्यं॥ अतएव किं विदाकारं महासत्तात्मना केनचिदा
कारेणोपलक्षितं परब्रह्म येन हेतुना ऽमीता ग्रामाज्जनभावमापन्नेति यावत् तेनाहमस्मि श्रीम
तीकान्तिमतीस्थिता। अस्मीत्यहमर्थव्यय आरिहि ब्रह्मविद्या ऽभासज्ञावंतमतिलोके दिव्यं तेज॥
३॥ एतदेवाह इदमिति। इदं सर्वं परित्यज्य सर्वमन्यन्मया ऽश्रिताय तास्त्यमसेत्यं च तेनास्मि श्रीमतीस्थि
ता॥४॥ इदं जगत्सर्वं परित्यज्य अन्यद्विश्वविलक्षणं सर्वं सर्वात्मकं सत्यं अबाध्यमसत्यं च असति कल्पि
ते जगत्यनुप्रविष्टं ब्रह्म यद्यस्मादाश्रिता तेनाहं श्रीमतीस्थिता॥५॥ यत्किं विद्यन्ते किं चिद्व तज्ज्ञानामि यथा
स्थितं यथोदयं यथानाशं तेनास्मि श्रीमतीस्थिता॥६॥ यद्वस्तु किंचिन्मे हासत्तारूपत्वात् न किंचिद्वविश्व
विलक्षणत्वात् तद्वस्तु यथास्थितं यथोदयं यथानाशं च जानामि। स्पृष्ट्यादिषु यथा यथा प्रवर्त्तते तत्सर्वं जा
नामीत्यर्थः॥६॥ भोगैरभुक्तैः स्पृष्यामि भुक्तैरिव सुदुहरैः न हृष्यामि न क्रुध्यामि तेनाहं श्रीमतीस्थिता
॥७॥ भुक्तैरिव सर्वं हृतपभुक्तैरिव सुदुहरैर्विप्रकृष्टैर्भुक्तैरपि भोगैः स्तुष्यामि। भुक्तानां च विप्रकृष्टानां वा विशेष
त्वापक्षपाते देवेभावादिति भावः। आनहृष्यामि न क्रुध्यामि रागद्वेषयोरभावात्॥८॥ एकेवाकाशे संका
रो केवले हृदये रमे न रमे राजलीलासु तेनाहं श्रीमतीस्थिता॥९॥ आकाशसंकारो आकाशवत्स्परिस

श्री॥
३२५
२६०

636

र्णे केवले विशुद्धे हृदये हृद्यवस्त्वंतरे स्वात्मनि ए केवरमे । राजलीलासु राज्ञां लीलासु गीतवाद्यनृत्यादिषु न र
मे ॥ जगतां प्रभुरेवास्मि न किंचिन्मात्ररूपिणी इत्यात्मन्येव तुष्यामि तेनाहं श्रीमती स्थिता ॥४८॥ न किंचिन्मा
त्ररूपिणी यद्धि ब्रह्म न तु किंचित् किंचिदपि न भवति सर्वविलक्षणत्वात् तन्मात्ररूपिण्यस्मि अहं जगतां प्रभु
रेव सर्वाणि भूतानि योत्तरेव यमयतीति सर्वनियामकत्वादित्यात्मन्येव तुष्यामि ॥छ॥ न तु विदग्धरागाभिः प्र
ज्ञाभिः शास्त्रदृष्टिषु रमे सहवयस्याभिस्तेनाहं श्रीमती स्थिता ॥४९॥ न तु विदग्धरागाभिः न तु कुशलो विदग्धरा
गीयास्तु ताभिः शास्त्रदृष्टिषु प्रज्ञाभिर्वीतरागकथाभिरित्यर्थः । ताभिर्वयस्याभिः सखीभिः सह रमे विनो
दयामि । पश्यामि यन्नयनरश्मिभिरिंद्रियैर्वा चित्तेन वा । हृदि तदं च न किंचिदेवा पश्यामि तद्धि रहितं तु न किं
चिद् दृतः पश्यामि सम्यगिति नाथ बिरोदयास्मि ॥५०॥ यद्वस्तुहृरस्तु चान्नयनरश्मिभिः पश्यामि यद्वसन्नि
हितेन बाह्यरत्नगादिभिरिंद्रियैः पश्यामि यज्ञानीतमनागतं वा चित्तेन पश्यामि तत्सर्वं किंचिदपि न पश्यामि
नानुसंदधामि । तद्धि रहितं दृश्यव्यतिरिक्तं तु न किंचिद्धि श्वविलक्षणं परं वस्तु सम्यगंतः पश्यामि । इत्यनेन न
तु नाथ विरोदयान्नित्योदयास्मि ॥छ॥ शिखिध्वज उवाच ॥ असेवेहृद्यलापासि बालासि वरवर्णिनि रमसे राज
लीलाभिरहमेवं नृपात्मजे ॥५१॥ रमसे राजलीलाभिरहमेवं नृपात्मजे यथाहं रमे एवं त्वमपि रमसे । नरा
इति ब्रुवाणा त्वं असेवेहृद्यलापासी स्वयं राजलीलाभीरमस्वावनृपात्मजे रतिपावे यथेदानी रमसे एवं तु सरकालमपि

रमखन रम्य इति मिथ्यालापिनी मा भूरित्यर्थः॥३॥ न किंचित्किंचिदाकारमिदं स्यात्केति यदुक्तं तत्परिहरति किं
चिदिति। किंचित्स्यान्न किंचि-त्प्रयोगतः प्रत्यक्षसंस्थितौ त्यक्तप्रत्यक्षसद्रूपः स कथं किल शोभते॥५२॥ य
त्प्रत्यक्षसंस्थितं किंचित्पृथिव्यादिरूपं वस्तु स्यात्क्वापि न किंचिद्व्यपदेश्यं वस्तु गतः प्राप्तः त्यक्तप्रत्यक्षस
द्रूपः त्यक्तं प्रत्यक्षं दृष्टं वस्तु येन स कथं शोभते प्रामाणिकस्य प्रतीत्यागात् अप्रामाणिकस्य स्वीकारादिति
भावः॥७॥ भोगैरभुक्तैरिति यदुक्तं तत्परिहरति भोगैरिति। भोगैरभुक्तैः स्पृष्टोऽहमिति भोगाञ्जहाति
यः॥ दरिद्रदुर्भगः सन् स कथं किल शोभते॥५३॥ यो मूढो भुक्तैरेव भोगैः स्पृष्ट इति मन्यमानः प्राप्तानपि
भोगाञ्जहाति स मूढः प्राप्तभोगत्यागात् दरिद्रवत् दुर्भगो भाग्यहीनः सन् कथं शोभते॥ रुष्टे वा सन्नरा
ख्यायामिति पाठे यथा हि कश्चिद्रुष्टोऽपि ततः परिविष्टेष्वपि भोज्यवस्तुषु सन्निहितायामपि स्वकान्तायां रोषवशा
दासन्न एव शय्यायां तिष्ठन् भोगपराङ्मुखः स्यात् तद्वदित्यर्थः॥७॥ यत्पश्यामि न पश्यामि तत्पश्याम्यन्यदे
व तु प्रलाप इत्यसंन्यस्य स कथं किल शोभते॥५४॥ यद्वस्तु पश्यामि चक्षुरादिभिर्विषयीकरोमि तदहं
वस्तु न पश्यामि नानुसंदधामि। अन्यदेव तु दृश्यव्यतिरिक्तं अन्यदेव वस्तु पश्यामीति यः प्रलापः एतं
प्रलापमनर्थकं वचनं असंन्यस्य त्यक्त्वा कथं शोभते प्रलाप इत्यसंन्यस्येति पाठे इति एवंरूपो सन्न शोभ

वि ५

व

श्री॥

शंकर

२५

घा ८ हर

मु

तदस्यार्थः॥छ॥तस्माच्चूडाला सिद्धाभ्यासिवपला सि विलासिनि नानालापविलासेन क्रीडसे क्वाऽपि उत्तं
द रो॥५५॥वसिष्ठ उवाच॥ स विस्या हृद्हासेन शिखिध्वज इति प्रियां॥ मध्याह्ने स्नातुमुत्थाय निर्ययौ तु गामां
गनागृहात्॥५६॥ कष्टं नाम मनि विश्रान्तो वैमदवांसिन बुद्धवान्॥ राजेति खिन्ना हृदया स्वव्यापारपरा भ
वत्॥५७॥ त्रयमेतत्स्पष्टं॥छ॥ तदा तथा गते त्राथ ता हृष्टाशयोस्तयोः॥ ताभिः पार्थिवलीलाभिः कालो बङ्ग
तियो ययौ॥५८॥ तदा तस्मिन्नू काले तु चूडे ब्रोतस्मिन्देशे तथा तेन प्रकारेण अवस्थितयोस्तयोः ताभिः पा
र्थिवलीलाभिर्बहुतिथः कालो ययौ॥ अंगेति संबोधनं॥छ॥ एकदा नियत प्राया तिरिछाया अपि स्वय
हृदालाया बभूव ह्या लीलया खगमागमे॥५९॥ खगमागमेराकाशगमनागमने॥ शेषं स्पष्टं॥छ॥ ख
खगमागमसिद्ध्यर्थं अथ सा नृपकन्यका॥ सर्वभोगान्ननादृत्य समागत्य च निर्जने॥६०॥ एकैवैकान्त निरत
स्वासनावस्थिता गिका॥ ऊर्ध्वगप्राणपवनं चिराभ्यासं चकार ह॥६१॥ श्लोकद्वयमेतत्स्पष्टं॥छ॥ श्रीराम उ
वाच॥ कस्य स्पंदविलासस्य चिराभ्यासस्य मे वद॥ ब्रह्मन् खगमनोद्यतं फलं यल्लोके योगिनः॥६२॥ स्पंद
विलासस्य प्राणगति विलासस्य चिराभ्यासस्य चिरमभ्यस्तस्य ऽ तेरत्समानं॥छ॥ वसिष्ठ उवाच॥ श्री
मच्छिखिध्वजकथाप्रसंगापातितामिमां॥ प्राणादिपवनाभ्यासक्रियां सिद्धिफलां शृणु॥६३॥ स्पष्टं॥

ऽन्तःस्था इति श्लोकचतुष्टयं व्याख्येयं। अंतस्था अखिलास्य त्वाख्यसाध्येतर वासनाः गुदादिस्थानसंको
चाख्स्थानकादि क्रियाकर्मेः॥६४॥ भोजनासनशुद्धाचसाधुशीलार्थभावता।श्वाचारात्सुजनासंगात्स
त्यागात्स्ववासनाः॥६५॥ प्राणायामधनाभ्यासाद्रमकालेनकेनचित्॥ क्षेपलोभादिसंत्यागभोगत्य
गाच्च सुव्रता॥६६॥ त्यागादाननिरोधश्च भृशं यांति निरोधतां॥ प्राणाः प्रभुत्वात्तत्रस्य ध्येसोऽभ्यासाद्वा खि
लाः॥६७॥ अंतस्थाश्चित्तगताः स्वसाध्येतरवासनाः स्वसाध्यव्यतिरिक्तवस्तुविषयावासना। अखिला
पिज्ञानादिवायवोऽभ्यासात्स्वत्यागादाननिरोधरेचकपूरककुंभकैर्विधेयतां यांति स्वयुः॥ तत्र गुदा
दिस्थानसंकोचहेतुमाहस्थानकादिक्रियाकर्मेरिति। स्थानकानि मत्सुगुदादयः स्थानविशेषाः। आदि
शब्दाद्यागादिग्रहणं स्थानकादयश्च तत्क्रिया चामाश्चगपाद्यभेदाश्च तैस्तत्र मूलबंधेन गुदसंकोचश्च रेच
२ निरोध योर्पुरितनवद्वारेइति विवेकः। तत्र मूलबंधलक्षणं पार्ष्णिभागेनसंपीड्य योनिमाकुंचयेद्गुदं। अपान
मूर्ध्वमाकृष्य मूलबंधोयमिष्यतइतिः स्वेचरीलक्षणं उक्तं रुशाः स्वयमुक्तं। भोजनासनेश्वभोज

न २      धै ५

अ॥४॥
३।३

३६८

तस्य वस्तुनः अर्हर्हिनमितिमेध्याभावः आसनं स्थिरासनं तस्य निर्विकारता । साधुशास्त्रार्थभावना २
योगशास्त्रस्य सम्यगनुसंधानात् २ स्वाचारो योगांगानुष्ठानं । सुजनो योगविदः सर्वे साम्यास्तद्वर्वकाः सुखा
सनाद्राः स्थिष्ठमन्यशष्ठा । राज्यादिमोक्षपर्यन्ताः समस्ता एव संपदः । देहानिलविधेयत्वसाध्याः सर्वस्वरा
घवादृता देहानिलविधेयत्वसाध्याः प्राणलयेन अणिमादयोपि सिद्धयंतीत्यर्थः । शेषं स्पष्टं ॥ परिमंडलि
तेति श्लोकत्रयेणाक्ये । परिमंडलिताकारा मर्मस्थानसमाश्रिता ॥ अतवेष्टनिका नाम नाडी नाडीव्रातास्थि
ताः स्वा वीणाग्रावर्त्तसदृशी सलिलावर्त्तसन्निभा । कीटादिषु केशांते उ सर्वेषु प्राणिषु दिता ॥ १ ॥ शीतान्नं
सप्त भोगींद्रभोगवद्दृहमंडला ॥ अनारतं ससस्पंदा पवमानेन तिष्ठति ॥ २ ॥ परितो मंडलितः मंडलीकृतः
आकारोयस्याः सा मर्मस्थानसमाश्रिता । तस्योर्ध्वं कुंडलीस्थानं नाभेस्तिर्यगधोर्ध्वतः । अष्टप्रकृतिरूप
सा घट्ट्धा कुंडलीकृते ति याज्ञवल्क्येन कंदस्योर्ध्वं नाभेस्तिर्यगूर्ध्वतः कुंडलीस्थानं निरूपणात् २ नाभे
श्च मर्मस्थानात् २ नाभिस्थानमाश्रिता मर्मस्थानं समाश्रिता भवति । नाभिश्च हृदयं गार्गि कं चक्रपतेनथैव च
इति याज्ञवल्क्येन मर्मस्थानेषु परिगणनात् २ वीणाग्रावर्त्तसदृशी वीणादंडस्योपरि भागे यस्तुंबीफलं तद्व
दुनरूप आवर्त्तः तत्सदृशी । सलिलावर्त्तसन्निभा । यतः शीतान्नं तया गुप्तं सभोगींद्रस्य भोगवद् दृढबद्ध मं

त्वा सर्वप्राणगता नाडीशतैरावृता आंत्रवेष्टनिका नाम आंत्रवेष्टनिकेति प्रसिद्धा काचिन्नाडी पवमानेन वा
युता अनारतं सस्पंदा तिष्ठतीत्यन्वयः ॥ छ ॥ तस्या इति श्लोकद्वयं वाक्यं तस्या आभ्यंतरे तस्मिन्नूर्ध्वकदलीकोशको
मले पावनी परमा शक्तिः सर्वशक्तिजववृद्धा ॥ ७२ ॥ अनिशं निश्वसद्रूपा कुंडलितेव भुजंगमी ॥ संस्थिता नोर्ध्वं
मुखी स्पंदानां हेतुतां गता ॥ ७३ ॥ तस्याः सर्वकायानाड्याः कदलीकोशवत्कोमले अभ्यंतरे कुंडलिता भुजंगमीव
अनिशं निश्वसद्रूपा स्पंदनानां हेतुतां वेष्टनादेव गता ॥ ऊर्ध्वीकृतमुखी सर्वासां शक्तीनां जवप्रदोल्लासहेतुः
पावनी पवनसंबंधिनी परमा शक्तिः संस्थिता ॥ छ ॥ अस्यामिति श्लोकत्रयं वाक्यं ॥ अस्यां समस्ताः संबद्धा ना
ड्यो हृदयकोशगाः ॥ शांतकुंडलिनी स्पंदस्पर्शसंविकला मला ॥ ७४ ॥ कलोत्कलनेनाशु कथिताचेतनेन
चिरं जीवनाज्जीवता या ता मननान्मनः स्थिता ॥ ७५ ॥ संकल्पात्सैव संकल्पो बोधाद्बुद्धिरिति स्थिता ॥ अहं
कारात्मतां याता सैवाद्यर्ष्टकाभिधा ॥ ७६ ॥ अस्यामेव प्राणशक्तौ हृदयकोशगाः समस्ता नाड्यः संबद्धाः
स्थिताः स्पंदस्पर्शसंविकला क्रियाहेतुः स्पर्शानुभवहेतुश्च अमला सैव पावनी शक्तिः अतः कुंडलिनीत्यु
च्यते सैव चकलनेन नंदनेन हेतुना कलेत्युक्ता चेतनेन ज्ञानोत्पादनेन चिदित्युक्ता जीवनादुच्छ्वासनि
श्वासप्रवर्तनाज्जीव इत्यवस्थां गताः मननात्स्मरणहेतुत्वान्मन इति स्थिता संकल्पादिविधान्मनोरथक

श्री ४ ॥

३३४

२६३

642

ल्पनानुसंकल्पशब्दनाख्याशक्तिरपि बोधनान्निश्चयोत्पादनाद्बुद्धिरिति स्थिता सैवाहमित्यभिमानात् अहं
कर्तांयातोसेती पुर्यष्टकशब्दवाच्यापीत्यन्वयः ॥६॥ स्थिताकुंडलिनीदेहे जीवशक्तिरनुत्तमा ॥ प्राणापानस्व
रूपत्वात् अधऊर्ध्वं व्रजत्यसौ ॥७॥ देहे स्थिताकुंडलिनीशब्दवाच्यानुत्तमा या जीवशक्तिः सा असौ एव प्राणा
पानस्वरूपत्वाद्धऊर्ध्वं व्रजति ॥६ समस्तैवोर्ध्वमायाति समस्ताधोथ सा व्रजेत् ॥ तदा सा मृतिमायाति सैव
णमयी स्मृता ॥८॥ सा प्राणशक्तिः समस्तैव कादाचिदूर्ध्वमायाति अथानंतरं समस्तैवाधो व्रजेत्तदा तस्मात्
णगतेर्हेत्वात्सु मामृतिं मरणमायाति ॥ हि यस्मात्कारणात्प्राणमयी स्मृता ॥८॥ सर्वदात्मनि तिष्ठेश्च स्को ऊर्ध्व
धोगमागमौ ॥ तज्जेतो हीयते व्याधिरंतर्मारुतरोधतः ॥९॥ सा प्राणशक्तिर्निरोधाभ्यासवशात् ऊर्ध्वाधोगमाग
गमौ त्यक्त्वा आत्मनि देहे सर्वथा सर्वेण प्रकारेण तिष्ठेत् एवं तर्मारुतरोधतः मारुतस्यांतर्निरोधवशात्
तोजेतो व्याधिर्हीयते च ज्यते व्याधिरित्युपलक्षणं जरामरणादयोपि हीयंत इत्यर्थः ॥९॥ श्रीराम उवाच
किं विनाशः किमुत्पादः शरीरस्मिन्मुनीश्वर ॥ आधयो व्याधयश्चैव यथावत्कथयाशु मे ॥१०॥ विनाशोत्पाद
शब्दाभ्यां तद्धेतुलक्ष्यते ॥ को विनाशोयचाकुतः उत्पादो येषामिति ब्रूहि ॥ त्रिसमासनं ॥१०॥ वसिष्ठ उवा
च ॥ देहदुःखं विदुर्व्याधिमाध्याख्यं वासनामयं ॥ मौर्ख्यमूले हि ते विद्यात्तत्त्वज्ञानपरिक्षये ॥११॥ देहदुःखं शा
रीरदुःखहेतुं व्याधिं विदुः वासनामयं मानसदुःखहेतुं आध्याख्यं विदुः ते उभे अपि दुःखे तत्त्वज्ञानपरि

643

अत एवेति श्लोकद्वयं वाक्यं

स्यैतत्त्वज्ञानाभावे सति मौरव्ये मूले अज्ञानमूले विंदारौ॥६॥ अतत्त्वज्ञानवशान्तःस्वेंद्रियाक्रमणं विना हृदि न
न वमुस्त्यज्य रागद्वेषघनारतं॥८२॥ इदं प्राप्तमिदं नेति जास्यात्सुघनमोहदः॥ आत्मधयः संप्रवर्तते तर्वेषासु मिहि
का यथा॥८३॥ अतत्त्वज्ञानवशात्तत्त्वज्ञानाभावात् स्वेंद्रियाक्रमणं विना इंद्रियजयाभावे सति तानवस्तु
स्त्यज्य हृदि रागद्वेषप्रहते तोऽत्यं वशादिदं वस्तु प्राप्तमिदं नेत्येवरूपाघनमोहदा आत्मधयः संप्रव
र्तन्ते । वर्षासु वर्षर्तौ मिहिकाः प्रालेयानी वा आलेयं मिहिकावेस्युमरः इतरसमानो॥८४॥ स्वरामिति श्लोक
उत्पयं वाक्यं स्वरांस्फुरंती छिद्रासु मौरव्ये वघनतां गते इरंत्वाभ्यवहारेण इदं राक्रमणेन वा॥८५॥ उः कालव्यवहा
रेण उद्भ्रियास्फुरणेन वा उजनासंगदोषेण उभयोऽभावनेन वा॥८६॥ क्षीणत्वाद्वातिपूर्णत्वान्नाडीनां रंध्रसंततौ।
प्राणो विधुरतां याति काये च विकलीकृते॥८७॥ दोषस्थित्यकारणाद्दोषाधाधि दृशासवर्तते॥ घनाः आवृण्वती दाद्यपा
मिवाकारविपर्ययः॥८८॥ छिद्रासु सर्वकोसु आधिरूपासु स्वरांस्फुरंती उ मौरव्ये वघनतां गते सति उरस्य दोष
इकहेतोई इस्यान्नस्याभ्यवहारेण उदंशस्य भ्रमसानादेरांः क्रमणेन उक्ताकोध्वे संध्यादौ भोजनादि व्याय
तारेण उद्भ्रियायाः शावबाहनादिरूपायाः स्फुरणेन प्रवर्तनेन तक्षुधादि दूषितजनानामासंगदोषेण उभाव
स्य क्रोधादेरुद्भावनेन वनाडीनां प्राणसंचारमार्गाणां क्षीणत्वात्सूर्णत्वाद्वातेऽध्रसंततो प्राणो विधुरतां वेष

ऋ०॥४॥
३३५

624

षष्ठ्यं याते कायेच चिकित्सीकृते न अपटौकृते सति दोस्थित्यकारणात् दुःखहेतोर्दोषा वातादिरूपा देहाद्व्याधिर्जायते । अ
हापिते दोषाभ्यां आधि । दृष्टिदेय हेतुभ्यां नद्यां आकारविपर्ययो दृष्टिदोय इत्येवं त्वच्चयः ॥७॥ प्राक्तनी चैहिकी वापि
शुभा वाप्यशुभा गतिः । येवाधिकास्तवत्तथा तस्मिन्योजयति क्रमो ॥८॥ प्राक्तनी सर्वजन्मसंभवा ऐहिकी इहज
न्मनि संभूता शुभाशुभा वा या गतिर्वासना अधिका प्रबला सैव तस्मिन्व्यापुरुषे शुभे अशुभे वा कर्मव्यवहारे त
था तेनैव प्रकारेण योजयति प्रवर्त्तयति । उद्वासितावज्ञाग्रव्याधिहेतुमपवारमाचरतीति भावः ॥७॥ आधयो व्याध
यश्चैवं जायन्ते भूतपंचके । कथं शृणु विनश्यन्ति राघवाणां कुलोद्वह ॥१०॥ एवं सर्वोक्तेन प्रकारेण भोवेत्स पृष्टः ॥७॥
द्विविधो व्याधिरस्तीह सामान्यः सार एव वा । व्यवहारस्य सामान्यः सारो जन्ममयः स्मृतः ॥११॥ आधिर्द्विविधोस्ति सा
मान्यः सारभूतश्चेति तयोर्व्यवहारः व्यवहारमात्रहेतुराधिः स सामान्यस्त्यक्तविदेदविवक्षाधारणाचारय
स्तु जन्ममयो जन्ममयो हेतुराधिः स सारः स्मृतः । सुदृढदेहवासनामय आधिः सामान्यः मलिनवासन
मयस्तु सार इति तात्पर्यं ॥७॥ प्राप्तेनाभिमतेनेव नश्यतीति व्यावहारिकाः । आधिक्षयश्चाधिभवाः क्षीयंते व्या
योप्यलं ॥१२॥ व्यवहारिकाः व्यवहारमात्रप्रयोजना आधयः प्राप्तेन सम्यगभिमानेनेव वस्तुना नश्यंति । इह
माचिद्धान्निवृत्ते रुचितत्वात् । आधिजन्या व्याधयोपि आधिक्षये सति क्षीयंते ॥७॥ आत्मज्ञानं विना सारा नाधिर्न
श्यति राघव । यथा रज्ज्ववबोधेन विना सर्पो न नश्यति ॥१३॥ आसारस्त्वाधिरात्मज्ञानं विना न नश्यति । अविद्या

यत्वान्नास्य दृष्टमन्यच्छ्रा॥६॥ अनाधिजा व्याधयस्तु द्रव्यमंत्रशुभकर्मभिः चिकित्सकादिशास्त्रोक्तैर्नश्यंति खं वदेहि
तश्शा॥२७॥ द्रव्याणि कल्ककल्पशरादिरूपाणि मंत्रा आरोग्यहेतवः सौरादयः शुभकर्माः देवब्राह्मणसंतर्पणा
दयः॥ शिष्टं समानं॥७॥ श्रीरामउवाच॥ आधिः कथं भवेद्व्याधिः कथं च स विनश्यति॥ इति मे भगवन्ब्रूहि प्रसन्न
पदया गिरा॥२८॥ स्पष्टं॥८॥ ~~वसिष्ठ~~ चित्ते चित्ते इति श्लोकषट्कवाक्यं॥ वसिष्ठउवाच॥ चित्ते विधुरिते देहः संक्षोभमुपया
ति हि॥ तथा हि रूषितो जंतुरग्रमेव न पश्यति॥२५॥ अनवेक्ष्य पुरोमार्गममार्गमनुधावति॥ प्रकृतं मार्गमुत्सृज्य
शरार्तो हरिणो यथा॥२६॥ संक्षोभात्साम्यमुत्सृज्य वहंति प्राणवायवः॥ असमं वहति प्राणे नाड्यो यांति विसंस्थि
तिं॥२७॥ असम्यक्संस्थिते त्वेवं यथावर्णाश्रमक्रमाः॥ कुजीर्णत्वमजीर्णत्वमतिजीर्णत्वमेव वा॥२८॥ दोषाय
व प्रयात्यन्नं नाडी प्राणविपर्ययात्॥ तथान्नानि विरोधं न तिष्ठंत्यंतः शरीरके॥२९॥ तान्येव व्याधितां यांति प्रकृ
णामस्वभावतः॥ एवमाधिर्भवेद्व्याधिराधिनाशाच्च नश्यति॥१००॥ चित्ते विधुरिते विक्षिप्ते सति देहः संक्षोभमुपयाति॥ वि
तायल्लंधातुवद्वहंशरीरमिति॥ एतदुपपादयन्नाह तथाहीति॥ रुषितो हि जंतुरग्रं पुरोभागमेव न पश्यति किंतु ता
न्पव स्खलितिरोधः तथा पुरोमार्गमनवेक्ष्य अमार्गमकार्यमेवानुधावति॥ शरार्तो विद्धो हरिणः वा ततश्च देहस्य
सप्तधातुमयस्य संक्षोभात् प्राणवायवः साम्यमुत्सृज्य विषमं वहंति प्राणे विषमं वहति सति नाड्यो विसंस्थि
तिं यांति॥ एवं नाडीनां प्राणानां च विपर्ययात् वैषम्यादहता रसैरन्नमुपभुक्तं दोषाय वदोषाय केवलं कुजीर्ण

श्लोकत्रयवाक्येन १

त्वमजीर्णत्वमेवचाप्नोति। एवंयात्यम्लानिशरीरेविरोधेनतुजीर्णत्वादिरूपेणगतिंप्रयांतिनान्येवाम्लानिपरिणा
मस्वभावतोविपाकवशाद्व्याधिरूपतांयांति। एवमुक्तेनप्रकारेणाधिर्व्याधिर्वेत्युभौसतन्त्रौदेहंविनश्यतियथाव्या
धयामंत्रैरारोग्यादिहेतुभिर्विनश्यंति तत्क्रमंवक्ष्यामिश्रृणुविस्तरेणयः।दोषैस्पृष्टः६। यथाविरेचंकुर्वंतिहरीतक्यः
स्वभावतः।भावनावशतःकार्यंतथायरलवादयः॥१॥हरीतक्योहरीतकीफलानियथास्वभावादेवविरेचकंमल
मोचनंकुर्वंतितथैवयरलवादयोमंत्रवर्णाभावनावशतःआरोग्यसमुत्पत्तिध्यानवशात्रोगनिवृत्तिरूपंका
र्यंकुर्वंति।७।नतुस्फोलोपजननेनितिरूपिणावनेनेतिन्यायादाधिनाशात्तज्जन्योव्याधिर्नश्यतीत्युक्तं।तत्कथ
मित्याकांक्षायांतत्प्रकारमाह शुद्धयेति। शुद्धयाशुण्यया साधोक्रियया साधुसेवया। मनःप्रयातिनैर्मल्यंतिकार
णेवकारणे।२।आनंदोवर्द्धतेदेहेशुद्धेसत्त्वेसिराघव।प्रणेदावुदितेसम्यक्नैर्मल्यंभुवनेयथा।आस्वशुद्धेव
र्द्धस्यतेक्रमेणप्राणवायवः।जरयंतितयान्नानिव्याधिस्तेनविनश्यति।४। शुद्धयानिर्दोषयाशुण्ययाक्रिययात्रिव
र्तनादिरूपयासाधुसेवयामहापुरुषशुश्रूषयात्वपापक्षयेसतिमनोनैर्मल्यंप्रयाति।।वनिकेषेणघर्षणेनकांच
नमिवात तेश्वेतसिशुद्धेसति देहेआनंदः सुखं वर्द्धते प्रणेदावुदिते सति भुवने नैर्मल्यंप्रकाशइव।तथासत्त्व
शुद्धौचित्तनैर्मल्येसतिप्राणवायवःक्रमेणैववर्द्धंतितथासाम्येनवर्द्धंतःसंतोऽन्नानिजरयंति तेनान्नाजर
णेनव्याधिर्विनश्यति।७।आधिव्याध्योरितिप्रोक्तौनाशास्यत्रिक्रमौत्वयि।ॐउलिन्यांकथायोगमधुनाप्रकर्त
शृणु।५।

धा८

अविद्याग्रंथीर्नाशोस्य त्तिक्रमो नाशाक्रमतस्तत्क्रमश्चेति षड्वर्गक्रमप्रकारेण प्रोक्तो॥ अधुना प्रकृतं कुंडलिन्यां कुंडलि
नीविषयकथायोगं कथ्यमानेयोगं स्पृशु॥छ॥ गुर्वष्टकापराख्यस्य जीवस्य प्राणात्मकां विद्धि कुंडलिनीमंतरामो
दस्यैव मंजरीं॥५१॥ अतः कुंडलिनी सर्वोक्ता गुर्वष्टकापराख्यस्य गुर्वष्टकमित्यपराभिख्यायस्य तस्य जीवस्य प्राण
नामिकां प्राणस्वतां विद्धि॥ आमोदस्य मंजरीमिव यथा हि मंजर्यां सत्यामेवामोदः प्राणितितथा॥ कुंडलिन्यां सत्या
मेव जीव इति भावः॥छ॥ तां यदा पूरकाभ्यासादापूर्य स्थीयते समीतं देति मेरवं स्थैर्यकायस्यापीनतां तथा॥५२॥ यदा पू
रकाभ्यासात्पूरकाभ्यासवशाद् हेतोस्तां कुंडलिनीमापूर्य समंतत्तिचकारे स्थीयते तदा मेरवमरुसंबाधस्थैर्यं स्थौल्य
कायस्यापीनतां स्थौल्यं चैति प्राप्नोति॥ नाडीस्थपूरकाभ्यासवशाद्योमकोरेव स्थिरःस्थूलश्चउक्ततात्यर्थः॥छ॥ यदा [illegible] ति
स्रोकत्रयवाक्य॥ यदा पूरकपूर्णांतरायतत्प्राणमारुतं तानीयते सविदेवोर्ध्वं सोढुं धर्मश्रमक्रमात्॥ सर्पीव खरितैव
ध्वंयाति तदंडोपमांगता॥ नाडीः सर्वाः समादाय देहबद्धालतामा॥५३॥ तदासमेरवभेवदढत्वालावयतिदेहकानं
रंध्रपवनापूर्णा मत्रे वांबुगतानतेः॥५४॥ यथा पुत्र साकुंडलिनी पूरकपूर्णांतरायतत्प्राणमारुतेंसरकः पूर्णाः प्र
तेरायते दीर्घश्च प्राणमारुतो यस्मिं कर्मणि तद्यथा भवति तथा सर्वदा ऊर्ध्वगतिभावनया ऊर्ध्वमुपरितनोकाश्म
देशनायतो धर्मश्रमक्रमात्साद्गुणैव तथाहि केनविरुद्धमेत्यांतेन कुंचिद्विच्छायापाप्रमापनोदनायचीलाख्य
ऊर्ध्वकमध्यस्यता पूरकपूर्णांतरायतप्राणं यथा तथा कुंडलिन्यधीनीयते तद्दीर्घ्यंघीतदासा कुंडलिनीसर्पी

श्री॥
३३

२६९

648

वद्भुजंगमीवदंष्ट्रोपमां गताः सतीर्दहवत्नाः सर्वा नाडीर्लेताश्च समादाय स्वरितैवोर्ध्वं याति तदा चेद्देहकं समस्तमेवोत्सा
यति ॥९॥ क्रमयति ॥ ततः पवनाभ्यासेन अर्थात् यथा तथा पवनेनापूर्णा भस्त्रा चर्मप्रसूविकाश्च वुगतास्तनी नीरं यथोत्सावयति
तद्वदित्यर्थः ॥४॥ इत्यभ्यासविलासेन योगेन व्योमगामिता । योगिनः प्राप्नुवन्त्यत्र दर्शनादिदशाभिवा ॥५॥ इत्यभ्यासविला
सेन इत्थं अभ्यासविलासवता योगेन योगिनो व्योमगामितां प्राप्नुवन्ति दीनादर्शनादि दशांग इद्धुपदमिवेत्यध्याये: ॥६॥ आ
नाडीति श्लोकद्वयं वाक्यं प्रबलनाडीप्रवाहेन शक्तिः कुंडलिनी यदा बहिस्त्र्यंककपाटस्य द्वादशांगुलमूर्ध्वं ॥१२॥ रेचक
प्रयोगेन नाश्चंतरानिरोधिना मुहूर्तं स्थितिमाप्नोति तदा व्योमगदर्शनं ॥१३॥ यदा सा कुंडलिनीरूपो प्राणवायुः प्रब
लनाडीप्रवाहेन सुषुम्नाप्रवाहेन ऊर्ध्वकपाटस्य ब्रह्मरंध्रस्य बहिर्भागे द्वादशांगुलपरिमिते तस्याकाशदेशस्य पा
भागे नाडीशतनिरोधिना सर्वनाडीनिरोधकेन प्रयोगेन रेचकाभ्यासरूपेण प्रकृष्टेन योगेन मुहूर्तमात्रं स्थिरमवस्थानं
प्राप्नोति तदा तस्मिन्काले व्योमगदर्शने सिद्धविद्याधरगंधर्वादीनां खेचराणां दर्शनं भवति ॥७॥ दर्शनप्रकारमेवाह
विज्ञानादीति । विज्ञानाहरसंस्थेन बुद्धितेजः पराधवद्दृश्यंते व्योमगाः सिद्धाः स्वप्नवत्स्वार्थदा अमी ॥८॥ विज्ञानाहरसंस्थे
न विज्ञाने स्वस्वरूपे चैतन्ये तस्याहरसंस्थेन सन्निकृष्टेन अंतश्चेतनस्य संकोचात्प्रकाशकेन बुद्धितेजसा प्रांशुरूपा व्योमगाः
सिद्धाः स्वप्नवत्स्वप्नदशायामिव दृश्यंते न केवलं दर्शनमात्रं स्वार्थदा अपि स्वापेक्षितामणिमादिसिद्धिं प्रयच्छंतीत्यर्थः ॥

प्रकार~ वि२४

५

परं मुग्[illegible]ने शौमा त्सुखादिति। सुखाद्बहिर्वा दशांते रेचकाभ्यासयुक्तितः। प्राणो विरं स्थितिं याति अविरां स्यपरां शरीं।५।
सुखाद्बक्त्रोद्बहिर्वा दशांते द्वादशांगुलपरिमिताकाशदेशे पर्यंत रेचकाभ्यासयुक्तितो रेचकाभ्यासरूपाद्योग विशे
षाद्धेतोः प्राणोऽपानवायोः स्थितिं नीते सति अपरां शरीरे दत्तां तरं प्रविशति। परकायप्रवेशसिद्धिर्भवतीत्यर्थः।६।
श्रीरामउवाच। सूक्ष्मसच्छिद्रादिगत्यर्थं हरणार्थं च कस्य वा। अणुतां स्थूलतां वापि कायो यं नीयते कथं।७। सूक्ष्म
च्छिद्रादिगत्यर्थं सूक्ष्मसच्छिद्रादिषु गत्यर्थं गमनार्थं हृदये स्वस्याकाशस्थ हरणार्थं व्याप्त्यर्थं वा। अयं कायोऽणुतां स्थू
लतां वापि कथं नीयते। कायस्य कत्वात्परिमाणभेदे वैशेषदशसंगादिदिति भावः।७। वसिष्ठ उवाच एकं चिन्मा
त्रमस्तीह शुद्धं सौम्यमलेपकं। आकाशादतिसूक्ष्मं तरं शांतं नाजगाम्न जगत्कृतः।७। चिन्मात्रमेकमेवास्ति जग
ज्जगत्कृतः पदार्थसमूहयोरपि नास्ति। शिवसमानां।८। तद्विनोयासमनासानसंगे कल्पनासुखनांगतां यदा
तदा जीव इति प्रोक्तमाविलतां गतं।१। जात चिन्मात्रं वस्तु संकल्पोन्मुखतां गतं सत् यदा आसमनेवास्मानं चिना
ति बुद्धौ पश्यति तं करोति तदा आविलतां कलुषतां गतं जीव इति प्रोक्तं।९। असत्यमेव संकल्पभ्रमेण देशरी
रं को जीवः पश्यति मूढात्मा बालो यक्षमिवोद्धतं।१०। मूढात्मा जीवः स्वसंकल्पभ्रमेण बालो यक्षमिव असत्य
मेव देहं शरीरं पश्यति।७। एवं विदितात्मानो भावयंति यथैव यच्छांतस्तथैवाशु पश्यति इह भावनया तया।२०।

१८
श्री॥
३३८

650

एवं सति विदितात्मनो निखिलात्मवत्त्वात् [illegible] रूपाय दृढरूढं यथैव भावयंति तथा दृढभावनया तदर्थं तथैवानु
पश्यंति ॥ छ ॥ दृढभावानुसंधानाद्रवि[illegible]द्धा अपि राघव । विषं तयंत्यमृततामसृतं विषतामपि ॥ २१ ॥ सदा आ
त्मज्ञानवशीकृता अपि आत्मज्ञानानुसंधानात् गुणो दृढभावनायाः सा तत्या हि विषं दुःखादकं निषिद्धं कर्मा
मृततां नयंति शेषस्य प्र[illegible] ॥ छ ॥ एवं यथा यदेव रूपं भाव्यते दृढभावनया [illegible] यतो हि तदेवाशु तदिस्यात्को कितं
सुकृतः ॥ २२ ॥ एवं यद्वस्तु यथा भाव्यते तत्तथैव [illegible] यते तदेतदर्थस्वरूपमङ्कुरालोकितं विचारितमित्यर्थः ॥
अणिमादिपदप्राप्तौ भावनायुक्तिरीदृशी ॥ सुलज्जेयमहाबुद्धे योगसंसिद्धसंविदां ॥ २३ ॥ योगसंपृष्टं तं वि
दितं कर्म विषतां दुःखदं तां नयंति सिद्धसंविदां योग एव तज्जयसंसिद्धा दृढपरिचयाः संविधिषां तेषां अणि
मादिप्राप्तव्यपरिदृश्यायं भावनायुक्तिः सुलभा ॥ अत एव भावनायामणिमादित्वं भावनायां मदिमवे
मणिमादिसाधिका पियुक्तिः सुखेन लभ्यते इत्यर्थः ॥ छ ॥ अणिमादिगुणैश्वर्ययुक्ता सा तु प्रभाविनी ॥
एवं बहुतरचूडाला घनाभ्यासवती सती ॥ २४ ॥ सा चूडाला घनाभ्यासवती सती अणिमादिगुणैश्वर्ययु
क्ताऽभवेत्यन्वयः ॥ छ ॥ जगामाकाशमार्गेण विवेश बुधिकोटरं ॥ वचारवसुधापीठं गंगवामलशीतलाः ॥

सा गंगेव लोकत्रये पी श्वरविज्ञ ह्यारेत्यर्थः। तत्रां बुध्विको टर प्रवेशो नऽपानालगमनमुच्यते॥ छ॥ रूणमव्याग
ता भर्तुर्वक्रस्युश्चेर्यथा द तदा भर्तारं बोधयामीति तदुपायमवेक्ष्यते॥ २६॥ साहृडालाभर्तुर्वक्रस्या लिंगन
यं रूणमपि यदागता तदा भर्तारं बोधयामीति बुध्वा तदुपायं तद्बोधनोपायमेवावेक्षते॥ छ॥ विचारयति। नद्गुरा
लिंगनादिकमपेक्षते। विषयसुखे च नादनाराद्धिति भावः॥ छ॥ यत्नेन तं च भर्तारमात्मज्ञानामृतं प्रति। बद्धशो
बोधयामास पिता बालमिवात्मजं॥ २७॥ स्पष्टं॥ छ॥ न वासा वापतऽर्त्ता राजा विश्रांतिमात्मनि। मुक्ताफलं सुसंश्लि
ष्टं मुक्ताफलमिवामलं॥ २८॥ मुक्ताफलममलं सुसंश्लिष्टमपि यथा विश्रांतिं नापतत् तथा सोराजाप्यात्मवि
ष्टनाव तापि कालेन नामैवं गुणशालिनी। बोलोविद्यामिव न्यपाश्वडालांन विवदसः। साप्यलब्धात्मविश्रांतिः
तां सिद्धिमयमामनः॥ २९॥ दर्शयामास नो राज्ञः शूडस्येव मखक्रिया॥ ३०॥ श्रीराम उवाच॥ महत्याः सिद्धियोगि
न्यास्तस्या अपि शिखिध्वजः। यत्नेन आपनो योगं बुध्यते न्यः कथं प्रभो॥ ३१॥ श्लोकत्रयमेतत्स्पष्टं॥ छ॥ वसिष्ठ
वाच। उपदेशक्रमो राम व्यवस्थामात्रपालनं। ज्ञप्तेः कारणमच्छ हा शिष्यप्रज्ञैव केवला॥ ३२॥ श्री उपदेशक्रमः
गुरूपदेशरूपक्रमः। व्यवस्थामात्रपालनं व्यवस्था ज्ञानशास्त्रोक्ता मर्यादा तन्मात्रस्यैव पालनं ज्ञप्तेरात्म

तिश्रीरामउवाच॥ एवं स्थिते वद गुरो कथमेतज्जगत्स्थितो ऽ
ज्ञ मो गुरूपदेशाख्य आत्मज्ञानस्य कारणं॥१९

साक्षात्कारस्य तु गुरुशास्त्रशिष्यप्रज्ञैव न ततः कारणमिति एवं स्थिते सति जगत्स्थितो लोकव्यवहारो गुरूपदेशा
ख्यः क्रमः आत्मज्ञानस्य कारणमिति तत्कथं केन प्रकारेण वद तं प्रकारं वदेत्यर्थः॥१९॥ श्रीवसिष्ठ उवाच
सिष्ठ उवाच [illegible] त्यं तत्कृपणः कश्चित्किरातो धनधान्यवान् आस्ते विंध्याटवीकच्छे कुटुंबी अस्तनादि वर॥२१॥
किरातो वैश्यः किरति धनलाभार्थमटति पुनः प्राप्नोति च ततः द्विगुणत्रिगुणादिरूपेणेति व्युत्पत्तेः विंध्यविं
बने किरातः कटसलिलेषु इति वचनात् किरात इति तु नपातः धनधान्यवत् बस्य ब्राह्मणादिवत् कुटुंबि बस्यति
नेत्रयं अरण्ये कपर्दीको च्युतपस्य स किंजातं अस्यनो विस्यारे तस्यैकदा निपतिता गच्छतो विंध्यजंगले॥ एकाव
नाटिका नाटिका रामचंद्रपाल [illegible] मावृतो॥२२॥ विंध्यजंगले जंगलमरण्यप्रायो देशः युगल इति पावे अल्प
दकं स्वस्यतन्तु स्थलं वनाटिकाक[illegible]पर्दिकाशोधस्पृष्टी॥ कार्पण्यात्स प्रयत्नेन सर्वं तृणगुल्मसादिकं कपर्दि
कार्थमत्तितो दुधावद्दिवसत्रयं॥२४॥ कृपणस्य भावः कार्पण्यं लोभातिशय इत्यर्थः तृणबुसादिकं बुसं
उंगरः कपर्दिकार्थं पतितां वराटिकामन्वेष्टुं स्पष्टमन्यत्॥२४॥ ततो दिनत्रयस्यांते तेन तस्मात्कुजंगलात् शर्षर्णौ
बत्तिमो लब्धश्चिंतामणिर्महान्॥२५॥ कुजंगलात् कुत्सितादरण्यप्रदेशात् शिरो हं समानो॥॥ यथेति श्लोके द्व

वाक्यं। यथा तत्र किराटेन कपर्दान्वेषणात् तत्र रत्नं लब्धं जगन्मूल्यं महोदारमखेदिना।२२। तथा कृतोपदेशेन स्वा
त्मज्ञानमवाप्यते। अन्यदन्विष्यते यान्याल्लभ्यते हि गुरुक्रमात्।२३॥ यथार्थेति किराटेन कपर्दान्वेषिणा जगन्मूल्यं र
त्नं लब्धं तथा गुरोः कृतोपदेशेन शिष्येणाख्यात्मज्ञानमवाप्यते। कियस्मात्कारणात् गुरुक्रमात् गुरूपदेशादुपाया हे
तोः अन्यदुपदिष्टं वस्त्वन्विष्यते। ध्यायते अन्यदनुपदिष्टं वस्तु लभ्यते साक्षात्क्रियते। शिष्टं समाने।छ।। चेतस्या
स्य महार्घस्य गुरूपकथनेन गतं। अकारणं कारणतां मणेरिव कपर्दकः।२४। महार्घस्य बहुमूल्यस्यास्य तत्त्वस्य
तत्त्वज्ञानस्य गुरूपकथनेन गुरूपदेशः तत्प्रकरणं साक्षात्कारणं अपि मणेः कपर्दक इव परंपरया कारणतां गतः।२
च सिद्धं भवान्। ततः शिखिध्वजो राजा तत्त्वज्ञानपदं विना। अज्ञानमपरं मोहं तमोऽन्धत्वमिव प्रजाः।२५। तत्त्वज्ञानप
देविनात्तत्त्वज्ञानरूपस्य विश्रान्तिः पर देस्याभावादित्यर्थः। गतमोऽन्धत्वं धामित्रमंधत्वं प्रजाः जनाः। शेषं स्पष्टं।छ।। दुः
खाग्निदीप्ति तप्तमनाः मनागपि विश्रान्तिं। ताश्च भीष्टापनीतासु नरेमग्निशिखास्विव।४। ददाव तितरां दानं तीर्थ
याचांचकार सः। तपः कृच्छ्रादिकं च कोवाभ्याम परितो दिशः।४। सर्वथापि विशोकत्वं न मनागपि लब्धवान्। चिन्तापरव
शोदीनो राज्यं पशान्विभाप सं... शोकदेकोऽत गतः बुद्ध्यालामेकमाश्रिता। इदं मधुरया वाचा समुवाच शिखि
शंडाः।४३। ... एव आत्ममयः। अनुं धुनास्मि विनागोपमुक्तो गच्छामि काननं।४४। पयक्र
सुर्गं राज्यं चिरंकालं दृष्टाविर
मेतस्पष्टं।छ।।

नृसुखानि न दुःखानि मा पुत्रो न च संपदः। क्रोडीकुर्वंति तत्त्वं गिमुनिं वन निवासिनं। ४५। क्रोडीकुर्वंति स्वाधीनं कुर्वंति। शोषस्य पूर्वोक्त। नं देश भग्न संभ्रान्तो न संग्रामे जन क्षयः। राज्याद्प्यधिकं मन्ये सुखं वन निवासिनां। ४६। वनं नि
नां देश भंग संभ्रमो नास्ति। न संग्रामे जन क्षयः युद्ध निमित्तः प्राणिनां संक्षयोपि नास्ति। अतश्च वनवासिनां सु
खं राज्य सुखाद्प्यधिकं मन्ये। ७। यया विविक्रमैकांते मनो भवति निर्वृतं। न तथा राशि विंबेषु न च ब्रह्मेंद्र स
मसु। ७। अस्मिन्स्त्रियेर पातत्वि न विघ्न कर्तुमर्हसि। मनुर्विघटयंती छांन स्वप्ने विकुलस्त्रियः। ४८। लज्जालोचाय
प्राप्तकाल कृतं कार्यं राजते नाथ तेतर शूवस्ते राजते पुष्पं फलं शरस्विदि राजते। ४९। जरा जरवद् हतानां युक्तो वासन
माश्रयः। न यूनां त्वाहशामेव वने नैतन्मे न रोचते। ५०। त्रिविधं तत्र वाच अलंकृत्य स्थले प्रवालिकि विद्धेना भिमतस्य म
विद्धि मांगत मेव ताहरमेकांत कानने। ५१। बालात्व मन वद्यांगी नागं तव्यं वयावने। उ सामपि ह्मिद्दंगी उर्विगा
हो वनाश्रय। उवत्यो पालयत्येन राज्येस्थानव्य मत्तमे। कुं हं व भारोद्द रनं पत्योया ते वनं स्त्रियः। ५२। उत्स्कंस्काद
यितां राज्ञा तामिंदुवदनां वशी। उन्नेस्थोस्ता तु मखिलं दिनकार्यं चकार ह। ५३। अथोसित प्रजा चारो र विस्ताच
लं ययौ। यामिन्यायो वनं प्राप सरोज मुकुलस्तनी। ५४। कृत संध्या समाचारः सरह्य उलये ययो। सुधा प्रशयने
भ्रयो मेना कइव सागरे। ५५। अथार्द्धरात्र समये देशो निःशब्दतां गते। घननिद्रा शिला कोरो निलीन सकले जने

नी२

निवार

तस्याज दयितां सुप्तां काजाजाथ नियैद्यो। सार्द्धद्वे ते श्लोकाः स्पष्टार्थाः ॥छ॥ वीरक्रमार्थयामीति तत्रैवानुचरवज्रं।
योजयित्वा जगामासो पुरान्निर्गस्विदृर्णधीः ॥५७॥ वीरक्रमार्थं वीरचर्यार्थी ॥छ॥ जडेल द्धिं तमस्कृत्यं इत्यकामंडलाह।
तः ॥ विवेश ग्राममरण्यानीमकोनदड्वाणोवां ॥५८॥ पुनः प्रातः पुनाया विरुपिवादश्च शर्वरीः। जवेन लंघयामास
मंडलानि गिरीन्नदीः ॥५९॥ द्वयमेतत्स्पष्टं ॥छ॥ ततइति श्लोकद्वयेवाक्यं ततो मेदुपशैलस्य तटस्थं जनदुर्गमाप्र
पकाननमत्यंतहरस्थजनताघुराहं ॥६०॥ रटखनालसलिलवापीवलितयारदपारीपर्वैद्यादिविज्ञातजातहर्षवद्वि
जाश्रमा ॥६०॥ अत्यंतेहरस्थाजनताजनसमूहः पुत्राणिच यस्मीररटंति पुनंतित्रपाल सलिलात्रिकुल्याजल
नियास्तांलाभिर्वापीभिः दीर्घिकाभिर्वलितः पादपायस्मिन् शीर्णैः शिथिलेर्वैद्यादिभिर्वेदिकाप्रपाशालादिभिः
विज्ञाताः [illegible] तवर्षेर्वाः द्रुतं [illegible] ताः द्विजानामाश्रमायस्मिन् ततसाहद्रां मंदपशैलतटस्थकाननेप्रापेत्यन्वयः।
॥छ॥ कुडपामि [illegible] लिसिद्धसेव्यलताग्रहांतवैकस्मिन्समेदेशे सचकारोटजालयं ॥६१॥ सर्वं संपादितं तद्व
योग्य ताप्रसन्न [illegible] सार्द्धश्लोकोस्पष्टार्थः ॥छ॥ मृस्तृणमिति श्लोकद्वयेवाक्यं मृस्तृणावेणवंदंडफलभो
जनभाजनं ॥ व्यैपात्रं पुष्पाद्यं म [illegible] कमालां कमंडलुं ॥६२॥ कंथां शीतापनोदाय हसीचाथ मृगाजिनं। आनी
यायोजयत्तत्र मठिकामंदिरं नृपः ॥ मृस्तं पांस्त्रिंगाहसीमितिनामासनं ॥ हसीआसनरूपं मृगाजिनमित्य
व्रतिनामासनं हसी ॥ र्थः ॥छ॥

श्री॥ ३४९

७२

656

६५८

वृ ४

तस्य दिनचर्यामाह संध्या मिति श्लोकद्वयवाक्येन । संध्यापूर्वं जपं प्रातः प्रहरे स तदाकरोत् । द्वाभ्यां द्वयं द्वितीये
तस्मात्तं दैवार्चनं ततो भः ... पश्चाद्भुक्त्वा किंचिद्दनकं दिवा शास्त्राद्दिवा । भुक्त्वा जाप्यपरो भूत्वा ततो नायेको निशां वशी ॥
६६ ॥ अन्तरेयामी ... अन्त्यराः ॥ ७ ॥ वसिष्ठ उवाच ॥ एवं त्रिः ॥ खिद्यतः पर्णमिचिकायां च नेस्थितः । इद । नीश्वशुच्छ
लासा किं ... (१२) ॥ किंवृत्तवती कीदृशा चरित्रयुक्ता ॥ ७ ॥ तदिति श्लोकद्वयं वाक्यं । तत्रार्द्धरात्रसमये ह
रेयान्ते शिखिध्वज ... रिणीग्राम ... बुबुधे भयात् ॥ ९ ॥ अपश्यत्पतिं निद्री नाशयनं शून्यतां गतं । तत्र
स्थौ किंचितदाम्लानवदना खेदशालिनी ॥ १० ॥ उ सिक्के व म ... वल्ली निरुत्साहा ... व पद्रवा । कृष्णं शय्यापवि
ष्टैव चिंतयामास खिन्नधीः ॥ ११ ॥ कष्टं राज्यं प्रभुस्त्यक्त्वा वनं यातो ... दिति । सा हृदयमेतत्स्पष्टं ॥ ७ ॥ तदिति श्लो
कद्वयं वाक्यं । तन्मये ... किं कार्यं तत्समीपं व्रजाम्यहं । भर्त्रैव गतिरुद्दिष्टा विधिना प्रकृता स्त्रियाः ॥ १२ ॥ इति सं
चिंत्य भर्त्तारं अनुगंतुं समुत्थिता । चूडाला वातरंध्रेण निर्गत्यांबरमायया ॥ १३ ॥ विधिना ... भर्त्रैव प्रकृतान्या
यागतिरुद्दिष्टा । वातरंध्रेण गवाक्षेण । रोषस्पष्टं ॥ ७ ॥ चकार सिद्धसार्थस्य सुखेनान्येद्युर्विचचार ददर्शाथ पथायां
तं रात्रौ खंगकरं पतिं ॥ १४ ॥ सुखेन सुखेन सिद्धार्थस्य सिद्धसंघस्य । अन्येद्युर्विचरं अन्योयमिंदुरिति भ्रांतिं ॥ ७ ॥ ताद्दृशं
पतिमालोक्य स्थिता गगनकोटरे । भविष्यच्चिंतयामास सर्वं भर्तुरखंडितं ॥ १५ ॥ भविष्यज्ञा वि भर्तुः शुभाशुभं ... खं
डितमशेषं चिंतयामास ॥ ७ ॥ अवश्यं भवितव्यं न रहस्था भर्तुः पुरः स्थिता । तद्वसं पाद चित्तं गगनात्सा न्यवर्तत ॥

स्त्रियाः ९

आस्तां ममाद्य गमनं काले नातिचिरे पाहि मयास्य पार्श्वं गंतव्यं विपने रेष निश्चयः ॥७३॥ इति संचिंत्य चूडाला प्रविश्यां-
तःपुरं ततः । सुष्वाप शयने कांता नभसीव देवीकला ॥७४॥ केन चित्कारणेनासौ गतां इति स्म पतिः । इति पौरजनं सर्व-
माश्वास्यातिष्ठदंगना ॥७५॥ राज्यं ररक्ष भर्तुः स्वं क्रमेण समदर्शिनी । जगामाथ दिने पक्षो मासः संवत्सरस्तथा ॥७६॥
वङ्नात्र किंचिदुक्के नव षाण्यष्टादशांगना । नूनं वाससदने वनगर्ते श्रीशिखिध्वजः ॥७७॥ भर्तुः समीपगमने मम कालोयमि-
त्यथा संचिंत्य मंदरोपांतगं तु बुद्धिं चकार सा ॥७८॥ चचाल ततः पुराद्राज्ञीत तापन नभसः पथा । जगाम वातस्कंधेन प्राप मं-
दरकंदराणि ॥७९॥ अदृश्यैव नभःस्थैव प्रविवेश वनांतरान् । नृपयोगेन बुबुधे देहांतरमिवास्थितं ॥८०॥ हार केयूर कटक कुंड-
ला बुद्धिविवर्जितं । कृशांगं कृष्णवीर्यं च पतिं जर्जरतां गतं ॥८१॥ तमालोक्य नवधांगी चूडाला पीवरस्तनी । किं चिज्ञा-
नविषादेव सुवावात्मनि बैतसा ॥८२॥ अहो नु विषमं मौर्ख्यं सवेगा स्वार्थदर्शिनः । एवं विधास्य मायां तिष्ठद शायत्स-
द ततः ॥ पतंद वक्ष्यमि साध्वैव नाथं विदित वेद्यतां । नयाम्येनेन संदेहो भोगमोक्षश्रियं तथा ॥८४॥ इदं रूपं परित्यज्यस्व-
पेणान्येन केनचिरसकाशमस्य गच्छामि बोधदातुमनुत्तमं ॥८५॥ बालेयं मम कांतेति मदुक्तं न करिष्यति । तस्मात्ताप-
सवेषेण बोधयामि पतिं रूपात् ॥८६॥ एवं दशैते श्लोकाः स्पष्टार्थाः ॥७॥ सर्वकषायपाकेन परिपक्वमतिः [illegible] नाव तस्य
स्याद्य चिमलोत्यगतेमति बिंबति ॥ [illegible] कषायपाकेन कषाया रागादयः । तेषां पाको निषिद्धवर्जनेन विहित [illegible] तेन ॥
इति संचिंत्य चूडाला वपुस्त्वद्विजदारकः [illegible] ध्यानागतान्यत्वं भर्तुरग्रे पपात ह ॥८८॥ द्विजदारको द्विजपुत्रकः । ईषद्ध्याना-
ल्पादेव ध्यानांश ॥ अन्यत्वं रूपांतरं [illegible] समाना ॥८९॥ ददर्शेति श्लोकद्वयं वाक्यं ॥ ददर्श द्विजपुत्रत्वं धरायां तं शिखिध्व-

उः ॥ मधुवत्कनकगौरांगं मुक्ताहारविभूषणं ॥ ॥ शुक्लरौप्ययज्ञोपवीतां शुक्लांबरसुगात्रतं ॥ मामावलनवरणं
किंकुमौत्रोपरिस्थितां ॥ ॥ किंकुमौत्रोपरिस्थितं ॥ ममिमुक्ताहस्तमाबाहुपरिवर्तमानं ॥ शिष्टसमानं ॥ ॥ तमालो
क्य द्विजसुतं समुत्तस्थौ रविध्वजः देवपुत्रागमं धियासंपरित्यक्त पादुकः ॥ १२ ॥ देवपुत्रं नमस्कार इदमासनमा
स्यतां ॥ इत्यदर्शयामास पाणिना पत्रविष्टरं ॥ १४ ॥ हे राजर्षे नमस्ते स्य मिस्कृत्को सग्रपाविशत्त्वात् तदर्पितां पुष्प
वृष्टिं गृहीत्वे प्रविवेशाह ॥ १५ ॥ रविध्वजत्त्वाच्च देवपुत्र महाभाग कुतआगमनेन कृतं दिवसात्मफलोमन्येय त्वाम
द्यास्मि हृष्टवान् ॥ १६ ॥ इत्युक्त्वा पाद्यमर्घ्यं च मालाद्युक्ताणि चानघ ॥ रविध्वजस्तद्दीशाय देवनाय ददौ क्रमात् ॥ १७ ॥ कृ
डालोवाचा पेक्षालेनानुरूपेण प्रश्रयेण संतानघा मन्ये हंतनम्रत्यं वंशि राजाविभविष्यसि ॥ १८ ॥ श्लोकषट्कमतत्स्पष्ट
शांतेन मनसोदारमाराद्धुमुक्तकल्पनं ॥ निर्वाणार्थे तपःसाध्यो कश्चित्संभृतवानसि ॥ १९ ॥ आराद्धरादेवो मुक्तकल्प
नं यथा तथा शांतेन मनसा निर्वाणार्थं उदारं महातपः संभृतवानसि कच्चित् ॥ १४ ॥ असिधारासमं सौम्य शीतवृतमिदं
तव ॥ स्फीतं यज्ञान्यमुत्सृज्य महावननिषेवणं ॥ २० ॥ असिधाराव्रतत्वं तेन रूपेण तु ॥ युवायुस्यासाई तुयाभृतं वदा
वरः ॥ असितनिवृत्तसंगस्तदसिधाराव्रतं विदुरिति ॥ तस्मादृश्यं चासत्तिस्तितायोमपि राज्यलक्ष्म्यां भोगसामर्थ्ये विभा
गत्या गात्रस्य शमनं च ॥ २१ ॥ रविध्वज उवाच ॥ जानासि भगवन्सर्वं देववत्स कोत्र विस्मयः ॥ पृथिव्यां सर्वदिनमवा
ष्णायसे चिन्ताभरतया ॥ ॥ लक्षकस्त्वं कस्य पुत्रस्त्वं किमायातोस्यनियतो ॥ २२ ॥ नमे सीरायवृत्ति विमलं दुःसमाननं ॥

659

दा६

ङ्गरखोवाचाराजन्मेष्टपुवक्ष्यामियथाहष्टमखंडितंकोनामपरिछद्दंतंविनीतंवंचयेन्नुमानु॥३॥अस्यास्मिन्भुगन
कोरोभुङ्कात्मानारदोमुनिःपुण्यस्व[illegible]यामुखेकोतेकर्हिचित्तृकोपमः॥४॥सकदाचिन्मुनिर्हैव्योगुरुयांध्यानमाश्रि
तः॥तत्रहेमतटेगांगावस्तुरुतरंगिणी॥५॥एकदानारदमुनि[illegible]सरितस्तटे॥ध्रुतदलयमश्रोषीच्छुलाकलक
लारवं॥६॥किमेतदितिसोकिंचित्[illegible]मवाहवी[illegible]हेसचालोकयेन्नद्याअपन्युत्तुसनागणं॥७॥रेभातिल
त्रमोआयंत्रिपात्तेजलसीलया॥क्रीडंतंत्रकेवसनंदंरागुरुपवर्जितं[illegible]सर्वांगविश्वरूपमिवस्थितं॥प्रति
विबिनसर्वांगंअन्योन्यादर्शतांगतं॥८॥रेखाणसालोक्यतेकोतसहस्रेवमनामुनोअनाश्रितविवेकोतदभ्वीनंदिन
स्फुरन्॥९॥आनंदवलितेचित्रेशुद्धेप्राणानिलेस्थितेवाहरचत्यप्रद्वस्यमदनस्वसखलितंतदा॥१०॥नारदोविधजगव
लोतादृशोपिबुजोपिजीवन्मुक्तोप्यसौमुनिः॥कथमेवविधंबुद्धि प्राप्तोमदनवश्यतां॥११॥पुनश्चडालावाक्यंबुद्
लोवावास्यनिर्मलेसत्येनिमेषमपिविस्मृतोदृश्यमुल्लासे मायातिआर्द्रवीवपयोधरः॥१२॥निर्मलेसत्येच
स्वरूपेतिस्मृतमात्रमपिविस्मृतेसतिदृश्यंजगदुल्लासंगाढंगंबु मानोति॥१३॥अनारतानुसंधानोदप्युत्मनम
स्मृते॥स्वेरूपेणीहद्धसत्येपचित्तिदृश्यतिशाश्वकः॥१४॥चितिचिन्मात्रे स्वभावस्वरूपेणीरतानुसंधानाहृतोरुन्मे
मात्रमप्यविस्मृतेसत्येतदृश्यंपि[illegible]नाहुसतिनस्फुरति॥१५॥ सुखदुःखकलास्पंदोवेधोजीवस्यानेतरः॥तद
भावोस्मिमोदंस्यादितिदेआख्यचस्थितिं॥१६॥जीवस्यासुखदुःखास्पंदःसुखदुःखस्फुरणमेवबंधस्तदभावःसुख

धार

३४२

दुःखकलासंदाभावत्वमोक्षः स्यात् इत्येवं द्वयोर्बंधमोक्षप्रकारयोर्व्यवस्थितिर्निःकृष्टः देवे निषद्धी द्विवचनांतं ॥९॥
अथ स्वबोध्यबोधेन स्वात्मज्ञानेन तयाः भिन्ना सुखदुःखादिनास्तीति ज्ञातो ज्ञायाति सौम्यतां ॥१०॥ स्वात्मज्ञानमयात्मनो स्वरू
पज्ञानात् आभ्यंतरशुद्धेन बोध्यबोधेन बोध्यस्य ज्ञेयस्य परतत्त्वस्य बोधेन स्वरूपाभिन्नपरब्रह्मानुभवेन सुखदुःखादिकं न
स्तीति ज्ञाते सति ज्ञानी सौम्यतां जीवन्मुक्ततां याति ॥१०॥ सर्वमेव चिदाकारो ब्रह्मेति घननिश्चये। स्थितिं याते समं याति जी
वो निःस्नेहदीपवत् ॥११॥ सर्वमेव जगच्चिदाकारा रूपं ब्रह्मैवेति घननिश्चये स्थितिं याते सति जीवो जीवभावः शमं याति ॥११॥
आत्मस्वभाववशाताज्ञाते जगदिदं महत्। स्थितिवासनया भ्येत्य धर्माधर्मवशे स्थितं ॥१२॥ इदं जगदात्मस्वरूपज्ञानवास
ना स्थितिमभ्येत्य धर्माधर्मवशे पारतंत्र्ये स्थितं ॥१२॥ वासनानाशमात्रेण धर्माधर्मैर्न गृह्यते ततो न जायते जंतुरिति नादर्शन
सुनो ॥१३॥ अतः कारणात् वासनाशममात्रेणयं धर्माधर्मैर्न गृह्यते न बध्यते ततः कर्मबंधाभावाज्जंतुर्न जायत इति एवं वि
धेनास्माकं दर्शनं सिद्धांतः ॥ चूडालावाक्यं ॥ शिखिध्वज उवाच ॥ अस्फारमस्पष्टं यथैवक्लिष्टं वदतो वर ॥ अनुभूतिमुपारूढं
स्पष्टं च परमार्थवत् ॥२०॥ विशेक्य विभवेनाद्य कृतेनानेन सुंदरि। पीतेन वामृतेनाहं भृशं तर्पितोस्मि शीतता मृतस्मानेनेत
तावदासौरभ्य त्वं वदाश्रमे। ततः श्रीव्यामियत्नेन ज्ञानगर्भं गिरं तव ॥२१॥ तेन प्रजंपुत्रेण मुनिना नारदेन तत्राकृतं वी
र्यमार्यपाकथया घ्ययास्थितं ॥२२॥ श्लोकत्रयमेतत्स्पष्टं ॥ ततः रतिश्लोकद्वयं वाक्यं चूडालोवाच ॥ ततो निबध्नाता तेन
मनोसम्भ्रमं तगजा। विवेकविपुलालाने शुद्धबुद्धिवरत्रया ॥२३॥ मुनिना पार्श्वगोकुंभे स्फाटिके वीर्यमर्पितं ॥ सकाल्पे तेन

५५

661

ह्वरेणास्तुं भस्तेन प्रि तः ॥४॥ विवेकविद्युल्लालालां गगनबंधनलं भमस्तुद्वद्धिवृरवथा वनवाजैव मेमपीरक्षुः ॥६॥
अवर्हृतं ततो मा सा फिरिगभादिवोऽस्याः ॥ परिपूर्णसमस्तांगं ऊँ भातप्ता विनिर्ययौ ॥७॥ सर्वसंस्कारसंपन्नं सुतं
लिभिन्ना पदोत्तु निःभांडक्षांडरवा ज्ञं वंविद्याधनेमयाज्ञ यरा ॥८॥ अथैनं पुत्रमादाय सुगा मवत्स पोतिकं । पोत्र
तं भगवान्वेधा स्वकारज्ञानपारगः ॥९॥ त्रयमेतत्स्पष्टं ॥१०॥ सो धीइति श्लोक हयवाक्या सा ओ सोयमहंनाम मुं
पुनास्मि कुलतः चत्वारः पुरुषार्थवेदा मम लीलाविलासिन ॥११॥ मातृ स्वसा मे गायत्री माता मम सरस्वती
यथाकाममशो बेणज गोति विजदान्य हांष्या च यानो वेदाममसु हदः ॥ इत्यनेनवेदार्थतत्त्वज्ञानं सूचयति
गायत्री मे मातृस्वसा माता सरस्वती ॥ पोषयित्री तिदत्वा वातस्योः स्वसा पुरगिनी गायत्री येनेन च
स्वस्यसन [illegible] प्रसादं लब्धुं सार्वज्ञं स्वयमेति ॥ ओं [illegible] ॥ शिरवि [illegible] अधेतिध
म्यहं साधो धन्यानां धुरि धर्मतः ॥ अमृतस्पंदि वचसा य त्वया [illegible] समागतः ॥ [illegible] नक
चन तथा [illegible] वा श्लोके तच्चेतिमेन [illegible] दयो ध्येते यथा साधु समागमः ॥ [illegible]

मा

श्री

३४४

662

चूडालोवाच । आस्तामेषा कथा तावत्सर्वं ते कथितं मया । त्वं मे कथय हे साधो कस्त्वमत्र करोषि किं ॥३॥ शिखिध्वज उवाच ।
देवपुत्रो सि ज्ञातासि एतत्स्वं वक्ष्याम्यहं शृणु । संसारभयभीतत्वान्निवसामि वनांतरे ॥४॥ शिखिध्वजोहं नृपालः सन्त्यक्त्वा
राज्यमिह स्थितः । भृशं भीतोस्मि तस्मात्संसृतेर्जन्मतः पुनः ॥५॥ इमामखंडितां सम्यक् क्रियां संपादयन्नपि । दु
खाद्दुःखमिवाघं ममृतं मे विषं स्थितं ॥६॥ षडेते श्लोकाः स्पष्टार्थाः ॥७॥ चूडालोवाच । ज्ञानं हि परमं श्रेयः कै
वल्यं तेन चे... ले । कालातिवाहनायैव विनोदाय क्रियोदिता ॥८॥ ज्ञानं ज्ञानसाधनं कालातिवाहनाय कालह
रणरूपाय विनोदायैव क्रिया । तैः तपः स्वाध्यायादिरूपोदिता ॥९॥ अलब्धज्ञानदृष्टीनां क्रिया हि परमायणं । वा
सनामात्रसारत्वादज्ञस्य सफलाः क्रियाः ॥१०॥ अलब्धज्ञानदृष्टीनामनात्मविदां क्रियैव परागतिः । नयतो वासनाम
त्रसारत्वात्प्रवृत्तेः वासनाश्रयत्वाद्धेतोरज्ञस्यैव क्रियाः सफलाः । न तु वासनरहितस्य ज्ञस्येत्यर्थः ॥११॥ सर्व एव फ
लाज्ञस्य वासनामात्रसंक्षयात्रोपस्थितः ॥१२॥ भवंतरे यथा याति विलयं सर्वमार्त्तवं । तथैव वासनानाशो नाशमेति कि
याफलं ॥१३॥ एवं प्राक्तनं आर्त्तवं मतो उवं कुसुमफलादिकं वर्षेवंतरे एवं तेरापगमेनान्यस्मिन्नृतौ यथा विल
यं याति तथैव वासनानां नाशे सति क्रियाफलमपि नाशमेति ॥१४॥ वासनाहेतुत्वात्क्रियाफलस्येत दैवोपपादय
न्नाह नेति । नरस्य भावेन फलति यथा सरलता फलं । क्रिया निर्वासना यत्र फलं फलति नो तथा ॥१५॥ सरलता
सरला त्वग्रटगस्य नीवः । सा यथा रसभावेनैव वल्कस्य भावेनैव फलं न फलति कुसुममात्रपर्यवसितत्वात्

२२

श्री॥३

में ४ वै ४

यस्य मे खर्व्वं कृयं प्यातं सर्वं ब्रह्मेति भावनाशनो देति वासनानातस्य प्राज्ञस्येवांबुधिर्मरौ ॥३॥ वासनामात्रसंत्यागाज्ज
रामरणवर्ज्जितं पदं भवति जीवोतं भूयो जन्म विवर्जितं ॥४॥ सवासनं मनोज्ञानं ज्ञेयं निर्वासनं मनः ज्ञानेन ज्ञेयता
मेत्य पुनर्जीवो न जायते ज्ञानमेव परं श्रेय इति ब्रह्मादयोपि ते प्राकृ मुनो ते राजर्षे कथं [illegible] ॥ यं कि
मज्ञानं वांछितः ॥५॥ कोऽहं कथमिदं जातं कथं शाम्यति चेति भोः ॥ साह वचतुष्टयमेतत्स्पष्टं ॥६॥ कथं बंधः कथं मोक्ष इ
ति प्रश्नानुदाहरन् ॥ पारावारविदां पादाननुकस्मात् जानन्सेवसा ॥७॥ पारावारविदां संसारसागरस्य पारावारं व ब्रह्मे
व तद्विदां पारावारज्ञाभ्यां अंतादील [illegible] ॥ पुनः कुंजवाक्यो [illegible] सः तां समहर्षीणां परिप्रश्नेन सेवया ॥ संगमेन च सायुक्ति
र्लभ्यते मुच्यते यया ॥८॥ वसिष्ठ उवाच ॥ कांतया देवरूपिण्या तथैवं प्रतिबोधितः ॥ अक्षर्षणमुखो वाक्यं त्रिशिखिध्वज उवाच ह
॥९॥ त्रिशिखिध्वज उवाच ॥ अहोऽनुबोधितोऽस्म्यद्य चिरात्सुंदर त्वया ॥ मोर्ख्यदार्यसमासंगमुक्तोऽहमवसं वने ॥१०॥ अहो
नु मे रुक्ष्यं यातं मन्ये पापमशेषतः ॥ सर्वमेव नमागत्य सं प्रबोधयसीह मां ॥११॥ गुरुस्त्वं मे पिता त्वं मे मित्रं त्वमेव यातना ॥ शि
ष्योनमस्कारोम्यद्य पादौ तव कृपां कुरु ॥१२॥ यदुदारतमं वेत्सि युस्मिंज्ञाते न शोच्यते ॥ उवाचेति निर्वृतो येन तद् ब्रूहि पदि
शा श्रमा ॥१३॥ चूडालवेवाच ॥ यदि पादेह वाक्योऽहं राजर्षे तद्वदामि ते ॥ अन्यथा नेकधा प्रोक्तं मम विस्याद्धि फलं वचः ॥१४॥ श्लोक
समकमेतत्स्पष्टं ॥१५॥ पुनरुवाच ॥ अनुपादेयवाक्यस्य वक्तुः पृष्टस्य लीलया ॥ व्रजेत्यफलतां वाचस्तमसीवाक्षसंवि
दः ॥१६॥ लीलया प्रमादेन [illegible] उपादेयवाक्यस्यानामस्य वक्तुर्वाचस्तमस्यक्षसंविद् अक्षुरिंद्रियं वृत्तिरिव इव
फलतां व्रजंति ॥१७॥ शिखिध्वज उवाच ॥ यत्त्वं कथयसि तदनुष्ठेयं मया विधिरिव कृतः ॥ अविचारितमेवाशु ॥ सत्यमेतन्मयोदितं ॥१८॥

श्री
३४

664

त्वंयदद्रिभूषेतद्भूते विधिधिरिवेद्वेदिकं कार्यमिव अविचारितमेव मया आसुअनुष्ठेयं। एतन्मया सत्यमेवोदितं।छ।। रङ्ग
लोवाच। यथो बाल। पितृवाक्यं लुक्केन ह्नुमे पादयन्। आदत्ते इति तथैव त्वं रक्षणवचनं मम।८।। तनः ॐ भः बोलो यथो पितृ
वक्ये युक्तं प्रतिपादनं यस्य कः युक्तिमर्थनमेवाद्य त्वं स्वीकरोति। तथैव त्वमपि मेवचो रक्षण।छ।। प्रथमं श्रुणु भो राजन्
ह्तान्तकं चिद्रद्भुतं वाचान्वयोपयिष्यामि प्रकृतार्थव्यवस्थितिं।५५।। अस्ति कश्चिन्मान् श्रीमानुस्थाने सर्वगुणाश्रियो। सर्व
शास्त्रार्थतत्वज्ञो न तु ज्ञानात्यजे पदं।५।। अनंतयत्नसंसाध्य सवितामणिसाधने प्रवृत्तो वाउवाव क्विर ब्रिसंशोषणे यथा।
तस्य यत्नेन महता कालेनाध्यवसायिनः। कालस्य वसतस्तस्य मुनेर्निबंधशालिनः।५७। शुद्धचिंतामणिः किं वा न सिध्यवश्य
तात्मनो।मणिमग्रस्थितं प्राप्तं हस्तप्राप्तेद दर्शसः।।। मेरो रुद्रस्य शृंगस्थो मुनि तिरिङ मिवोदितं। बिभ्रत्वमणिं प्राप्य जं प्रतनु
श्रयवानसो।।६०।। राज्ञिङ्गा त्रिरिसं प्राप्त सुदीन द्रुवपामरः। इदं संविंतयामास मनसा स्मयशालिनः।६१।। संप्राप्तं नवया
र्घदीर्घदुःखसमं भ्रमे स्मा।ह श्लोकसप्तकमेतत्स्पष्टं।छ।। अयमिति सप्तमिः श्लोकेर्वाक्यं अयं मणिर्मणिनो यं मणिश्चिन्ता
वक्षसः। षष्ठमिनस्पृशाम्यनंकदाचिर्स्थरताग्रजेन।६२।। नेताव तेव कालेन मणीन्द्रः किल सिध्यति यत्नेनजीवितातेन सिद्ध
तीत्यागमक्रमः। कृपणः क्रमितः साक्षाद्बालालानालतो मम।।६३।। रत्नाल किंद्र पश्यामि दिव्यं त्वमिव भ्रमात्राक्रुतए तावे
नीस्फीता भाग्यसंपन्न मागता। अधुनेव यदाप्तामि मणीन्द्रं सर्वसिद्धिदं।६४।। के विदेव महत्तां तस्तेमहाभाग्याभवं तिदि
यषासुत्पेन कालेन तुवंत्यभिमुखाः श्रियः।६५।। अहमल्पतपाः सावेध्रुवरो को मानुषः किल। सिद्ध्यः कथमायांति म
न भाग्यकोराजनि।६६।। एवं विकल्पसंकल्पैश्चिंपमद्धपराम्टशान्नानमणिग्रहणे यत्नमकरोन्मोक्षमोहितः।६७।। इ

स्ट्र्या ५ स्प ५

तितस्मिंस्थितेयातोमणिरुड्डीयसिद्धिदः॥ त्यजंत्विवमंतारंसरागुणमिवोसिताः॥६७॥ गुमान्नृयःक्रियायत्नंचेत्कर
तेंऽसाधनेनोद्दिष्टंतेस्वकार्यग्रजनाअध्यवसायिनः॥६८॥ अयंगुरोवर्त्तीवमणिर्वा अयंदृश्यमानोमणिर्नभवतिचेत्
णिश्चन्मणिर्भवतिचेत्तत्तर्हिसचिंतामणिर्नज्ञेयः॥ अतःसंदेहदशायांपश्यन्नेवनस्पृशामिस्पर्शतःकदाचिद्वान
पिमणीऽश्चिंतामणिरेतावतैवकालेननसिध्यतिकिलकिंतर्हिजीवितांतेनप्राणस्पंदितेनमहतायत्नेनसिध्यतीत्या
गमानांसमणिसाधनानांकल्पानांक्रमः॥ अहंतुहेपणःसद्रूपणितेनसक्तचितेनाशालोलातत्तलतोपमंलातमुत्
केतच्छारवासहस्रांरलालोकंद्विसंडत्वमिवभ्रमादेवपश्यामि॥ एतावतीस्फीतापरयिष्ठाभाग्यसंपन्न
आगतायधस्याभाग्यसंपदोहतारघुनेवसर्वसिद्धिदंमणींद्रमाप्नोमि॥ येषामल्पेनैवकालेनक्रियासिद्धि
रवाप्नुवंतितेकेचिदेवमहांतोमहाभाग्याभवंति॥ अहंतुनरल्पतपाःसाधुतराकःसाधूतांशोच्यामानुषएव
अतोमममभाग्यतःभाजनंसिद्धयःकथमायांति॥ एवंविकल्पसंकल्पेविकल्पैःसंकल्पैश्चचिरंपरामृश्यन्
मोऽरव्यमारितेऽज्ञानपरवशोमणिग्रहणयत्नंनाकरोत्॥ शिखसमानां॥६९॥ ददर्शाथकचरुपंकाचखंडमरव
डितं॥ तस्मान्निर्विवेकैःसिद्धेःपुरस्कृतमलक्षितः॥७०॥ अथहसन्निर्विवेकैःसिद्धेरलक्षितेरेवपुरस्कृतेकचरु
पंअखंडितंकाचखंडंददर्श॥७१॥ अयंचिंतामणिरितिमूढस्तस्मिन्सवस्तुतां॥ बुबुधमोहितोवज्ञामूढेदेमव
पश्यति॥७२॥ सम्मूढस्तस्मिन्काचखंडेऽयंचिंतामणिरितिवस्तुतापरमार्थचिंतामणिर्बुबुधे॥ अज्ञादिमोहि
तःसन्मूढंदंशृत्तिकाविशेषंदमवस्पश्यति॥७३॥ ततस्तंमणिमादायप्राक्तनीसत्त्रियंजहौसर्वंचिंतामणिरस्मीति

प्यते किं धनैरिति ॥ ३ ॥ दद्यामयमसुखो रुद्धो जनैः श्यासि भिराहृत ततः हृदं गत्वा यथाकामं सुखं तिष्ठामि संपदा ॥ ७ ॥ इत्याद
यमणिं हृदः स्वस्य कोन्तमायया तेन कोशमणोनासामस्ती मापदं ययौ ॥ ८ ॥ श्लोकद्वयमेतत्स्पष्टं ॥ ७ ॥ इति चिंत
मप्यकूपारव्याने ॥ ७ ॥ हडालोवाच ॥ अथ ममापरं रस्यं वृत्तांतं शृणु भूमिप ॥ परं प्रबोधयन्बुद्धेः साध्वीस दृशमात्मना ॥ १ ॥
अस्ति विंध्यवने हस्ती मदान्यः पथि पद्मथपः वज्रास्थि विषमो दीर्घो तिस्थास्तांदशनोसितो ॥ २ ॥ द्वयमेतत्स्पष्टं ॥ ७ ॥ स च
हालो हडालेन हस्तिपेन किलाभितः ॥ निबद्धो यंत्रणामाप क्रूरशृंखलया दिनं ॥ ३ ॥ स हस्ती हस्तिपेन तु कड्डालो हड्डा
लेन शृंखलया साधनेन अभितो बद्धो हरडा इडं निबद्धः क्रूरशृंखलया बद्धः ततः स नूयंत्रणां पारंतं नूमापेति वाक्य
न्निबद्ध इति पानरुक्त्यं ॥ ७ ॥ स्वदांस्तिगडनिर्भेदं चकार स मतांगजः ॥ दंताभ्यां यत्नतस्ताभ्यां मुहुर्त्तैर्दित [illegible] ॥ ४ ॥ स ध
तस्यानं निगडच्छेदं दृष्ट्वा सहेहदं निश्चयः ॥ पपात तार्थं गजेंद्रस्य मूर्ध्नि तालतरोरिपुः ॥ ५ ॥ तद्बंधनिश्चयः तस्य हस्तिनो बंधनि
श्चयो यस्य स रिपुर्हस्तिपकः तालतरोः सकाशात् गजेंद्रस्य मूर्ध्नि पपात ॥ ७ ॥ सोपतद्द्रुमतिभ्रमावशात्प्यकरिणः शिरः ॥ तं गुरुः
पतितं दृष्ट्वा महेभः करुणां ययौ ॥ ६ ॥ कोपिस्फारगुणाः संतः संति तिर्यग्गतावपि पापतितं दक्ष्यामीति किं त्वाममभपार
धी ॥ १ ॥ वारणोपीति कल्पयन्न जघान स तं रिपुं केवलं तं परित्यज्य प्रदेशं सय यो गजः ॥ ७ ॥ गते गजे स मुक्तस्थो हस्तिपः स्व
स्थदेहधीः ॥ सोचिंतयद्गजं यत्नान्मत्तं कोनरितं वने ॥ ८ ॥ चिरेणाल्लुनेनेडंक स्मिंश्चित्काननेस्थितो साहंसवतुष्टयमे
तत्स्पष्टं ॥ ७ ॥ स खानवलयं चक्रे हस्तिपः काननेभितः ॥ उपर्यस्थगयज्जीर्णलितो घेन स तं शठः ॥ ९ ॥ खातवलयं श्वभ

नदंधं८

२७९

वल्लयमस्खगायदाहणो१॥ शेषंस्पष्टं॥७॥ दिनैःकतिपयैरेववारणाविदरन्नुनेतस्मिन्निपतितःखातेश्रु धाद्याविवर्पवर्तः॥७६॥ इतिभूयोहदंबहस्तेनदस्तिपकेनसः॥ तिष्ठत्युद्यापिडुःखेनसंसमनियथाबलिः॥७७॥ अद्दनिव्युत्तुरेवसोयदग्रेपतितंरिपुं॥ तत्रालःसततंडुःखंगजःखात्मनिबंधने॥७८॥ त्रयमेतत्स्पष्टं॥७॥ मोरव्यादिगामितंकालंवर्वर्वृमनुक्रिया॥ क्रमेः॥ अपशोधयन्नरोडुःखंयातिविंध्यगजोयथा॥७९॥ नरोमोरव्यादिज्ञानाहतोरागामिनंकालंवर्वर्तमानेक्रिया क्रमेः उपायैरशोधयन्निरपायमकुर्वतःदुःखंयातिविंध्यगजोयथेत्यन्वयः॥७॥ इतिगजोपाख्यानी॥ इदानींशिखिध्वजःकथाद्दयस्यतात्पर्यंपृच्छति॥ शिखिध्वजउवाच॥ मणिसाधकविंध्यभवबंधनाद्यमराद्भुतं॥ यत्कथाजालमुनमेशकटीकुरु॥१॥ मणिसाधकविंध्यभवबंधनान्मणिसाधकादिंध्यभवबंधनाचेत्यर्थः॥ स्पष्टमन्यत्॥ योसावित्यर्द्धचयंवाक्यं॥ चूडालोवाच॥ योसौशास्त्रार्थकुशलस्तत्वज्ञानेनपंडितः॥ रत्नसंसाधकः॥ प्रोक्तःसत्वमेवमहीपते॥२॥ धानज्ञोभवसिशास्त्रकृतत्वज्ञानेनशिक्षितः॥ विद्धिचिंतामणिंसाधोसर्वत्यागमकृत्रिमं॥ ध्यातमंतस्सर्वदुःखानांवसाधयितुमुद्यतः॥ संत्यक्तंभवताराज्यंसदारधनबांधवं॥५॥ खदेशास्यातिहरखरखमागतोसिममाश्रमाय॥ प्रमानृस्वार्थकुशलःशास्त्रार्थज्ञानप्रवीणः॥ तत्वज्ञानेनपंडितो॥ प्रगल्भःसन्मानुरत्नसाधकः॥ प्रोक्तः॥ शास्त्रोक्तविधिनारत्नसाधनात्तदपिरत्नंनिश्चयाभावात्स्वरत्नंसंसाधकः॥ मानस्त्वमेवयततस्त्वंशास्त्रतत्वज्ञोनुवसिनेहदिविश्रांतिस्तवनिष्ठास्तनास्तिकस्तर्हिचिंतामणिरित्यत्राह॥ वीहीति॥ श्लोकद्वयवाक्येनायतोवता

श्री॥

३७

२॥

२७६

६४

राज्यं संत्यक्तं यतस्त्वातिहरमिममाश्रमं समागतोसि अतस्त्वं सर्वदुःखविनाशकं सर्वत्यागं नाम चिंतामणिं
साधयितुमिच्छस्य यः ॥ ७ ॥ कथं तर्हि स चिंतामणिर्मया न लब्धइ इत्यत्राह केवलमिति अर्हत्र यद्वाक्येन के
वलं सर्वसंत्यागे शिखिता मतिस्त्वया । न तु तःसर्वपरित्यागो यावन्नाप्नोति पूर्णतां ॥ ८ ॥ तावत्त्यागविक
ल्पस्त्वां स्वमं दुःखं इवाहृणो ग्राये तत्त्वया सर्वत्यागमतिः केवलं शिखिता अभिमानो त्यक्त इत्यर्थः । ततस्त
स्माद्धेतोः सर्वत्यागस्यापरिपूर्णत्वात्तद्विषयो विकल्पस्त्वा माहृणो ग्राखमाकारा स्तुबुद्दे इवा ॥ ८ ॥ नायमिति
श्लोके द्वयं वाक्यं नायं स परमानंदः सर्वत्यागो महोदयः । को प्यन्यः परोप्यन्ये एवासौ चिरसाध्यो महानिति ॥ ९ ॥
चिंतयेति गते हृहि विकल्पे तव प्रवेत सिवास्ययेवच्चः स्पंदत्यागः प्रोड्डीय ते गतः ॥ १० ॥ अयमिदानीं सिद्धः स
र्वत्यागः परमानंदः परम आनंदो यस्मिन् महानुदय उद्दोतो यस्मिन् तादृशः सर्वत्यागो न भवतीय तोसौ परमा
नंदरूपः सर्वत्यागश्चिरसाध्यो महानन्य एव कोपीइत्येवं चिंतया विकल्पे चेतसि हृदि गते स तितेत्यागः प्रो
ड्डीय गतः । वायस्यया वातसमूह नवनस्पंदकं पेहृदिंगत पक्षी यथा प्रोड्डीय गच्छति तद्वत् ॥ ८ ॥ अमितानंदमुद
ज्यसुसाधं यः प्रवर्त्तते । मितवस्तुनि दुःसाधे खात्मनासत्रावः स्मृतः ॥ ११ ॥ अमितानंदः सुसाधश्च सर्वत्यागो मित
परिमितानंदं दुःसाध्यं च वस्तु न यः ॥ ७ ॥ चिंतामणिमणिमर्याद्राप्तइत्यलं बुद्धवानसि न लब्धवान् भवान्साधोस्म

नृपविहाय यथा बलिरिस्तेन ॥ सि २ तप: २

टिकस्यापि खंडुकं । कायम णिं लब्धवानुश्रेयस्कं किंचिदपि न लब्धवानित्यर्थः । शिष्टं समानं ॥६॥ ॥इति चिंतामणि वर्णनं ॥ ॥७॥ ॥इदानीं विंध्यहस्तिकथां विवृणोति योसावित्यादिना । खेल्डालावा वा योसौ विंध्यवने हस्ती सो
१ भवा स्मिन्नस्मिं तल्लम्हानत्यो वैराग्यविवेकौ ततौ तस्य दन्तौ नौ स्मृतौ ॥१॥ यश्चासौ वारणाकांति तस्य राहस्ति पः स्मृतः तत्वज्ञानं नदकांतिनस्य रेतपि दुःखदो ॥२॥ अतिसक्तोप्यसक्तेन दुःखदुःखं भयान्वयो ॥ अस्ती हस्तिपकेन वराजन्मो खर्वेण नीयते ॥३॥ यद्वो हरजुसाले नजालेन परिवेष्टितः । तदाशापाशजालेन भवानापदमागतः ॥४॥ आश रिलोहरज्जुस्यो विषमा विपुला दृढा कालेन क्षीयते लोहं तृष्णा तु परिवर्द्धते ॥५॥ यद्वद्बंधगजः शत्रोः शृंखला जालबंधने । तद्वत्याज भवान्भोगान्नत्वमिराज्यमकंटकं ॥६॥ अयं तु तालतरोर्भ्रष्टो भ्रमो हस्तिपको पतत्र त्वयि स्यजु तिन ज्ञाज्ञां संज्ञानं पतितं कृतं ॥२॥ यदा विरक्तः पुरुषो भोगान्संत्यक्तुमिच्छति । तदाजकं पतज्ज्ञानं च्छेद्यदहोपि शा वरा ॥३॥ भोगो भवेदनु भुक्ते पतत्यज्ञानसंस्थितिः । यदा विवेकी पुरुषो भोगान्संत्यज्य तिष्ठति ॥४॥ तदाय पत्राय तेज्ञानं छिन्नं महोपि शावरः ॥५॥ महावनं भयानस्ते तदाज्ञानं कृतं त्वया । पतितः सन्ननिःसृतं सर्वस्यानामदासि ना ॥१॥ तेन भूयः समुच्छाय सन्नापमि संकृतं । ततः प्रपंचखाते स्मिन्नास्णत्वं निजाजितः ॥७॥ तदेवाघातयिष्यस्य यघज्ञानं तथा गतो राज्यस्याग्निविश्रान्तं वा बाहु निष्पात्कृयं गतः ॥८॥ यत्खातं बलयस्तेन वैरिणा हस्तिनः कृतः ।

२४८

ततः परं दुःखमतुलमज्ञानेनानुभवितव्यमिति ॥ ३ ॥ तस्य परिवारे श्रीगर्जारेर्गडकरे नृपासत्वमज्ञानं नृपतेश्चिन्तनं तिवि
सारिणी ॥ ४ ॥ यत्र खातवलयो बालतृणलताभिरवगुंठितः । आहतं तत्र पौडुःखमीषत्सज्जनवृत्तिभिः ॥ ५ ॥ इत्यथापितप
खातं दुःखद्यामिन्नु दारुणा ॥ छिन्ना सिपाताल तलेनृपव ह्रोय थाबलिः ॥ ६ ॥ विंध्य हस्ती भवान्मूर्खवाद्वैराग्यविवे
को रखवदीयोस्य दर्शनो ॥ शृंखलादिबंधभंजकत्वात् । हस्तिपकस्त्वदज्ञानं बंधकत्वात् । दुःखहेतुत्वाज्जालोदरज्जु
जालमोचायाज्जालं शृंखलाभंगस्त्व राज्यभोगत्यागः । हस्तिपकस्य तालतरोर्वंशो नाम त्वया राज्यस्य त्यज्य मान
त्वदज्ञानस्य भ्रंशः । पतितं हस्तिपकमुपेक्ष्य हस्तिनो वनगमनं नाम तव सर्वत्यागमसिनानि निःशेषमज्ञानस्याच्छेदनं
नाख्याश्रयणं । हस्तिपकेन भ्रयो हस्तिबंधनाय वने खातकल्पनं । अज्ञानेन तपो नियमतियोजनं खातवल
यस्य बालतृणलताभिरवगुंठनं च तपोदुःखस्य सज्जनवृत्तिभिरीषदावरणमिति तात्पर्यनिःकर्षः ॥ ७ ॥ ॥ ६
इति गजवृत्तांतविवरणं ॥ ॥ ७ ॥ ॥ चूडालोवाच । यदुक्तं तव शालिन्या तया विदितवेद्यया । तदाह चूडालया ज्ञानं
तत्कस्मान्नानरीकृतः ॥ १ ॥ शालिन्याश्च श्लाघ्यया ॥ २ ॥ शिखिध्वज उवाच ॥ सा हि तत्वविदां मुख्या यद्यद्वक्ति करोति वा तत्सवं
सत्यमेवांगनदनुष्ठेयमादरात् ॥ ४ ॥ स्पष्टं ॥ अथ तद्वचनं तस्यास्त्वया नानुष्ठितं नृपातत्सर्वपरित्यागः कस्मा
न्न निःगुणीकृतः ॥ ५ ॥ तस्याश्चूडालायाः वचनं नानुष्ठितं चेत् हि सद्वेषा क्रियमाणः सर्वपरित्यागो पि वादस्या

हेतोर्न निगुणीकृतः संहर्षीनकृतः ॥ स्पष्टमन्यच्च ॥ श्रीशिखिध्वज उवाच ॥ राज्यं सक्तं गृहं त्यक्तं देशास्त्यक्तस्तथाविध-
दारास्त्यक्ताः सुतास्त्यक्ताः सर्वत्यागो न किं कृतः ॥५॥ स्पष्टं ॥ कुंभ उवाच ॥ धनं दारा गृहं राज्यं भूमिश्छत्रं च बांध-
वाः इति सर्वं न ते राजन् सर्वत्यागो हि कस्तव ॥७॥ अत्र मत्येषां राज्यविक्रानामुपलक्षणं । इति सर्वमेतत्सर्वं न
त्वदीयं न भवति । अतः सर्वत्यागः को नाम स्वकीयस्य त्यागः त्यागो न भवतीत्यर्थः ॥ तर्हि मदीयः क इसचास्त
वेति । नवास्त्येवा परित्यक्तः सर्वस्माद्भाग उत्तमः । तं परित्यज्य निःशेषं परमां यास्यशोकताम् ॥८॥ सर्वस्मादस्कृता
परित्यक्तः अनपगत उत्तमो रागः इच्छा विषयस्तवास्तीतं रागं निःशेषं परित्यज्य परमामशोकतां यास्यसि ॥ शि-
खिध्वज उवाच ॥ राज्यं चेन्मम नो सर्वं तत्सर्वं वनमेव मा । शैलवृक्षादिगुल्माढ्यं तदप्येतत्त्यजाम्यहं ॥९॥ यासर्वं राज्यं
मम मदीयं नो चेत्तर्हि शैलवृक्षादिगुल्माढ्यं वनमेव सर्वं मे मदीयं यदस्ति तदेतदपि त्यजामीत्यन्वयः ॥ इ-
ति श्लोकद्वयं वाक्यं वसिष्ठ उवाच ॥ इति राम वदन्नेव कुंभवाक्येन नोदितः । निमेषांतरमात्रेपावशीर्ध-
रः शिखिध्वजः ॥ [illegible] ममा [illegible] तां दृढासहृढनिश्चयः ॥ आरूढोऽघस्तटगतां रजोरेखामिवात्मनः ॥५॥
आत्मनस्तीवनस्त्वीवना । [illegible] ममाऽस्येत्यन्वयः ॥ इतरत्समानं ॥ ॥ शिखिध्वज उवाच ॥ सवृक्षाद्रिवनं श्वभ्र-
हि पिनाद्य पिबासनापरित्यक्तमया कृतं सर्वत्यागः स्थितो मम ॥१२॥ स्पष्टं ॥ अद्रिरित्यर्थद्वयं वाक्यं [illegible]

श्री॥
३४६

गवान्या अदिस्वटं वनं ध्वजं सलिलं पादपास्थलं इत्यादि तव नो सर्वं सर्वस्या गः कथं तवाज्ञानवास्त्येवापरिस्यक्त
सर्वं भाजनाग्रम म [illegible] तत्रजन्म मनो सर्वं तत्सर्वं स्वाश्रमो मम माव मकुञ्ज कुञ्ज स्थलादि तत्रावसं स्यज
स्य हं [illegible] वत्रिविधजनाचाइ सक्लो ज्ञातसर्वं मिदं मालाजिनादिकं एकत्रैव समानीय ददाह त्यागबुद्धितः।
सार्वं चयगतस्तत्र व्याख्येयं ॥ भांडजातं दहत्युग्नो सहस्रुक्षेधने न तत्र केवलाकृति रस्त्रेहस्त्यमानाव
रपतिः ॥ त्रिविधजनवावा वापीस्थलोटजयुतस्तमेवाश्रुत्यजाम्य हं आश्रमोपि न ते तस्मिं स्त्यक्तेत्यागे ग नो
सर्वगः ॥ तवास्त्येवा परित्यक्तः सर्वस्माद्वागतस्तमः ॥ त्रिविधजनवावा तत्र जन्ममनो सर्वं तत्सर्वं भाजनादि
मावासनां तत्र संत्यज्य सर्वस्यागी स्थितो वदार्थ ॥ अहो नु विरकालेन देवगुरुप्रबोधितः ॥ संपन्नः केवलः शुद्ध
सुखेनो ज्ञाधवान हंभ ॥ सा हृत्त्वहृत्यमतस्पष्ट ॥ त्रिविधजनवाक्ये किं नाम किलवस्त्वेतत्त्वे संकल्पितं
मायया भांडोपस्कर स्थानसदनाद्यवलंबनं ॥ संकल्पितकमं बुद्धिपरिकल्पितो प्रयोगं ॥ भांडोपस्कर स्थानसद
नाद्यवलंबनं ॥ भांडं भाजनं उपस्करं गृहोपकरणं स्थानं निवासः सदनं गृहं इत्यादीनामवलंबनं परिग्रह
इति यदेतत्किं नाम वस्तु न किं चिद्वस्तु दुःखैक हेतुत्वात् यदुक्तं वैराग्ये यावतः कुरुते जंतुः संबंधान्मनसः प्रि
या न् तावंतोस्य निखंन्यंते हृदये शोकशंकवः इति ॥ यावद्यावदनुलीयंते विविधा बंधहेतवः तावत्तावत्सम

१२

याति परमां निर्वृतिं मनः ॥ ३१ ॥ स्पष्टं ॥ शाम्याभिपरिनिर्वामि सुखितोस्मि जयाम्यहं । विषयाः प्रलयं याताः स-
र्वत्यागो मयाकृतः ॥ ३२ ॥ दिगंबरो दिग्विवासो दिक्समो यमस्थितः । देवपुत्र महात्यागाद्यदन्यद्वद शिष्यते ॥ ३३ ॥
कुंभ उवाच ॥ सर्वमेव न संत्यक्तं त्वया राज्यं शिखिध्वज । सर्वत्यागपरानंदमामुधाभिनयं कुरु ॥ ३४ ॥ वसिष्ठ उ-
वाच ॥ इत्येवं ब्रुवता तेन किंचित्संचिन्त्य भूभृता । इदं मुक्तं मनस्तावाद्योरामराजीवलोचन ॥ ३५ ॥ शिखिध्वज उवाच ॥ इदं वि-
षव्यालसंघातो रक्तमांसमयाकृतिः । शिष्यते सर्वसंत्यागे देहो मे देवतात्मज ॥ ३६ ॥ तदुत्थाय गुनदं दं भृगुपाताद-
विघ्नतः । विनाशात्मकतां नीत्वा सर्वत्यागी भवाम्यहं ॥ ३७ ॥ वसिष्ठ उवाच ॥ इत्युक्त्वा देहमग्रस्थे श्वभ्रे यत्कुंभसंपु-
वा शाकरोति यावदुत्थानं तावत्कुंभोभ्युवाच ह ॥ ३८ ॥ कुंभ उवाच ॥ राजन्किमिति देहं त्वं निरागस्कं महावटात् ॥ सजस्य
हि हेष भो कोपितोहं तिनर्णकं ॥ ४० ॥ त्यक्तेनापि शरीरेण किल तामरसेक्षण । सर्वत्यागो न ते याति निष्पत्ति वि-
षमो हि सः ॥ ४१ ॥ येनायं चालितो देहो यद्बीजं जन्मकर्मणां । तत्संत्यजसि चेत्त्यागं महात्यागवान्भवान् ॥ ४२ ॥
शिखिध्वज उवाच ॥ किं तद्बीजं जन्मकर्मणां । कस्मिंस्त्यक्ते परित्यक्तं सर्वं भवति सुंदर ॥ ४३ ॥ कुंभ उवाच ॥ न दे-
हो ... वाक्यं साधो सर्वगताकारं जवज्ञाणादिनामकं । न जडं नाजडं भ्रांतं चि-
त्सर्वमिति स्थितं ॥ ४४ ॥ चित्तं विद्धि ... तस्मिन्नु साधो परित्यक्ते सर्वत्यागो ...

श्री॥
३५०

स ६

...नाकारं सर्वं जगदाकारेण परिणमं न जडं संक्रांतचैतन्यतया प्रकाशकत्वाद्गुनाजडं कल्पितत्वेनासमर्थ्य [illegible]
[illegible] समानं ॥ ३ ॥ जन्मनां कर्मपादपोपि वीजं बीजमुदाहृतं ॥ पादपः पूर्वनेनेव देहं चित्तेन चाल्यते ॥ ४ ॥ चित्तत्यागं विदु
सर्वेत्यागं यागं विशोधनां [illegible] कल्पयं याति दैतमैक्यं च सर्वतः ॥ ६ ॥ शिष्यते परमं शांतमेकमच्छमनामयं ॥ स
र्वत्यागं परानंदाद्रखमन्यत्तु दारुणं ॥ ७ ॥ इत्योमीत्यंकरीकृत्य यदिच्छसि तदा वर ॥ कृत्वा सर्वपरित्यागं शांतः स्वच्छो
यसमः ॥ ८ ॥ सोऽत्मा भव स्थिर इत्युपस्तद्रूपो ऽनुवर्तते [illegible] धं ज उवाच ॥ चित्तस्यादौ स्वरूपं मे यथावद्भगवन्मम चद
ततस्त्वं चित्तपरित्यागं वद मे वदतां वर ॥ ९ ॥ वासनैव सदा राजन्स्वरूपं विद्धि चेतसः ॥ चित्तशब्दस्य पर्यायो वासनाया
उदाहृतः ॥ १० ॥ सोहं बद्धमेतस्य ॥ ११ ॥ टीका उउवाच ॥ अहमर्थोदयो यो यं सर्वानर्थैकभाजनं ॥ १२ ॥ एतच्चित्तद्रुमस्य
स्य विद्धि बीजं महामते ॥ १३ ॥ सर्वानर्थैकभाजनं सर्वस्यार्थानर्थरूपस्य संसारस्य मूलकारणं योयमहमर्थोदयो अह
कारोदयोस्ति एतदेवास्य चित्तद्रुमस्य बीजं निदानं विद्धि एतस्मात्प्रथमोद्भिन्नादंकुरात्तु उवाकृतिः ॥ निश्चयात्मानि
राकारो बुद्धिरित्येव सोच्यते ॥ १४ ॥ प्रथमोद्भिन्नात् प्रथममुद्भूतादेतस्मादहंकारादनुउवाकृतिः अनुभवैरूपो निश्च
यात्मा निश्चयस्य भावो निराकारो बाह्यविषयाकारानुपरक्तोयांकुरोयातः सैव बुद्धिरित्युदीर्यते ॥ ७ ॥ अस्य बुद्ध्यभि
मानस्य यांकुरस्य प्रपीनता संकल्परूपिणी तस्याश्चित्तं चेतो मनोभिधा ॥ १५ ॥ बुद्ध्यभिमानस्य बुद्धिरूपस्यांकुर
स्य संकल्परूपिणी या प्रपीनता स्थूलता तस्याः संकल्परूपिण्याः स्थूलताया एव चित्तं चेतो मन इति चाभिधा

मूलोद्धरणमेवाशुस्त्यागंत्यागविदोविदुः॥२॥

